रम् ३५ तानुवाच हृषीकेशः समाश्वास्य महामनाः । युधिष्ठिरो राजसूयं क्रतुमाहर्तुमिच्छति ३६ तस्य धर्मप्रवृत्तस्य पार्थिवत्वं चिकीर्षतः । सर्वैर्भवद्भिर्विज्ञाय साहाय्यं क्रियतामिति ३७ ततः सुप्रीतमनसस्ते नृपा नृपसत्तम । तथेत्येवाब्रुवन्सर्वे प्रतिगृह्यास्य तां गिरम् ३८ रत्नभाजं च दाशार्हं चक्रुस्ते पृथिवीश्वराः । कृच्छ्राज्जग्राह गोविन्दस्तेषां तदनुकम्पया ३९ जरासन्धात्मजश्चैव सहदेवो महामनाः । निर्ययौ सजनामात्यः पुरस्कृत्य पुरोहितम् ४० स नीचैः प्रणतो भूत्वा बहुरत्नपुरोगमः । सहदेवो नृणां देवं वासुदेवमुपस्थितः ४१ भयार्तायं ततस्तस्मै कृष्णो दत्त्वाभयं तदा । आददेऽस्य महार्हाणि रत्नानि पुरुषोत्तमः ४२ अभ्यषिञ्चत तत्रैव जरासंधात्मजं मुदा । गत्वैकत्वं च कृष्णेन पार्थाभ्यां चैव सत्कृतः ४३ विवेश राजा द्युतिमान्बार्हद्रथपुरं नृप । अभिषिक्तो महाबाहुर्जारासंधिर्महात्मभिः ४४ कृष्णस्तु सह पार्थाभ्यां श्रिया परमया युतः । रत्नान्यादाय भूरीणि प्रययौ पुरुषर्षभः ४५ इन्द्रप्रस्थमुपागम्य पाण्डवाभ्यां सहाच्युतः ।

तरी आह्मीं राजांनीं तें केलेंच असें तूं समज ३९. ह्मावर महाबुद्धिमान् इंद्रियाधिपति श्रीकृष्ण आश्वासनपूर्वक त्यांना ह्मणाले " युधिष्ठिर राजानें राजसूय याग करण्याचें मनांत आणिलें आहे ३६. करितां, साम्राज्यप्राप्तीची इच्छा करणाऱ्या त्या धर्मनिष्ठ युधिष्ठिराला तुह्मीं सर्वांनीं बुद्धिपूर्वक साहाय्य करावें " ३७. तदनंतर हे नृपश्रेष्ठा, जनमेजया, ते राजे सुप्रसन्न अंतःकरणानें " ठीक आहे " एवढेंच बोलले. ह्याप्रमाणें श्रीकृष्णांचें तें वचन शिरसा मान्य करून ३८ त्या भूपतींनीं श्रीकृष्णांना रत्नें अर्पण केलीं आणि श्रीकृष्णांनींही मोठ्या कष्टानेंच त्यांची दया येऊन तीं स्विकारलीं ३९. नंतर जरासंधाचा पुत्र महाविचारी सहदेव पुरोहिताला पुढें घालून स्वजन आणि अमात्य ह्यांसहवर्तमान गिरिव्रजनगरापासून बाहेर निघाला ४० आणि अत्यंत नम्र होऊन व विपुल रत्नें पुढें करून तो नराधिपति वसुदेवपुत्र श्रीकृष्णांच्या संनिध उभा राहिला ४१. तेव्हां भयानें त्याकुळ झालेल्या त्या सहदेवाला अभय देऊन पुरुषोत्तम श्रीकृष्णांनीं त्याची महामूल्यवान् रत्नें स्वीकारिलीं ४२ आणि जरासंधाच्या पुत्राला त्यांनीं आनंदानें राज्याभिषेक केला. पुढें श्रीकृष्णांशीं ऐक्य होऊन कुंतीपुत्र भीमार्जुनांनींही सत्कार केल्यानंतर ४३ तो तेजस्वी राजा आपल्या पित्याच्या राजधानींत गेला. हे जनमेजय भूपते, ह्याप्रमाणें महात्म्या कृष्णपांडवांनीं महापराक्रमी जरासंधपुत्राला अभिषेक केला ४४ आणि नंतर सर्वोत्कृष्ट वैभवानें युक्त असलेले ते पुरुषश्रेष्ठ श्रीकृष्ण पुष्कळ रत्नें बरोबर घेऊन कुंतीपुत्र भीमार्जुन ह्यांसहवर्तमान तेथून

समेत्य धर्मराजानं प्रीयमाणोभ्यभाषत ४६ दिष्ट्या भीमेन बलवाञ्जरासंधो निपातितः। राजानो मोक्षिताश्चैव बन्धनान्नृपसत्तम ४७ दिष्ट्या कुशलिनौ चेमौ भीमसेनधनंजयौ। पुनः स्वनगरं प्राप्तावक्षताविति भारत ४८ ततो युधिष्ठिरः कृष्णं पूजयित्वा यथार्हतः। भीमसेनार्जुनौ चैव प्रहृष्टः परिषस्वजे ४९ ततः क्षीणे जरासंधे भ्रातृभ्यां विहितं जयम्। अजातशत्रुरासाद्य मुमुदे भ्रातृभिः सह ५० यथावयः समागम्य भ्रातृभिः सह पाण्डव। सत्कृत्य पूजयित्वा च विससर्ज नराधिपान् ५१ युधिष्ठिराभ्यनुज्ञातास्ते नृपा हृष्टमानसाः। जग्मुःस्वदेशास्त्वरिता यानैरुच्चावचैस्ततः ५२ एवं पुरुषशार्दूलो महाबुद्धिर्जनार्दनः। पाण्डवैर्घातयामास जरासंधमरिं तदा ५३ घातयित्वा जरासंधं बुद्धिपूर्वमरिंदमः। धर्मराजमनुज्ञाप्य पृथां कृष्णं च भारत ५४ सुभद्रां भीमसेनं च फाल्गुनं यमजौ तथा। धौम्यमामन्त्रयित्वा च प्रययौ स्वां पुरीं प्रति ५५ तेनैव रथमुख्येन मनसस्तुल्यगामिना। धर्मराजविसृष्टेन दिव्येनानादयन्दिशः ५६ ततो युधिष्ठिर-

---

निवाले ४५ व त्या पांडुपुत्रांसहवर्तमान इंद्रप्रस्थाला जाऊन धर्मराजाला भेटल्यावर आनंदानें त्याला ह्मणाले ४६ " हे नृपश्रेष्ठा, सुदैवानें बलाढ्य जरासंधाचा वध भीमसनानें केला आणि बंधनापासून राजे सोडविले ४७. हे भरतकुलोत्पन्ना युधिष्ठिरा, हे भीमार्जुन धक्का न लागतां पुनरपि आपल्या नगरामध्यें सुखरूप आले हेंही मोठें भाग्यच समजलें पाहिजे ४८. तदनंतर युधिष्ठिरानें योग्यतेनुरूप श्रीकृष्णांचें पूजन करून मोठ्या आनंदानें भीमार्जुनांना कवटाळून धरिलें ४९. असो. ह्याप्रमाणें जरासंधाचा वध होऊन उभयतां भ्रात्यांनीं मिळविलेला जय प्राप्त झाल्यानंतर अजातशत्रु युधिष्ठिर सर्व भ्रात्यांसहवर्तमान आनंदित झाला ५० आणि वयाच्या योग्यतेप्रमाणें भ्रात्यांसहवर्तमान राजांच्या भेटी घेऊन सत्कारपूर्वक त्यांचें पूजन केल्यानंतर युधिष्ठिरानें त्यांना निरोप दिला५१. तेव्हां युधिष्ठिराची अनुज्ञा झाल्यावर आनंदित अंतःकरणानें युक्त झालेले ते राजे उच्चनीच वहानांच्या योगानें सत्वर आपआपल्या देशांना गेले ५२. सारांश, ह्याप्रमाणें पुरुषश्रेष्ठ महाबुद्धिमान् श्रीकृष्णानीं पांडवांकडून आपल्या जरासंधनामक शत्रूचा वध करविला ५३ आणि ह्याप्रकारें बुद्धिपूर्वक जरासंधाचा वध करविल्यानंतर, हे भरतकुलोत्पन्ना जनमेजया, धर्मराज, कुंती, द्रौपदी, सुभद्रा, भीमसेन, अर्जुन, नकुलसहदेव आणि धौम्य मुनि ह्यांचा निरोप घेऊन ते शत्रुनाशक श्रीकृष्ण मनाप्रमाणें शीघ्र गमन करणाऱ्या व त्या धर्मराजानें दिलेल्या दिव्य आणि श्रेष्ठ रथाच्या योगानें दशदिशा नादित करीत करीत आपल्या नगरीप्रत जाऊं

मुखाः पाण्डवा भरतर्षभ । प्रदक्षिणमकुर्वन्त कृष्णमक्लिष्टकारिणम् ५७ ततो गते भगवति कृष्णे देवकिनन्दने । जयं लब्ध्वा सुविपुलं राज्ञां दत्त्वाभयं तदा ५८ संवर्धितंयशो भूयः कर्मणा तेन भारत । द्रौपद्याः पाण्डवा राजन्परां प्रीतिमवर्धयन् ५९ तस्मिन्काले तु यद्युक्तं धर्मकामार्थसंहितम् । तद्राजा धर्मतश्चक्रे प्रजापालनकीर्तनम् ६० [१००५] इति श्रीमहाभारते शतसाहस्र्यां संहितायांवैयासिक्यां सभापर्वणि जरासंधवधपर्वणि जरासंधवधे चतुर्विंशोध्यायः ॥२४॥ समाप्तं चेदं जरासंधवधपर्व ॥

अथ दिग्विजयपर्व ॥ वैशम्पायन उवाच ॥ पार्थः प्राप्य धनुःश्रेष्ठमक्षय्यौ च महेषुधी । रथं ध्वजं सभां चैव युधिष्ठिरमभाषत १ अर्जुन उवाच॥ धनुरस्त्रं महावीर्यं पक्षो भूमिर्यशो बलम् । प्राप्तमेतन्मया राजन्दुष्प्रापं यदभीप्सितम् २ तत्र कृत्यमहं मन्ये कोशस्य परिवर्धनम् । करमाहारयिष्यामि राज्ञः सर्वान्नृपोत्तम ३ विजयाय प्रयास्यामि दिशं धनदपालिताम् ।तिथावथ मुहूर्ते च नक्षत्रे चाभिपूजिते ४ वैशम्पायन उवाच ॥धनंजयवचः श्रुत्वा धर्मराजो युधिष्ठिरः।स्निग्धगम्भीरनादिन्या तं गिरा प्रत्य-

---

लागले ५४, ५५, ५६ असतां हे भरतवंशजश्रेष्ठा जनमेजया, युधिष्ठिरप्रभृति पांडवांनीं क्लेशहरण करणाऱ्या श्रीकृष्णांना प्रदक्षिणा केली ५७. पुढें देवकीनंदन भगवान् श्रीकृष्ण गेल्यावर अतिशयच मोठा जय मिळवून व राजांना अभय देऊन ५८ पांडवांनीं आपली कीर्ति अधिकच वृद्धिगत केली आणि ह्या त्यांच्या कृत्यामुळें, हे भरतकुलोत्पन्ना जनमेजया, द्रौपदीला पराकाष्ठेचा आनंद झाला ५९. त्यावेळीं धर्म, अर्थ आणि काम यांना अविरुद्ध असें जें करणें योग्य होतें तें युधिष्ठिरानें धर्मबुद्धीनें करून प्रजापालन केलें ६०. ह्याप्रमाणें० सभापर्वांतील जरासंधवधपर्वांपैकीं जरासंधाच्या वधाविषयीं चोविसावा अध्याय समाप्त झाला॥२४॥ ह्या ठिकाणीं जरासंधवधपर्वही संपूर्ण झालें॥

येथून दिग्विजयपर्वाला आरंभ झाला ॥ वैशंपायन सांगतातः—श्रेष्ठ धनुष्य, मोठे मोठे अक्षय्य भाते, रथ, ध्वज आणि सभा हीं प्राप्त झाल्याचें पाहून अर्जुन युधिष्ठिराला ह्मणाला १ " हे राजा, धनुष्य, अस्त्र, बाण, वीर्य, पक्षपाती वासुदेव, पृथ्वी, कीर्ति आणि बल हें जें इच्छिलें होतें व जें प्राप्त होणें दुर्घट होतें तें देखील प्राप्त झालें आहे २. आतां, हे नृपश्रेष्ठा, त्या राजसूय यागाकरितां द्रव्यभांडार वृद्धिगत केलें पाहिजे असें मला वाटतें. ह्यास्तव, सर्वराजांपासून मी कर घेऊन येतों ३ व प्रथमतः विजयाकरितां कुबेररक्षित उत्तर दिशेला तिथि, मुहूर्त व नक्षत्र योग्य असतांना मी जातों " ४. वैशंपायन सांगतातः—अर्जुनाचें भाषण श्रवण करून धर्मराज युधिष्ठिर सौम्य व गंभीर

भाषत ५ स्वस्तिवाच्यार्हतो विप्रान्प्रयाहि भरतर्षभ। दुर्हृदामप्रहर्षाय सुहृदां नन्दनाय च ६ विजयस्तेध्रुवं पार्थप्रियं काममवाप्स्यसि । इत्युक्तः प्रययौ पार्थः सैन्येन महता वृतः ७ अग्निदत्तेन दिव्येन रथेनाद्भुतकर्मणा। तथैव भीमसेनोपि यमौ च पुरुषर्षभौ ८ ससैन्याःप्रययुःसर्वे धर्मराजेन पूजिताः। दिशं धनपतेरिष्टामजयत्पाकशासनिः ९ भीमसेनस्तथा प्राचीं सहदेवस्तु दक्षिणाम् । प्रतीचीं नकुलो राजन्दिशं व्यजयतास्त्रवित् १० खाण्डव-प्रस्थमध्यस्थो धर्मराजो युधिष्ठिरः । आसीत्परमया लक्ष्म्या सुहृद्गणवृतः प्रभुः ११ [१०१६]इति श्रीमहाभारतेशतसाहस्र्यां संहितायांवैयासिक्यां सभापर्वणि दिग्विजयपर्वणि दिग्विजयसंक्षेपकथने पञ्चविंशोध्यायः ॥२५॥

जनमेजय उवाच ॥ दिशामभिजयं ब्रह्मन्विस्तरेणानुकीर्तय । न हि तृप्यामि पूर्वेषां शृण्वानश्चरितं महत् १ वैशम्पायन उवाच ॥ धनंजयस्य वक्ष्यामि विजयं पूर्वमेव ते । योगपद्येनपार्थैर्हि निर्जितेयं वसुंधरा २ पूर्वं कलिन्दविषये दशे चक्रे महीपतीन् । धनंजयो महाबाहुर्नातितीव्रेण कर्मणा ३

ध्वनीनें युक्त अशा वाणीनें त्याला ह्मणाला ९ " हे भरतवंशजश्रेष्ठा, योग्य ब्राह्मणांकडून स्वस्तिवाचन करवून नंतर दुष्टांना दुःख व सुहृदांना आनंद देण्याकरितां तूं जा १०. हे अर्जुना, तुला जय निःसंशय येईल आणि तुझा प्रिय मनोरथ सिद्धीस जाईल ". ह्याप्रमाणें धर्मराज युधिष्ठिरानें सांगितलें असतां मोठ्या सैन्यानें परिवेष्टित असलेला अर्जुन ७ आपल्या हातून अद्भुत कर्म होण्यास कारणीभूत होणाऱ्या अग्निदत्त दिव्य रथासहवर्तमान चालता झाला. त्याचप्रमाणें भीमसेन आणि पुरुषश्रेष्ठ नकुलसहदेव ८ हे सर्व धर्मराजानें मान दिल्यावर सैन्यासहवर्तमान गेले. पैकीं कुबेराला इष्ट असलेली उत्तरदिशा इंद्रदत्त पांडुपुत्र अर्जुनानें जिंकिली ९. त्याचप्रमाणें भीमसेनानें पूर्व, सहदेवानें दक्षिण आणि अस्त्रवेत्त्या नकुलानें पश्चिम दिशा जिंकिली १० असतां खांडवप्रस्थामध्यें सुहृद्गणांनीं परिवेष्टित असलेला समर्थ धर्मराज युधिष्ठिर उत्कृष्ट वैभवानें युक्त झाला ११. ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रंथात्मकश्रीमहाभारतांतर्गत सभापर्वांतील दिग्विजयपर्वापैकीं संक्षेपतः दिग्विजय कथन करण्याविषयीं पंचविसावा अध्याय समाप्त झाला॥ २५॥

जनमेजय ह्मणतोः—हे ब्रह्मन्, पुनरपि आपण मला दिग्विजयाची हकीकत सविस्तर कथन करा. कारण, पूर्वजांचें उत्कृष्ट चरित्र श्रवण करतांना माझी तृप्ति होत नाहीं १. वैशंपायन सांगतातः—पांडवांनीं ही पृथ्वी एकदम जिंकिली. परंतु, प्रथमतः अर्जुनाच्या दिग्विजयाची हकीकत मी तुला कथन करितों २. त्या महापराक्रमी अर्जुनानें आधीं कुलिंददेशांतील राजे जिंकिले व त्याकरितां त्याला मोठा पराक्रमही करावा लागला नाहीं ३.

आनर्तान्कालकूटांश्च कुलिन्दांश्च विजित्य सः । सुमण्डलं चाविजितं कृतवान्सहसैनिकम् ४ स तेन सहितो राजन्सव्यसाची परंतपः । विजिग्ये शाकलं द्वीपं प्रतिविन्ध्यं च पार्थिवम् ५ शाकलद्वीपवासाश्च सप्तद्वीपेषु ये नृपाः । अर्जुनस्य च सैन्यैस्तैर्विग्रहस्तुमुलोभवत् ६ स तानपि महेष्वासान्विजिग्ये भरतर्षभ । तैरेव सहितः सर्वैः प्राग्ज्योतिषमुपाद्रवत् ७ तत्र राजा महानासीद्भगदत्तो विशां पते । तेनासीत्सुमहद्युद्धं पाण्डवस्य महात्मनः ८ स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषोभवत् । अन्यैश्च बहुभिर्योधैः सागरानूपवासिभिः ९ ततः स दिवसानष्टौ योधयित्वा धनंजयम् । प्रहसन्नब्रवीद्राजा संग्रामे विगतक्लमम् १० उपपन्नं महाबाहो त्वयि कौरवनन्दन । पाकशासनदायादे वीर्यमाहवशोभिनि ११ अहं सखा महेन्द्रस्य शक्रादनवरो रणे । न शक्ष्यामि च ते तात स्थातुं प्रमुखतो युधि १२ त्वमीप्सितं पाण्डवेय ब्रूहि किं करवाणि ते । यद्द्रक्ष्यसि महाबाहो तत्करिष्यामि पुत्रक १३ अर्जुन उवाच ॥ कुरूणामृषभो राजा धर्मपुत्रो

आनर्त, कालकूट आणि कुलिंद हे देश जिंकून त्या अर्जुनानें सैन्यासहवर्तमान सुमंडल राजाला पराजित केला ४ व हे जनमेजयराजा, त्यासहवर्तमान त्या शत्रुतापक अर्जुनानें शाकलद्वीप आणि प्रतिविंध्य भूपति ह्यांचा पराभव केला ५. त्यावेळीं शाकलद्वीपामध्यें आणि सप्तद्वीपांमध्यें जे राजे होते त्यांच्याबरोबर अर्जुनाच्या सैन्यांचें तुमुल युद्ध झालें ६. परंतु, हे भरतवंशजश्रेष्ठा, त्याही महाधनुर्धाऱ्यांना जिंकून त्या सर्वांसहवर्तमान अर्जुनानें प्राग्ज्योतिषदेशावर स्वारी केली ७ आणि हे प्रजाधिपते जनमेजया, त्या ठिकाणीं जो भगदत्त ह्मणून मोठा बलाढ्य राजा होता त्याच्यार्शीही महात्म्या पांडुपुत्र अर्जुनाचें फारच घोर युद्ध झालें ८. असो. तो प्राग्ज्योतिषदेश—किरात, चिनी आणि इतरही समुद्रतीरनिवासी व पाणथळ प्रदेशांत रहाणारे अनेक योद्धे—ह्यांनीं भरलेला होता ९. युद्ध सुरू झाल्यापासून त्या भगदत्त राजानें आठ दिवस पर्यंत अर्जुनाबरोबर टिकाव धरिला आणि संग्रामानें अर्जुन यत्किंचित्ही श्रमला नाहीं असें अवलोकन करून तो राजा हंसत हंसत त्याला ह्मणाला १० " हे महापराक्रमी कुरुवंशजनंदना, युद्धामध्यें शोभा पावणाऱ्या तुज इंद्रदत्त पांडुपुत्राचे ठिकाणीं वीर्य असणें योग्यच आहे ११. मी महेंद्राचा सखा असून संग्रामामध्यें त्याच्यापेक्षां कमी नाहीं; परंतु, बा अर्जुना, युद्धामध्यें तुझ्यासंमुख उभा राहण्यास मी शक्य नाहीं १२. करितां, हे पांडुपुत्रा, तुझा कोणता मनोरथ मी पूर्ण करूं तें सांग. हे महापराक्रमी वत्सा, तूं जें सांगशील तें मी करीन " १३. अर्जुन ह्मणतोः—धर्मवेत्ता, सत्यवादी, यज्ञयाग

युधिष्ठिरः । धर्मज्ञः सत्यसन्धश्च यज्वा विपुलदक्षिणः । तस्य पार्थिवता-मीप्से करस्तस्मै प्रदीयताम् १४ भवान्पितृसखा चैव प्रीयमाणो मयापि च । ततो नाज्ञापयामि त्वां प्रीतिपूर्वं प्रदीयताम् १५ भगदत्त उवाच ॥ कुन्तीमातर्यथा मे त्वं तथा राजा युधिष्ठिरः । सर्वमेतत्करिष्यामि किं चान्यत्करवाणि ते १६[१०३२]इति श्रीमहाभारतेशतसाहस्र्यां संहितायां० सभापर्वणि दिग्विजयपर्वण्यर्जुनदिग्विजये भगदत्तजये षड्विंशोध्यायः॥२६॥

वैशम्पायन उवाच॥ एवमुक्तः प्रत्युवाच भगदत्तं धनंजयः । अनेनैव कृतं सर्वं भविष्यत्यनुजानता १ तं विजित्य महाबाहुः कुन्तीपुत्रो धनंजयः। प्रययावुत्तरां तस्माद्दिशं धनदपालिताम् २ अन्तर्गिरिं च कौन्तेयस्तथैव च बहिर्गिरिम् । तथैवोपगिरिं चैव विजिग्ये पुरुषर्षभः ३ विजित्य पर्वतान्स-र्वान्ये च तत्र नराधिपाः । तान्वशे स्थापयित्वा स धनान्यादाय सर्वशः ४ तैरेव सहितः सर्वैरनुरज्य च तान्नृपान् । उलूकवासिनं राजन्बृहन्तमुपज-ग्मिवान् ५ मृदङ्गवरनादेन रथनेमिस्वनेन च । हस्तिनां च निनादेन कम्प-

---

करणारा आणि द्विजांना विपुल दक्षिणा देणारा असा जो कुरुश्रेष्ठ धर्मपुत्र युधिष्ठिर त्याला सार्वभौमत्व प्राप्त होण्याची माझी इच्छा आहे. करितां, त्याला आपण (मांडलिक या नात्यानें) कर देत जावा १४. आपण माझ्या पित्याचे मित्र असून माझ्या योगानेंही आनंदित होत आहांत. ह्यास्तव, मी आपणाला आज्ञा करीत नाहीं; आपण प्रेमपूर्वकच खंडणी द्यावी ह्मणजे झालें १५. भगदत्त ह्मणतोः---हे कुंतीपुत्रा, तूं व राजा युधिष्ठिर हे उभयतांही मला सारखेच आहांत. करितां, तुझ्या ह्मणण्याप्रमाणें हें सर्व कांहीं मी करीन. आणखीही मीं काय करावें तें सांग १६. ह्याप्रमाणें० सभापर्वांतील दिग्विजयपर्वांतर्गत अर्जुनदिग्विजयसंबंधीं भगदत्तजयाविषयीं सविसावा अध्याय समाप्त झाला ॥ २६ ॥

वैशंपायन सांगतातः---ह्याप्रमाणें भगदत्तानें ह्मटलें असतां" हें कर देण्याचें आपण कबूल केलें एवढ्यानें सर्व कांहीं आपण केल्यासारखें होणारच आहे (करितां, ह्याशिवाय आपणांला मला कांहीं सांगावयाचें नाहीं)" ह्मणून अर्जुनानें त्याला उत्तर दिलें १. ह्याप्रकारें त्या भगदत्ताला जिंकून तो महापराक्रमी कुंतीपुत्र धनंजय त्या प्राग्ज्योतिषदेशापासून कुबेररक्षित उत्तर दिशेकडे निघाला २. नंतर त्या पुरुषश्रेष्ठ कुंतीपुत्रानें अंतर्गिरि, बहिर्गिरि व उपगिरि हे जिंकिले ३ आणि त्याचप्रमाणें त्यानें तिकडील इतरही सर्व पर्वत जिंकून, तेथें जे भूपति वास करीत होते त्यांना पादाक्रांत करून आणि त्या सर्वांपासून(कर ह्या नात्यानें धन घेऊन पुनरपि (ज्याचें त्याचें राज्य ज्याला त्याला उपभोग घेण्यास देण्याच्या द्वारानें) त्यांना संतुष्ट केले आणि हे जनमेजय राजा त्यांच्यासहवर्तमान तो अर्जुन उत्कृष्ट

यन्वसुधामिमाम् ६ ततो बृहन्तस्त्वरितो बलेन चतुरङ्गिणा। निष्क्रम्य नगरात्तस्माद्योधयामास फाल्गुनम् ७ सुमहान्संनिपातो भूद्धनंजयबृहन्तयोः। न शशाक बृहन्तस्तु सोढुं पाण्डवविक्रमम् ८ सोविषह्यतमं मत्वा कौन्तेयं पर्वतेश्वरः। उपावर्तत दुर्धर्षो रत्नान्यादाय सर्वशः ९ स तद्राज्यमवस्थाप्य उलूकसहितो ययौ। सेनाबिन्दुमथो राजन्राज्यादाशु समाक्षिपत् १० मोदापुरं वामदेवं सुदामानं सुसंकुलम्। उलूकानुत्तरांश्चैव तांश्च राज्ञः समानयत् ११ तत्रस्थः पुरुषैरेव धर्मराजस्य शासनात्। किरीटी जितवान्राजन्देशान्पञ्चगणांस्ततः १२ स देवप्रस्थमासाद्य सेनाबिन्दोः पुरं प्रति। बलेन चतुरङ्गेण निवेशमकरोत्प्रभुः १३ स तैः परिवृतः सर्वैर्विष्वगश्वं नराधिपम्। अभ्यगच्छन्महातेजाः पौरवं पुरुषर्षभम् १४ विजित्य चाहवे शूरान्पार्वतीयान्महारथान्। जिगाय सेनया राजन्पुरं पौरवरक्षितम् १५ पौरवं युधि निर्जित्य दस्यून्पर्वतवासिनः। गणानु-

---

मृदंग, रथनेमि आणि गज ह्यांच्या नादानें ही पृथ्वी कंपित करीत करीत उलूकदेशनिवासी बृहंतराजाकडे गेला ४, ५, ६ असतां तो बृहंत राजा चतुरंग सैन्यासहवर्तमान आपल्या नगरांतून सत्वर बाहेर निघाला आणि अर्जुनाबरोबर त्यानें युद्धाला आरंभ केला ७. त्यावेळीं अर्जुन आणि बृहंत ह्यांचा फारच मोठा कडाक्याचा सामना झाला. परंतु, शेवटीं पांडुपुत्र अर्जुनाचा पराक्रम सहन करण्यास बृहंत जेव्हां समर्थ होईना ८ तेव्हां कुंतीपुत्राशीं सामना करणें आपणांला अत्यंत दुर्घट आहे असें जाणून इतरांना अजिंक्य असलेला तो पर्वताधिपति बृहंत राजा सर्व प्रकारचीं रत्नें (कर ह्मणून) बरोबर घेऊन अर्जुनाकडे आला ९. तदनंतर उलूकदेशाधिपतीचें राज्य त्याचेच ठिकाणीं ठेवून अर्जुन त्यासहवर्तमान सेनाबिंदूकडे गेला आणि, हे जनमेजयराजा, त्याला त्यानें राज्यापासून तेव्हांच पदच्युत केला १०. नंतर प्रजाजनांनीं भरलेला सुदामा देश, मोदापुर, वामदेव, व उत्तर उलूक देश जिंकून त्या देशांतील राजे त्यानें जमविले ११ आणि हे जनमेजय राजा, स्वतः तेथेंच राहून धर्मराजाच्या आज्ञेनें अर्जुनानें अपल्या सेवक पुरुषांच्या योगानेंच पंचगण देशांतील राजांचा पराजय केला १२. तदनंतर सेनाबिंदराजाच्या देवप्रस्थनामक नगराला जाऊन चतुरंगसैन्यासहवर्तमान समर्थ अर्जुनानें तेथें वास्तव्य केलें १३ आणि नंतर त्या सर्व राजांनीं परिवेष्टित असलेला तो महातेजस्वी अर्जुन, हे पुरुषश्रेष्ठा जनमेजया, पुरुकुलोत्पन्न विष्वगश्व राजाकडे गेला १४ व तेथील सर्व पर्वतनिवासी महारथ्यांचा समरांगणामध्यें पराजय करून, हे जनमेजय राजा, पुरुकुलोत्पन्न विष्वगश्व राजानें रक्षण केलेलें नगरही सैन्याच्या योगानें

त्सवसङ्केतानजयत्सप्त पाण्डवः १६ ततः काश्मीरकान्वीरान्क्षत्रियान्क्षत्रियर्षभः । व्यजयल्लोहितं चैव मण्डलैर्दशभिः सह १७ तत्त्रिगर्ताः कौन्तेयं दार्वाःकोकनदास्तथा । क्षत्रिया बहवो राजन्नुपावर्तन्त सर्वशः१८ अभिसारीं ततो रम्यां विजिग्ये कुरुनन्दनः । उरगावासिनं चैव रोचमानं रणेजयत् १९ ततः सिंहपुरं रम्यं चित्रायुधसुरक्षितम् । प्राधमद्बलमास्थाय पाकशासनिराहवे २० ततः सुह्मांश्च चोलांश्च किरीटी पाण्डवर्षभः। सहितः सर्वसैन्येन प्रामथत्कुरुनन्दनः २१ ततः परमविक्रान्तो बाह्लीकान्पाकशासनिः । महता परिमर्देन वशे चक्रे दुरासदान् २२ गृहीत्वा तु बलं सारं फाल्गुनः पाण्डुनन्दनः । दरदान्सह काम्बोजैरजयत्पाकशासनिः २३ प्रागुत्तरां दिशं ये च वसन्त्याश्रित्य दस्यवः । निवसन्ति वने ये च तान्सर्वानजयत्प्रभुः २४ लोहान्परमकाम्बोजानृषिकानुत्तरानपि । सहितांस्तान्महाराज व्यजयत्पाकशासनिः २५ ऋषिकेष्वपि संग्रामो बभूवातिभयंकरः ।

अर्जुनानें जिंकिलें १९. ह्याप्रमाणें युद्धामध्यें त्या पुरुकुलोत्पन्न राजाला जिंकून दस्युसंज्ञक पर्वतनिवासी सात प्रकारच्या लोकांचा त्यानें पराभव केला. ते अर्जुनानें जिंकिलेले दस्युसंज्ञक लोक टोळ्याटोळ्यांनीं रहात असतात आणि (शास्त्रविहित दांपत्यव्यवस्था त्यांच्यामध्यें नसून) मनांत इच्छा उत्पन्न झाल्यावर स्त्रीपुरुषांनीं एकत्र जुळण्याचा संकेत करून रतिसुखाचा उपभोग घेणें अशीच त्या लोकांमध्यें पद्धति आहे१६. असो. तदनंतर त्या क्षत्रियश्रेष्ठ अर्जुनानें काश्मीराकडील क्षत्रिय वीर आणि दहा मांडलिक राज्यांसहवर्तमान लोहितराजा ह्यांचा पराजय केल्यावर १७ त्रिगर्त, दार्व, कोकनद वगैरे ठिकाणचे पुष्कळ क्षत्रिय, हे जनमेजयराजा, सर्व बाजूनीं करभार घेऊन अर्जुनाकडे आले १८. नंतर त्या कुरुनंदनानें रमणीय अशी अभिसारनामक नगरी पादाक्रांत करून उरगावासी रोचमानाचाही संग्रामामध्यें पराजय केला १९. तदनंतर चित्रायुधानें संरक्षण केलेलें रमणीय सिंहपुर इंद्रपुत्र अर्जुनानें समरांगणामध्यें सामर्थ्य गाजवून उडवून दिलें २०. नंतर पांडुपुत्रांमध्यें श्रेष्ठ असलेल्या कुरुनंदन अर्जुनानें सर्व सैन्यासहवर्तमान जाऊन सुह्म व चोल हे देश जिंकिले २१. तदनंतर महापराक्रमी इंद्रपुत्र अर्जुनानें मोठी नासाडी करून जिंकण्यास दुर्घट असलेल्या बाल्हीक देशांतील राजांना पादाक्रांत केले २२ आणि नंतर निवडक सैन्य बरोबर घेऊन इंद्रदत्त पांडुनंदन अर्जुनानें कांबोजांसहवर्तमान दरदांचाही पराभव केला २३ व त्याचप्रमाणें ईशान्यदिशेचा आश्रय करून जे दस्युजातीय लोक रहात होते व तसेच जे वनामध्यें वास्तव्य करीत होते त्या सर्वांना प्रभु अर्जुनानें जिंकिले २४. हे महाराज जनमेजया, लोह, परमकांबोज

तारकामयसंकाशः परस्त्वृषिकपार्थयोः २६ स विजित्य ततो राजन्नृषिकान्रणमूर्धनि । शुकोदरसमांस्तत्र हयानष्टौ समानयत् २७ मयूरसदृशानन्यानुत्तरानपरानपि । जवनानाशुगांश्चैव करार्थं समुपानयत् २८ स विनिर्जित्य सङ्ग्रामे हिमवन्तं सनिष्कुटम् । श्वेतपर्वतमासाद्य न्यविशत्पुरुषर्षभः २९ [१०६१] इति श्रीमहाभारते शतसाहस्र्यां संहितायां० सभापर्वणि दिग्विजयपर्वणि फाल्गुनदिग्विजये नानादेशजये सप्तविंशोऽध्यायः ॥२७॥

वैशम्पायन उवाच ॥ स श्वेतपर्वतं वीरः समतिक्रम्य वीर्यवान् । देशं किंपुरुषावासं द्रुमपुत्रेण रक्षितम् १ महता संनिपातेन क्षत्रियान्तकरेण ह । अजयत्पाण्डवश्रेष्ठः करे चैनं न्यवेशयत् २ तं जित्वा हाटकं नाम देशं गुह्यकरक्षितम् । पाकशासनिरव्यग्रः सहसैन्यः समासदत् ३ तांस्तु सान्त्वेन निर्जित्य मानसं सर उत्तमम् । ऋषिकुल्यास्तथा सर्वा ददर्श कुरुनन्दनः ४ सरो मानसमासाद्य हाटकानभितः प्रभुः । गन्धर्वरक्षितं देशमजयत्पाण्डवस्ततः ५ तत्र तित्तिरिकुल्माषान्मण्डूकाख्यान्हयोत्तमान् । लेभे स कर-

---

व उत्तर ऋषिक ह्या एकत्र जमलेल्या सर्वांचा इंद्रपुत्र अर्जुनानें पराभव केल्यावर २९ ऋषिक देशामध्यें तेथील ऋषिकराजा आणि अर्जुन ह्या उभयतांत अतिच भयंकर असा तारकासुराच्या संग्रामासारखा (?) पराकाष्ठेचा संग्राम झाला २६. हे राजा, तदनंतर संग्रामामध्यें ऋषिकांचा पराभव करून शुकोदरसमान वर्णानें युक्त असलेले आठ अश्व त्यानें कराकरितां तेथून घेतले २७. नंतर इतरही आणखी उत्तर ऋषिक देशांतील राजांना पादाक्रांत करून त्यानें मयूरवर्णी व शीघ्रगामी अश्व कराकरितां बरोबर घेतले २८. तदनंतर निष्कुट आणि हिमालय ह्या पर्वतांवर राहणाऱ्या लोकांचा रणामध्यें पराभव करून तो पुरुषश्रेष्ठ अर्जुन श्वेतपर्वतावर जाऊन (कांहीं दिवस) राहिला २९. ह्याप्रमाणें महामुनिव्यासप्रणीत० सभापर्वांतील दिग्विजयपर्वांपैकीं अर्जुनदिग्विजयसंबंधीं नानाप्रकारचे देश जिंकण्याविषयीं सत्ताविसावा अध्याय समाप्त झाला॥२७॥

वैशंपायन सांगतातः—धवलगिरीचें उल्लंघन केल्यावर त्या पांडवश्रेष्ठ वीर अर्जुनानें क्षत्रियनाशक असें मोठें युद्ध करून द्रुमपुत्रानें रक्षिलेला किंपुरुषावासनामक देश जिंकिला आणि त्या द्रुमपुत्राला कर देणारा करून टाकिला १, २. ह्याप्रमाणें तो किंपुरुषावासनामक देश जिंकून सत्कर्मतत्पर इंद्रपुत्र अर्जुन सैन्यासहवर्तमान गुह्यकांनीं रक्षिलेल्या हाटकनामक देशाला गेला ३. तेथील अधिपतींना तर सामोपचारानेंच वश करून घेऊन त्या कुरुनंदनानें मानससरोवर आणि तेथें मुनींनीं काढिलेले कालवे हीं अवलोकन केलीं ४. हाटकदेशासमीप असलेल्या मानससरोवराला

मत्यन्तं गन्धर्वनगरात्तदा ६ उत्तरं हरिवर्षं तु स समासाद्य पाण्डवः। इयेष जेतुं तं देशं पाकशासननन्दनः ७ तत एनं महावीर्या महाकाया महाबलाः। द्वारपालाः समासाद्य हृष्टा वचनमब्रुवन् ८ पार्थ नेदं त्वया शक्यं पुरं जेतुं कथंचन। उपावर्तस्व कल्याण पर्याप्तमिदमच्युत ९ इदं पुरं यः प्रविशेद्ध्रुवं न स भवेन्नरः। प्रीयामहे त्वया वीर पर्याप्तो विजयस्तव १० न चात्र किंचिज्जेतव्यमर्जुनात्र प्रदृश्यते। उत्तराः कुरवो ह्येते नात्र युद्धं प्रवर्तते ११ प्रविष्टोपि हि कौन्तेय नेह द्रक्ष्यसि किंचन। न हि मानुषदेहेन शक्यमत्राभिवीक्षितुम् १२ अथेह पुरुषव्याघ्र किंचिदन्यच्चिकीर्षसि। तत्प्रब्रूहि करिष्यामो वचनात्तव भारत १३ ततस्तानब्रवीद्राजन्नर्जुनः प्रहसन्निव। पार्थिवत्वं चिकीर्षामि धर्मराजस्य धीमतः १४ न प्रवेक्ष्यामि वो देशं विरुद्धं यदि मानुषैः। युधिष्ठिराय यत्किंचित्करपण्यं प्रदी-

---

गेल्यानंतर तेथील गंधर्वरक्षित प्रदेशही पांडुपुत्रानें जिंकिला ९ आणि त्या गंधर्वनगरांतून त्याला तित्तिरिकल्माष व मंडूक एतत्संज्ञक अश्वांच्या रूपानें अतिशयच कर मिळाला ६. पुढें उत्तर हरिवर्षाला गेल्यावर तोही देश जिंकण्याचें इंद्रदत्त पांडुपुत्र अर्जुनाच्या मनांत आलें ७. परंतु, त्या देशाच्या राजधानीसमीप पोंचल्याबरोबर धिप्पाड आणि महाबलाढ्य असे तेथील द्वारपाल आनंदित होऊन आले आणि त्या महावीर्यवान् अर्जुनाला ह्मणाले ८ " हे कुंतीपुत्रा, हें नगर जिंकणें तुला कोणत्याही प्रकारें शक्य नाहीं. तर हे कल्याणा, तूं आपला येथून परत फीर कसा. हे अच्युता, तु (ह्मा पराभव करण्या) ला हें नगर समर्थ आहे ९. ह्या नगरामध्यें जो मनुष्य प्रविष्ट होईल तो निःसंशय नाहींसा होईल. हे वीरा, तुझ्यामुळें आह्मांला आनंद होत आहे. ह्यास्तव, (स्वतःचा घात करून न घेतां तूं आपला परत फीर) तुझा उत्तर दिग्विजय आतां पुरे १०. हे अर्जुना, ह्या ठिकाणीं जिंकण्यासारखें कांहीं दिसत नाहीं. हा उत्तर कुरुदेश आहे व ह्या प्रदेशांत युद्ध होत नाहीं ११. शिवाय, येथें तूं जरी प्रविष्ट झालास तरी तुला ह्या ठिकाणीं कांहींएक आढळण्यांत येणार नाहीं. कारण, मनुष्यदेहानें येथें कांहींच दृष्टीस पडणें शक्य नाहीं १२. आतां, हे पुरुषश्रेष्ठा, ह्या प्रदेशांत प्रविष्ट होण्यावांचून दुसरें जर तुझें कांहीं कार्य असेल तर आह्मांला सांग. ह्मणजे हे भरतकुलोत्पन्ना, तुझ्या सांगण्यावरून आह्मी तें करूं " १३. ह्यावर, हे जनमेजयराजा, अर्जुन हंसत हंसत त्यांना ह्मणाला " विवेकी धर्मराजाला सार्वभौमत्व प्राप्त व्हावें अशी माझी इच्छा आहे १४. तेव्हां मनुष्यांना विरुद्ध असलेल्या तुमच्या देशांत जर मला प्रवेश करितां येणें शक्य

यताम् १५ ततो दिव्यानि वस्त्राणि दिव्यान्याभरणानि च । क्षौमाजिनानि दिव्यानि तस्य ते प्रददुः करम् १६ एवं स पुरुषव्याघ्रो विजित्य दिशमुत्तराम् । संग्रामान्सुबहून्कृत्वा क्षत्रियैर्दस्युभिस्तथा १७ स विनिर्जित्य राज्ञस्तान्करे च विनिवेश्य तु । धनान्यादाय सर्वेभ्यो रत्नानि विविधानि च १८ हयांस्तित्तिरिकुल्माषाञ्शुकपत्रनिभानपि । मयूरसदृशान्यान्सर्वाननिलरंहसः १९ वृतः सुमहता राजन्बलेन चतुरङ्गिणा । आजगाम पुनर्वीरः शक्रप्रस्थं पुरोत्तमम् २० धर्मराजाय तत्पार्थो धनं सर्वं सवाहनम् । न्यवेदयदनुज्ञातस्तेन राज्ञा गृहान्ययौ २१ [१०८२] इति० सभापर्वणि दिग्विजयपर्वण्यर्जुनोत्तरदिग्विजयेष्टाविंशोध्यायः॥ २८ ॥

वैशम्पायन उवाच ॥ एतस्मिन्नेव काले तु भीमसेनोपि वीर्यवान् । धर्मराजमनुज्ञाप्य ययौ प्राचीं दिशं प्रति १ महता बलचक्रेण परराष्ट्रावमर्दिना । हस्त्यश्वरथपूर्णेन दंशितेन प्रतापवान् २ वृतो भरतशार्दूलो द्विषच्छोकविवर्धनः । स गत्वा नरशार्दूलः पञ्चालानां पुरं महत् ३ पञ्चालान्विविधोपायैः सान्त्वयामास पाण्डवः । ततः स गण्डकाञ्शूरो विदे-

---

नसेल तर कराकरितां कांहीं तरी माल तुह्मीं द्यावा " १५. अर्जुनानें असें सांगितल्यानंतर दिव्य वस्त्रें, दिव्य भूषणें, दिव्य अजिनें व इतरही दिव्य अशीं रेशमी वस्त्रें त्यांनीं कर ह्मणून त्याला दिलीं १६. ह्याप्रमाणें पुरुषश्रेष्ठ अर्जुनानें क्षत्रिय व दस्यु ह्यांबरोबर पुष्कळच संग्राम करून उत्तर दिशा जिंकिली १७. त्या दिशेंतील राजांना जिंकून त्यांना त्यानें करभार देणारे करून ठेविले आणि त्या सर्वांपासून नानाप्रकारचीं रत्नें व धनें घेऊन १८ शुकपक्षाप्रमाणें कांतिमान् असलेले असे तित्तिरिकल्माषसंज्ञक आणि मयूरपक्ष्यासारखे कांतिमान् असलेले इतरही अश्व त्यानें घेतले. ते सर्वही अश्व वायूप्रमाणें वेगवान् होते १९. हे जनमेजयराजा, नंतर फारच प्रचंड असलेल्या चतुरंग सैन्यानें परिवेष्टित होऊन तो वीर अर्जुन पुनरपि आपल्या इंद्रप्रस्थनामक श्रेष्ठ नगराप्रत परत आला २० आणि वाहनांसहवर्तमान तें सर्व धन धर्मराजाला अर्पण करून त्यानें अनुज्ञा दिल्यावर तो कुंतीपुत्र अर्जुन आपल्या वसतिगृहीं गेला २१. ह्याप्रमाणें० सभापर्वांतील दिग्विजयपर्वांपैकीं अर्जुनाच्या उत्तरदिग्विजयाविषयीं अठ्ठाविसावा अध्याय समाप्त झाला ॥२८॥

वैशंपायन सांगतातः— ह्याचवेळीं वीर्यवान् भीमसेनही धर्मराजाची अनुज्ञा घेऊन पूर्वदिशेस गेला होता १. गज, अश्व व रथ ह्यांनीं परिपूर्ण असून कवचयुक्त असलेल्या अशा परराष्ट्रनाशक प्रचंड सेनासमूहानें परिवेष्टित होऊन शत्रुशोक वृद्धिंगत करणारा तो भरतवंशोत्तम पुरुषश्रेष्ठ प्रतापी भीमसेन प्रथम पंचालांच्या विस्तीर्ण नगरा-

हान्भरतर्षभः ४ विजित्याल्पेन कालेन दाशार्णानिजयत्प्रभुः ५ तत्र दाशार्णको राजा सुधर्मा लोमहर्षणम् । कृतवान्भीमसेनेन महद्युद्धं निरायुधम् ६ भीमसेनस्तु तद्दृष्ट्वा तस्य कर्म महात्मनः । अधिसेनापतिं चक्रे सुधर्माणं महाबलम् ७ ततः प्राचीं दिशं भीमो ययौ भीमपराक्रमः । सैन्येन महता राजन्कम्पयन्निव मेदिनीम् ८ सोश्वमेधेश्वरं राजन्रोचमानं महानुगम् । जिगाय समरे वीरो बलेन बलिनां वरः ९ स तं निर्जित्य कौन्तेयो नातितीव्रेण कर्मणा । पूर्वदेशं महावीर्यो विजिग्ये कुरुनन्दनः १० ततो दक्षिणमागम्य पुलिन्दनगरं महत् । सुकुमारं वशे चक्रे सुमित्रं च नराधिपम् ११ ततस्तु धर्मराजस्य शासनाद्भरतर्षभः । शिशुपालं महावीर्यमभ्यगाज्जनमेजय १२ चेदिराजोपि तच्छ्रुत्वा पाण्डवस्य चिकीर्षितम् । उपनिष्क्रम्य नगरात्प्रत्यगृह्णात्परंतपः १३ तौ समेत्य महाराज कुरुचेदिवृषौ तदा । उभयोरात्मकुलयोः कौशल्यं पर्यपृच्छताम् १४ ततो निवेद्य तद्राष्ट्रं

मध्यें गेला २, ३ आणि नानाप्रकारचे उपाय योजून सौम्य मार्गानेंच त्यांना वश केल्यावर त्या भरतवंशनश्रेष्ठ शूर व समर्थ पांडुपुत्र भीमसेनानें थोडक्याच वेळामध्यें गंडक व विदेह ह्यांना जिंकून दशार्ण देश पादाक्रांत केला ४,५. त्या दशार्ण देशांतील सुधर्मसंज्ञक राजानें आयुधावांचून भीमसेनाबरोबर अंगावर कांटा येण्यासारखें मोठें (बाहु–) युद्ध केलें ६. तेव्हां त्या महात्म्याचें तें कर्म भीमसेनाच्या अवलोकनांत आलें असल्यामुळें (त्याचा पराभव केल्यानंतर) भीमसेनानें त्या महाबलाढ्य सुधर्म्याला आपला सेनाधिपति केला ७. तदनंतर, हे जनमेजयराजा, असंख्य सैन्याच्या योगानें भूमि कंपित करीत करीत तो भयंकर पराक्रम करणारा भीमसेन थेट पूर्वदिशेकडे गेला ८ आणि हे भूपते, बलवानांमध्यें श्रेष्ठ असलेल्या त्या भीमसेनानें अनुयायांसहवर्तमान अश्वमेधाधिपति रोचमानराजाचा समरांगणामध्यें स्वसामर्थ्यानें पराभव केला ९ व ह्याप्रमाणें त्याला जिंकिल्यानंतर ह्मणण्यासारखा पराक्रम केल्यावांचूनच त्या महावीर्यवान् कुरुनंदन कुंतीपुत्रानें पूर्वदेश पादाक्रांत केला १०. तदनंतर दक्षिणेस वळून तो विस्तीर्ण असलेल्या पुलिंदनगराप्रत गेला आणि तेथील सुमित्रनामक सुकुमार राजाला आज्ञांकित केल्यावर ११ धर्मराजाच्या आज्ञेवरून, हे जनमेजया, तो भरतवंशजश्रेष्ठ भीमसेन महावीर्यवान् शिशुपालाकडे चालता झाला १२. तेव्हां हे शत्रुतापना, पांडुपुत्र भीमसेनाचा मनोदय जाणून चेदिदेशाधिपति शिशुपालानें आपल्या नगराबाहेर येऊन त्याचें स्वागत केलें १३. तदनंतर हे महाराजा, कुरुश्रेष्ठ भीमसेन आणि चेदिश्रेष्ठ शिशुपाल ह्यांनीं आपआपल्या कुलांतील लोकांविषयीं कुशलप्रश्न केले १४. तदनंतर,

चेदिराजो विशांपते। उवाच भीमं प्रहसन्किमिदं कुरुषेनघ १५ तस्य भीमस्तदाचख्यौ धर्मराजचिकीर्षितम्। स च तं प्रतिगृह्यैव तथा चक्रे नराधिपः १६ ततो भीमस्तत्र राजन्नुषित्वा त्रिदश क्षपाः। सत्कृतः शिशुपालेन ययौ सबलवाहनः १७ [१०९९] इति श्रीमहाभारते०वैयासिक्यां सभापर्वणि दिग्विजयपर्वणि भीमदिग्विजय ऊनत्रिंशोध्यायः ॥ २९ ॥

वैशम्पायन उवाच ॥ ततः कुमारविषये श्रेणिमन्तमथाजयत्। कोसलाधिपतिं चैव बृहद्बलमरिंदमः १ अयोध्यायां तु धर्मज्ञं दीर्घयज्ञं महाबलम्। अजयत्पाण्डवश्रेष्ठो नातितीव्रेण कर्मणा २ ततो गोपालकक्षं च सोत्तरानपि कोसलान्। मल्लानामधिपं चैव पार्थिवं चाजयत्प्रभुः ३ ततो हिमवतः पार्श्वं समभ्येत्य जलोद्भवम्। सर्वमल्पेन कालेन देशं चक्रे वशं बली ४ एवं बहुविधान्देशान्विजिग्ये भरतर्षभः। भल्लाटमभितो जिग्ये शुक्तिमन्तं च पर्वतम् ५ पाण्डवः सुमहावीर्यो बलेन बलिनां वरः। स

हे प्रजाधिपते जनमेजया, चेदिराज शिशुपालानें "हें राज्य तुझेंच आहे" असें भीमसेनाला सांगितल्यावर "हे निष्पापा, तूं हें काय करीत आहेस?" ह्मणून त्याला त्यानें हंसत हंसत विचारिलें १५. तेव्हां भीमसेनानें त्याला धर्मराजाचा मनोरथ कथन करितांक्षणीं तो शिरसा मान्य करून त्या चेदिदेशाधिपति शिशुपालानें त्याप्रमाणें केलें (ह्मणजे धर्मराजाला कर दिला) १६. असो. हे राजा, (त्यानें कर दिल्या) नंतर भीमसेन त्या ठिकाणीं एक मासपर्यंत राहिला आणि शिशुपालानें सत्कार केल्यावर सैन्य व वाहनें ह्यांसहवर्तमान तो तेथून चालता झाला १७. ह्याप्रमाणें०सभापर्वांतील दिग्विजयपर्वांपैकीं भीमसेनाच्या दिग्विजयाविषयीं एकोणतिसावा अध्याय समाप्त झाला ॥ २९ ॥

वैशंपायन सांगतातः—नंतर शत्रूंना जेरीस आणणाऱ्या भीमसेनानें कुमारदेशामध्यें जाऊन श्रेणिमान् राजाचा पराजय केला आणि त्याचप्रमाणें कोसलदेशाधिपति बृहद्बलराजालाही त्यानें जिंकिला १. तदनंतर त्या पांडवश्रेष्ठ भीमसेनानें विशेष मोठा पराक्रम केल्यावांचूनच अयोध्येमध्यें जाऊन तेथील धर्मज्ञ व महाबलाढ्य अशा दीर्घयज्ञनामक राजाचा पराभव केला २ नंतर गोपालकक्ष, उत्तर कोसल आणि मल्ल या देशांचे अधिपति असलेल्या राजांचा पराजय करून तो समर्थ भीमसेन ३ हिमालयासमीप असलेल्या जलोद्भव देशामध्यें गेला आणि थोड्याच वेळांत त्या बलाढ्य भीमसेनानें तो सर्व देश आपल्या स्वाधीन केला४. ह्याप्रमाणें नानाप्रकारचे देश त्या भरतवंशजश्रेष्ठ भीमसेनानें जिंकून भल्लाट आणि शुक्तिमान् पर्वत हेही सर्व बाजूंनीं त्यानें जिंकिले ५. नंतर त्या अत्यंत वीर्यवान, बलवानांमध्यें श्रेष्ठ, महाबाहु आणि भयंकर

काशिराजं समरे सुबाहुमनिवर्तिनम् ६ वशे चक्रे महाबाहुर्भीमो भीमपराक्रमः । ततः सुपार्श्वमभितस्तथा राजपतिं क्रथम् ७ युध्यमानं बलात्समङ्के विजिग्ये पाण्डवर्षभः । ततो मत्स्यान्महातेजा मलदांश्च महाबलान्८ अनघानभयांश्चैव पशुभूमिं च सर्वशः । निवृत्य च महाबाहुर्मदधारं महीधरम् ९ सोमधेयांश्च निर्जित्य प्रययावुत्तरामुखः । वत्सभूमिं च कौन्तेयो विजिग्ये बलवान्बलात् १० भर्गाणामधिपं चैव निषादाधिपतिं तथा । विजिग्ये भूमिपालांश्च मणिमत्प्रमुखान्बहून् ११ ततो दक्षिणमल्लांश्च भोगवन्तं च पर्वतम् । तरसैवाजयद्भीमो नातितीव्रेण कर्मणा १२ शर्मकान्वर्मकांश्चैव व्यजयत्सान्त्वपूर्वकम् । वैदेहकं च राजानं जनकं जगतीपतिम् १३ विजिग्ये पुरुषव्याघ्रो नातितीव्रेण कर्मणा । शकांश्च बर्बरांश्चैव अजयच्छद्मपूर्वकम् १४ वैदेहस्थस्तु कौन्तेय इन्द्रपर्वतमन्तिकात् । किरातानामधिपतीनजयत्सप्त पाण्डवः १५ ततः सुह्मान्प्रसुह्मांश्च स्वपक्षानपि वीर्यवान् । विजित्य युधि कौन्तेयो मागधानभ्यधाद्बली १६ दण्डं च दण्डधारं च

पराक्रम करणाऱ्या पांडुपुत्र भीमसेनानें युद्धापासून कधींही परावृत्त न होणाऱ्या महापराक्रमी काशिराजाला समरांगणामध्यें स्वतःच्या सामर्थ्यानें जिंकिला व नंतर सुपार्श्वप्रदेश सर्व बाजूंनीं पादाक्रांत करून युद्धास आलेल्या राजाधिराज क्रथाचाही त्या पांडवश्रेष्ठ भीमसेनानें समरांगणामध्यें पराभव केला. तदनंतर महाबलाढ्य मत्स्य, मलद, अनघ, अभय आणि पशुभूमि यांचा सर्वस्वीं पराभव करून तो महातेजस्वी व महापराक्रमी भीमसेन मदधार पर्वताकडे परत येऊन ६,७,८,९ व सोमधेय पराभूत करून उत्तरेकडे चालता झाला आणि त्या बलाढ्य कुंतीपुत्र भीमसेनानें स्वसामर्थ्यानें वत्सभूमिही जिंकिली १०. त्याचप्रमाणें भर्गाधिपति, निषादाधिपति आणि मणिमान् वगैरे इतरही पुष्कल भूपाल पराजित करून ११ त्या भीमसेनानें सामान्य पराक्रमाच्याच योगानें केवळ स्वसामर्थ्याच्याच जोरावर दक्षिण मल्लदेश आणि भोगवान् पर्वत हे जिंकिले १२. नंतर शर्मक आणि वर्मक ह्यांना तर सामोपचारानेंच हस्तगत करून घेऊन जगत्पति विदेहदेशाधीश जनकराजाचाही १३ त्या पुरुषश्रेष्ठ भीमसेनानें सहज पराभव केला आणि नंतर शक व बर्बर ह्यांना त्यानें कपटानें जिंकिले १४. नंतर कुंतीचे ठिकाणीं झालेल्या त्या पांडुपुत्र भीमसेनानें विदेहदेशामध्यें असतांनाच (सैन्य पाठवून) इंद्रपर्वतासमीप असलेल्या सातही किरताधिपतींचा पराभव केला १५. तदनंतर अनुयायांसहवर्तमान सुह्म व प्रसुह्म ह्या देशांतील अधिपतींना युद्धामध्यें जिंकून त्या बलाढ्य भीमसेनानें मागधराजाकडे कराचें मागणें केलें १६. नंतर दंड, दंडधार व तिकडील

विजित्य पृथिवीपतीन् । तैरेव सहितः सर्वैर्गिरिव्रजमुपाद्रवत् १७ जारासन्धिं सान्त्वयित्वा करे च विनिवेश्य ह । तैरेव सहितैः सर्वैःकर्णमभ्यद्रवद्बली १८ स कम्पयन्निव महीं बलेन चतुरङ्गिणा । युयुधे पाण्डवश्रेष्ठः कर्णेनामित्रघातिना १९ स कर्णं युधि निर्जित्य वशे कृत्वा च भारत । ततो विजिग्ये बलवान्राज्ञः पर्वतवासिनः २० अथ मोदागिरौ चैव राजानं बलवत्तरम् । पाण्डवो बाहुवीर्येण निजघान महामृधे २१ ततः पुण्ड्राधिपं वीरं वासुदेवं महाबलम् । कौशिकीकच्छनिलयं राजानं च महौजसम् २२ उभौ बलभृतौ वीरावुभौ तीव्रपराक्रमौ । निर्जित्याजौ महाराज वङ्गराजमुपाद्रवत् २३ समुद्रसेनं निर्जित्य चन्द्रसेनं च पार्थिवम् । ताम्रलिप्तं च राजानं कर्वटाधिपतिं तथा २४ सुह्मानामधिपं चैव ये च सागरवासिनः । सर्वान्म्लेच्छगणांश्चैव विजिग्ये भरतर्षभ २५ एवं बहुविधान्देशान्विजित्य पवनात्मजः । वसु तेभ्य उपादाय लौहित्यमगमद्बली २६ स सर्वान्म्लेच्छनृपतीन्सागरानूपवासिनः । करमाहारयामास

इतरही भूपति ह्यांना जिंकून त्यांच्यासहवर्तमान तो गिरिव्रजसंज्ञक नगराकडे गेला १७ आणि तेथें असलेल्या जरासंधाच्या पुत्राचें सांत्वन करून व त्याला खंडणी देणारा करून एकत्र जमलेल्या सर्व राजांसहवर्तमान तो बलाढ्य भीमसेन कर्णाकडे चालता झाला १८. पृथ्वी कंपितच करीत आहे कीं काय अशारीतीनें आपल्या चतुरंगसेनेसहवर्तमान त्या पांडवश्रेष्ठ भीमसेनानें शत्रुघातक कर्णाशीं युद्ध केलें १९ व शेवटीं, हे भरतकुलोत्पन्ना जनमेजया, कर्णाला युद्धामध्यें जिंकून त्याला आपल्या अगदीं मुठींत आणून ठेविल्यानंतर त्या बलाढ्य भीमसेनानें तिकडील पर्वतनिवासी राजे जिंकिले २०. तदनंतर मोदागिरीवर असलेल्या महाबलाढ्य राजाचा मोठ्या संग्रामामध्यें पांडुपुत्र भीमसेनानें आपल्या बाहुवीर्यानें वध केला २१. नंतर महाबलाढ्य व वीर असा वासुदेवनामक पुंड्रदेशाधिपति आणि कौशिकी नदीचे तीरीं वास्तव्य करीत असलेला महासामर्थ्यवान् भूपति २२ हे उभयतां बलाढ्य व वीर असून उभयतां प्रचंड पराक्रमी असतांनाही त्यांचा समरांगणामध्यें पराजय करून, हे महाराज जनमेजया, त्या भीमसेनाने वंगदेशच्या राजावर स्वारी केली २३. नंतर राजा समुद्रसेन, चंद्रसेन व ताम्रलिप्त आणि कर्वटदेशाधिपति ह्यांचा पराभव करून २४ आणि त्याचप्रमाणें सुह्मदेशाधिपतीलाही जिंकून त्या भरतवंशजश्रेष्ठ भीमसेनानें समुद्रनिवासी सर्व म्लेच्छगणांचा पराभव केला २५. ह्याप्रमाणें नानाप्रकारचे देश जिंकून व त्यांच्यापासून द्रव्य घेऊन तो बलाढ्य वायुपुत्र लौहित्यदेशाला गेला २६ आणि समुद्रसंनिध

रत्नानि विविधानि च २७ चन्दनागुरुवस्त्राणि मणिमौक्तिककम्बलम् । काञ्चनं रजतं चैव विद्रुमं च महाधनम् २८ ते कोटिशतसङ्ख्येन कौन्तेयं महता तदा । अभ्यवर्षन्महात्मानं धनवर्षेण पाण्डवम् २९ इन्द्रप्रस्थमुपागम्य भीमो भीमपराक्रमः । निवेदयामास तदा धर्मराजाय तद्धनम् ३०[११२९] इति०सभापर्वणि दिग्विजयपर्वणि भीमदिग्विजये त्रिंशोध्यायः ॥ ३० ॥

वैशम्पायन उवाच ॥ तथैव सहदेवोपि धर्मराजेन पूजितः । महत्या सेनया राजन्प्रययौ दक्षिणां दिशम् १ स शूरसेनान्कार्त्स्न्येन पूर्वमेवाजयत्प्रभुः । मत्स्यराजं च कौरव्यो वशे चक्रे बलाद्बली २ अधिराजाधिपं चैव दन्तवक्त्रं महाबलम् । जिगाय करदं चैव कृत्वा राज्ये न्यवेशयत् ३ सुकुमारं वशे चक्रे सुमित्रं च नराधिपम् । तथैवापरमत्स्यांश्च व्यजयत्स पटच्चरान् ४ निषादभूमिं गोशृङ्गं पर्वतप्रवरं तथा । तरसैवाजयद्धीमाञ्छ्रेणिमन्तं च पार्थिवम् ५ नरराष्ट्रं च निर्जित्य कुन्तीभोजमुपाद्रवत् । प्रीतिपूर्वं च तस्यासौ प्रतिजग्राह शासनम् ६ ततश्चर्मण्वतीकूले जम्भकस्या-

---

असलेल्या अनूपप्रदेशावर वास्तव्य करणाऱ्या सर्व म्लेच्छ राजांपासून त्यानें चंदन, अगुरु, वस्त्रें, हिरे, मोत्यें, लोंकरीचीं वस्त्रें, सुवर्ण, रौप्य व मोठमोठीं मूल्यवान् पोंवळीं अशीं नानाप्रकारचीं रत्नें करादाखल घेतलीं २७,२८. सारांश, त्या म्लेच्छ राजांनीं शेंकडों कोट धनाचा महात्म्या कुंतीनंदन पांडुपुत्र भीमसेनावर मोठा पाऊसच पाडिला २९. असो. (ह्याप्रमाणें पूर्वदिशा जिंकिल्यानंतर तो) भयंकर पराक्रम करणारा भीमसेन इंद्रप्रस्थनगराप्रत परत आला आणि बरोबर आणिलेलें तें सर्व धन त्यानें धर्मराजाला अर्पण केलें३०. ह्याप्रमाणें महामुनिव्यासप्रणीतलक्षग्रंथात्मक श्रीमहाभारतांतर्गत सभापर्वांतील दिग्विजयपर्वांपैकीं भीमसेनाच्या दिग्विजयाविषयीं तिसावा अध्याय समाप्त झाला॥३०॥

वैशंपायन सांगतातः—हे जनमेजय राजा, त्याचप्रमाणें धर्मराजानें प्रशंसा केल्यावर सहदेवही मोठ्या सेनेसहवर्तमान दक्षिणदिशेकडे गेला १. त्या समर्थ व बलाढ्य कुरुवंशजानें प्रथमतःच पूर्णपणें शूरसेन देश जिंकून मत्स्यराजाचा पराभव केला २. नंतर राजाधिराज महाबलाढ्य दंतवक्त्राचा पराभव करून त्याला कर देणारा करून सोडिल्यावर पुनरपि सहदेवानें त्याला राज्यावर बसविला ३. नंतर सुकुमार सुमित्रराजा, पश्चिम मत्स्यदेश, चोरप्रदेश ४, निषादभूमि, गोश्रृंगनामक श्रेष्ठ पर्वत आणि श्रेणिमान् राजा ह्या सर्वांचा स्वसामर्थ्यानेंच पराभव करून आणि नरराष्ट्र जिंकून तो बुद्धिमान् सहदेव कुंतीभोजराजाकडे गेला असतां त्या राजानें त्या सहदेवाची आज्ञा प्रेमपूर्वक मान्यच केली. ५, ६. नंतर चर्मण्वतीनदीचे तीरीं पूर्ववैरी वासुदेवानें अवशिष्ट

त्मजं नृपम् । ददर्श वासुदेवेन शेषितं पूर्ववैरिणा ७ चक्रे तेन स सङ्ग्रामं सहदेवेन भारत । स तमाजौ विनिर्जित्य दक्षिणाभिमुखो ययौ ८ सेकानपरसेकांश्च व्यजयत्सुमहाबलः । करं तेभ्य उपादाय रत्नानि विविधानि च ॥ ततस्तेनैव सहितो नर्मदामभितो ययौ ९ विन्दानुविन्दावावन्त्यौ सैन्येन महता वृतौ । जिगाय समरे वीरावाश्विनेयः प्रतापवान् १० ततो रत्नान्युपादाय पुरं भोजकटं ययौ । तत्र युद्धमभूद्राजन्दिवसद्वयमच्युतम् ११ स विजित्य दुराधर्षं भीष्मकं माद्रिनन्दनः । कोसलाधिपतिं चैव तथा वेण्यातटाधिपम् १२ कान्तारकांश्च समरे तथा प्राक्कोशलान्नृपान् । नाटकेयांश्च समरे तथा हेरम्बकान्युधि १३ मारुधं च विनिर्जित्य रम्यग्राममथो बलात् । नीचानानर्बुकांश्चैव राज्ञश्चैव महाबलः १४ तांस्तानाटविकान्सर्वानजयत्पाण्डुनन्दनः । वाताधिपं च नृपतिं वशे चक्रे महाबलः १५ पुलिन्दांश्च रणे जित्वा ययौ दक्षिणतः पुनः । युयुधे पाण्ड्यराजेन दिवसं नकुलानुजः १६ तं जित्वा स महाबाहुः प्रययौ दक्षिणापथम् ।

ठेविलेला जो जंभकपुत्र राजा होता त्याची गांठ पडल्यावर ७, हे भरतकुलोत्पन्ना जनमेजया, त्या राजानें सहदेवाशीं संग्राम केला. परंतु, त्याला समरांगणामध्यें जिंकून तो सहदेव दक्षिणेकडे चालता झाला ८. नंतर त्या अत्यंत बलाढ्य सहदेवानें सेक व पश्चिम सेक ह्यांचा पराजय करून व त्यांच्यापासून करादाखल नानाप्रकारचीं रत्नें घेऊन त्यांच्यासहवर्तमान नर्मदेकडे प्रयाण केलें ९. पुढें प्रचंड सैन्यानें युक्त असलेले जे अवंतीदेशाधिपति वीर विंद आणि अनुविंद ह्यांचा समरांगणामध्यें पराजय करून तो प्रतापी अश्विनीकुमारपुत्र १० त्यांच्यापासून रत्नें घेऊन भोजकटनामक नगरामध्यें गेला असतां, हे जनमेजय राजा, त्या ठिकाणीं त्याचें एकसारखें दोन दिवस युद्ध झालें ११. असो. त्या माद्रीपुत्र सहदेवानें जिंकण्यास अशक्य असलेल्या भीष्मक राजाचा पराजय करून कोशलदेशाधिपति आणि वेण्यातटाधिपति हे राजेही जिंकिले १२. त्याचप्रमाणें समरांगणामध्यें कांतारक व पूर्वकोसल ह्या देशांतील राजांचा पराभव करून नाटकेय आणि हेरंबक हेही त्यानें युद्धामध्यें पादाक्रांत केले १३. ह्यावर त्या महाबलाढ्य सहदेवानें मारुध व रम्यग्राम आणि नीच व आनर्बुक ह्या देशांतील राजे ह्यांचा स्वसामर्थ्यानें पराजय करून १४ ठिकठिकाणच्या सर्व वनाधिपतींचाही त्या पांडुपुत्रानें पराभव केला आणि त्या महाबलाढ्य सहदेवानें वाताधिपराजालाही आपल्या मुठींत आणून ठेविला १५. नंतर संग्रामामध्यें पुलिंदांचा पराभव करून तो पुनरपि दक्षिणेकडे गेला असतां पांड्यराजाशीं त्या सहदेवाचें

गुहामासादयामास किष्किन्धां लोकविश्रुताम् १७ तत्र वानरराजाभ्यां मैन्देन द्विविदेन च । युयुधे दिवसान्सप्त न च तौ विक्रतिं गतौ १८ ततस्तुष्टौ महात्मानौ सहदेवाय वानरौ । ऊचतुश्चैव संहृष्टौ प्रीतिपूर्वमिदं वचः १९ गच्छ पाण्डवशार्दूल रत्नान्यादाय सर्वशः । अविघ्नमस्तु कार्याय धर्मराजाय धीमते २० ततो रत्नान्युपादाय पुरीं माहिष्मतीं ययौ । तत्र नीलेन राज्ञा स चक्रे युद्धं नरर्षभः २१ पाण्डवः परवीरघ्नः सहदेवः प्रतापवान् । ततोस्य सुमहद्युद्धमासीद्भीरुभयंकरम् २२ सैन्यक्षयकरं चैव प्राणानां संशयावहम् । चक्रे तस्य हि साहाय्यं भगवान्हव्यवाहनः २३ ततो रथा हया नागाः पुरुषाः कवचानि च । प्रदीप्तानि व्यदृश्यन्त सहदेवबले तदा २४ ततः सुसंभ्रान्तमना बभूव कुरुनन्दनः । नोत्तरं प्रतिवक्तुं च शक्तोभूज्जनमेजय २५ जनमेजय उवाच ॥ किमर्थं भगवान्वह्निः प्रत्यमित्रोभवद्युधि । सहदेवस्य यज्ञार्थं घटमानस्य वै द्विज २६ वैशम्पायन उवाच ॥ तत्र माहिष्मतीवासी भगवान्हव्यवाहनः । श्रूयते हि गृहीतो वै पुरस्तात्पारदा-

---

एक दिवसपर्यंत युद्ध झालें १६. शेवटीं तो महापराक्रमी सहदेव त्याचा पराभव करून दक्षिण देशाकडे चालता झाला आणि जगद्विख्यात किष्किंधानामक गुहेसमीप आला १७. तेव्हां मैंद आणि द्विविद ह्या वानराधिपतींशीं त्याचें सात दिवस युद्ध झालें; तथापि त्यांना कांहींएक विकार झाला नाहीं १८. शेवटीं ते महात्मे वानर संतुष्ट झाले आणि आनंदित होऊन सहदेवाला प्रेमपूर्वक असें ह्मणाले कीं १९ " हे पांडवश्रेष्ठा, सर्व रत्नें घेऊन तूं जा. विवेकी धर्मराजाला ह्मणजे अर्थात, त्यानें आरंभिलेल्या कार्याला विघ्न न येवो " २०. तदनंतर तो सहदेव मैंद व द्विविद ह्यांच्यापासून तीं रत्नें घेऊन माहिष्मती नगरीला गेला आणि त्या ठिकाणीं परपक्षाकडील वीरांचा वध करणाऱ्या प्रतापी पांडुपुत्र पुरुषश्रेष्ठ सहदेवानें नीलराजाशीं युद्ध केलें. तें सैन्यक्षयकारक व प्राणनाशक युद्ध फारच मोठें असून भीरु पुरुषांना अतिशयच भय उत्पन्न करणारें होतें. असो. त्या नीलराजाला भगवान् अग्नीचें साहाय्य होतें २१,२२,२३. ह्यामुळें सहदेवाच्या सैन्यांतील रथ, अश्व, गज, योद्धे व कवचें हीं सर्व अग्नीनें प्रदीप्त दिसूं लागलीं असतां २४ कुरुनंदन सहदेव मनामध्यें फारच गोंधळून गेला आणि हे जनमेजया, चकारशब्दही मुखावाटें काढण्यास तो असमर्थ झाला २५. जनमेजय प्रश्न करितोः—हे द्विज, सहदेव यज्ञाकरितांच प्रयत्न करीत असतांना (नीलराजाशीं चाललेल्या) युद्धामध्यें भगवान् अग्नि त्याचा प्रतिपक्षी कशाकरितां झाला ? २६. वैशंपायन उत्तर देतातः—माहिष्मती नगरीमध्यें पूर्वी भगवान्

रिकः २७ नीलस्य राज्ञो दुहिता बभूवातीव शोभना । साग्निहोत्रमुपातिष्ठद्बोधनाय पितुः सदा २८ व्यजनैर्धूयमानोपि तावत्प्रज्वलते न सः । यावच्चारुपुटोष्ठेन वायुना न विधूयते २९ ततः स भगवानग्निश्चकमे तां सुदर्शनाम् । नीलस्य राज्ञः सर्वेषामुपनीतश्च सोभवत् ३० ततो ब्राह्मणरूपेण रममाणो यदृच्छया । चकमे तां वरारोहां कन्यामुत्पललोचनाम् ३१ तं तु राजा यथाशास्त्रमशासद्धार्मिकस्तदा । प्रजज्वाल ततः कोपाद्भगवान्हव्यवाहनः ३२ तं दृष्ट्वा विस्मितो राजा जगाम शिरसावनिम् ३३ ततः कालेन तां कन्यां तथैव हि तदा नृपः । प्रददौ विप्ररूपाय वह्नये शिरसा नतः ३४ प्रतिगृह्य च तां सुभ्रूं नीलराज्ञः सुतां तदा । चक्रे प्रसादं भगवांस्तस्य राज्ञो विभावसुः ३५ वरेण च्छन्दयामास तं नृपं स्विष्टकृत्तमः । अभयं च स जग्राह स्वसैन्ये वै महीपतिः ३६ ततः प्रभृति ये केचिदज्ञानात्तां

अग्नि अगदीं विवश होऊन परकन्यासक्त झाला असल्याचें ऐकण्यांत आहे २७. (त्याची हकीकत येणेंप्रमाणें:—) नीलराजाला एक फारच सुस्वरूप कन्या होती. ती अग्निहोत्रसमयीं (ह्मणजे अग्नीमध्यें होम करण्याची वेळ झाली असतांना) ज्वाला करण्याकरितां पित्याचे समीप बसत असे २८. (ह्यामुळें नीलराजाच्या होमशाळेंतील) तो अग्नि त्या कन्येनें आपल्या सुंदर ओष्ठसंपुटानें जो पर्यंत वारा घातला नाहीं तोंपर्यंत विंझोण्यांनीं देखील वारा घातला असतांना प्रज्वलित होईनासा झाला २९. असें होतां होतां भगवान् अग्नीला त्या रूपवती कन्येचा उपभोग घेण्याची इच्छा झाली व त्या कन्येनेंही त्याचा स्वीकार केला. परंतु, ही गोष्ट नील राजाला व त्याचप्रमाणें इतर सर्वांनाहीं विदित झाली नव्हती ३०. ह्याप्रमाणें ब्राह्मणरूपानें यथेष्ट रममाण होण्याची इच्छा करणारा तो अग्नि कमलासारख्या नेत्रांनीं युक्त असलेल्या त्या सुंदरीचा उपभोग घेऊं लागला असतां ३१ धर्मनिष्ठ नीलराजानें त्याला यथाशास्त्र शिक्षा केली. परंतु, शिक्षा होतांक्षणीं (ब्राह्मणवेषधारी) भगवान् अग्नि क्रुद्ध होऊन प्रज्वलित झाला असतां त्याला अवलोकन केल्याबरोबर नीलराजानें विस्मयचकित होऊन त्याला शिरसाष्टांग नमस्कार घातला ३२, ३३. पुढें कांहीं काळ लोटल्यावर नीलराजानें ती कन्या विप्ररूप अग्नीला पूर्ववत्च साष्टांगप्रणिपातपूर्वक अर्पण केली ३४. तेव्हां नीलराजाच्या त्या उत्कृष्ट भ्रुकुटींनीं युक्त असलेल्या कन्येचा स्वीकार करून भगवान् अग्नि त्या राजावर प्रसंन झाला झाला ३५; इतकेंच नव्हें परंतु, अत्यंत प्रिय करण्यास उद्युक्त झालेला तो अग्नि " वर माग " ह्मणून त्या राजाला ह्मणाला व (तें एकून) आपल्या सैन्याविषयीं त्या भूपालानें अभय मागून घेतलें ३६. हे जनमेजयराजा, तेव्हांपासून (ह्या गोष्टीच्या) अज्ञानामुळें जे कोणी भूपति पराक्रमानें

पुरीं नृपाः । जिगीषन्ति बलाद्राजंस्ते दह्यन्ते स्म वह्निना ३७ तस्यां पुर्यां तदा चैव माहिष्मत्यां कुरूद्वह । बभूवुरनतिग्राह्या योषितश्छन्दतः किल ३८ एवमग्निर्वरं प्रादात्स्त्रीणामप्रतिवारणे । स्वैरिण्यस्तत्र नार्यो हि यथेष्टं विचरन्त्युत ३९ वर्जयन्ति च राजानस्तत्पुरं भरतर्षभ । भयादग्नेर्महाराज तदाप्रभृति सर्वदा ४० सहदेवस्तु धर्मात्मा सैन्यं दृष्ट्वा भयार्दितम् । परीतमग्निना राजन्नाकम्पत यथाचलः ॥ उपस्पृश्य शुचिर्भूत्वा सोऽब्रवीत्पावकं ततः ४१ सहदेव उवाच ॥ त्वदर्थोयं समारम्भः कृष्णवर्त्मन्नमोस्तु ते । मुखं त्वमसि देवानां यज्ञस्त्वमसि पावक ४२ पावनात्पावकश्चासि वहनाद्धव्यवाहनः । वेदास्त्वदर्थं जाता वै जातवेदास्ततो ह्यसि ४३ चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो । स्वर्गद्वारस्पृशश्चासि हुताशो ज्वलनः शिखी ४४ वैश्वानरस्त्वं पिङ्गेशः प्लवङ्गो भूरितेजसः । कुमारसूस्त्वं भग-

---

ती माहिष्मती नगरी जिंकण्याची इच्छा करितात ते अग्नीनें दग्ध होऊन जातात ३७. असो. हे कुरुवंशजश्रेष्ठा जनमेजया, त्या माहिष्मतीनगरीमध्यें त्या वेळीं स्त्रिया स्वच्छंदामुळें अगदीं अनावर झालेल्या असत ३८. कारण, (विरुद्ध होऊन स्त्रियांचें निवारण करण्यास कोणीही पुरुष समर्थ होणार नाहीं) ह्याप्रमाणें अग्नीनें निवारण न होण्याविषयीं स्त्रियांना (जसा कांहीं) वरच दिला होता. सारांश, (अग्नि फारच कामासक्त झालेला आहे, तेव्हां कोणत्याही पुरुषाच्या रूपानें तोच आमचा उपभोग घेणार ह्या समजुतीवर) त्या ठिकाणीं स्त्रिया स्वैरिणी होऊन यथेष्ट संचार करूं लागल्या ३९. असो. हे भरतवंशजश्रेष्ठा जनमेजय महाराजा, तेव्हां पासून राजे लोक अग्नीच्या भयामुळें तें नगर (जिंकण्याचें) सर्वदा वर्ज्य करीत असतात ४०. हे जनमेजय राजा, अग्नीनें वेढल्यामुळें भयाकुल झालेलें आपलें सैन्य अवलोकन करूनही धर्मात्मा सहदेव पर्वताप्रमाणें यत्किंचित्ही कंपित न होतां उदकस्पर्श करून शुचिभूत होऊन अग्नीची स्तुति करूं लागला ४१. सहदेव स्तुति करितोः—हे कृष्णवर्त्म्या, तुला नमस्कार असो. हे पावका, तुझ्याकरितांच हें कर्म आरंभिलें आहे. कारण, देवांचें मुख तूंच असून यज्ञस्वरूपही तूंच आहेस ४२. (यजमानांना) पावन करीत असल्यामुळें तुला पावक ही संज्ञा प्राप्त झाली असून (देवांकडे हव्य) नेत असल्यामुळें तुला हव्यवाहन असें ह्मणत असतात. तुझ्याकरितां वेद झाले असल्यामुळें तुला जातवेदस् हें नांव प्राप्त झालें आहे ४३. हे विभावसो, स्वर्गद्वारीं तुझा संचार असून चित्रभानु, सुरेश, अनल, हुताश, ज्वलन, शिखी ४४, वैश्वानर, पिंगेश, प्लवंग व भूरितेजस् ह्या संज्ञा तुलाच (त्या त्या गुणामुळें) प्राप्त झाल्या आहेत. षडाननाचा

वान्रुद्रगर्भो हिरण्यकृत् ४५ अग्निर्ददातु मे तेजो वायुः प्राणं ददातु मे । पृथिवी बलमादध्याच्छिवं चापो दिशन्तु मे ४६ अपांगर्भ महासत्त्व जातवेदः सुरेश्वर । देवानां मुखमग्ने त्वं सत्येन विपुनीहि माम् ४७ ऋषिभिर्ब्राह्मणैश्चैव दैवतैरसुरैरपि । नित्यं सुहुत यज्ञेषु सत्येन विपुनीहि माम् ४८ धूमकेतुः शिखी च त्वं पापहानिलसंभवः । सर्वप्राणिषु नित्यस्थः सत्येन विपुनीहि माम् ४९ एवं स्तुतोसि भगवन्प्रीतेन शुचिना मया । तुष्टिं पुष्टिं श्रुतं चैव प्रीतिं चाग्ने प्रयच्छ मे ५० वैशम्पायन उवाच ॥ इत्येवं मन्त्रमाग्नेयं पठन्यो जुहुयाद्विभुम् । ऋद्धिमान्सततं दान्तः सर्वपापैः प्रमुच्यते ५१ सहदेव उवाच ॥ यज्ञविघ्नमिमं कर्तुं नार्हस्त्वं हव्यवाहन ५२ एवमुक्त्वा तु माद्रेयः कुशैरास्तीर्य मेदिनीम् । विधिवत्पुरुषव्याघ्रः पावकं प्रत्युपाविशत् ५३ प्रमुखे तस्य सैन्यस्य भीतोद्विग्नस्य भारत । न चैनमत्यगाद्वह्निर्वेलामिव महोदधिः ५४ तमुपेत्य शनैर्वह्निरुवाच कुरुनन्दनम् । सहदेवं नृणां देवं सान्त्वपूर्वमिदं वचः ५५

उत्पादक तूंच असून भगवान् ही संज्ञा तुलाच आहे आणि त्याचप्रमाणें रुद्रगर्भ तूंच असून (रेतोद्वारानें) सुवर्ण उत्पन्न करणाराही तूंच आहेस ४५. अग्निरूपानें माझे ठिकाणीं तेज उत्पन्न करून वायुरूपानें तूंच मला प्राणदान दे आणि तसेंच पृथ्वीरूपानें माझे ठिकाणीं बल उत्पन्न करून जलरूपानें तूंच मला कल्याणप्रद हो ४६. हे जलगर्भा, हे महात्म्या, हे जातवेदा, हे सुरेश्वरा, हे अग्ने, तूं देवांचें मुख आहेस हें जर खरें असेल तर मला पावन कर ४७. देव, असुर, ऋषि व ब्राह्मण हे यज्ञांमध्यें तुझे ठिकाणीं नित्य उत्तम प्रकारें हवन करीत असतात हें जर सत्य आहे तर तूं मला पवित्र कर ४८. धूमकेतु, शिखी, वायुसंभव, पापनाशक आणि सर्व प्राण्यांचे ठिकाणीं सर्वदां वास करणारा जर तूं आहेस तर खरोखर मला पापनिर्मुक्त कर ४९ आणि हे भगवन्, शुचि होऊन आनंदानें ह्याप्रमाणे मीं तुझी स्तुति केली आहे. कीर्ति, संतोष, पुष्टि, ज्ञान व सुख हीं, हे अग्ने, तूं मला दे ५०. वैशंपायन सांगतातः— ह्याप्रमाणें मंत्र (अष्टक) पठन करून जो पुरुष सर्वव्यापी अग्नीमध्यें सतत हवन करितो तो समृद्ध व जितेंद्रिय होऊन सर्व पापांपासून मुक्त होतो ५१. सहदेव ह्मणतोः— हे हव्यवाहना, असें हें यज्ञाला विघ्न आणणें तुला योग्य नाहीं ५२. ह्याप्रमाणें बोलून माद्रीपुत्र सहदेवानें भूमीवर दर्भ पसरले आणि हे भरतकुलोत्पन्ना जनमेजया, तो पुरुषश्रेष्ठ अग्नीसमोर व भयभीत होऊन उद्विग्न झालेल्या त्या सैन्याच्या पुढें यथाविधि आसन घालून बसला. तेव्हां महासागर ज्याप्रमाणें मर्यादेचें अतिक्रमण करीत नाहीं त्याप्रमाणें ओलांडून न जातां ५३,५४ अग्नि त्या कुरुनंदन सहदेवाचें समीप

उत्तिष्ठोत्तिष्ठ कौरव्य जिज्ञासेयं कृता मया । वेद्मि सर्वमभिप्रायं तव धर्मसुतस्य च ५६ मया तु रक्षितव्येयं पुरी भरतसत्तम । यावद्राज्ञो हि नीलस्य कुले वंशधरा इति ५७ ईप्सितं तु करिष्यामि मनसस्तव पाण्डव । तत उत्थाय हृष्टात्मा प्राञ्जलिः शिरसा नतः ५८ पूजयामास माद्रेयः पावकं भरतर्षभ । पावके विनिवृत्ते तु नीलो राजाभ्यगात्तदा ५९ पावकस्याज्ञया चैनमर्चयामास पार्थिवः । सत्कारेण नरव्याघ्रं सहदेवं युधां पतिम् ६० प्रतिगृह्य च तां पूजां करे च विनिवेश्य च । माद्रीसुतस्ततः प्रायाद्विजयी दक्षिणां दिशम् ६१ त्रैपुरं स्ववशे कृत्वा राजानमामितौजसम् । निजग्राह महाबाहुस्तरसा पौरवेश्वरम् ६२ आकृतिं कौशिकाचार्यं यत्नेन महता ततः । वशे चक्रे महाबाहुः सुराष्ट्राधिपतिं तदा ६३ सुराष्ट्रविषयस्थश्च प्रेषयामास रुक्मिणे । राज्ञे भोजकटस्थाय महामात्राय धीमते ६४ भीष्मकाय स धर्मात्मा साक्षादिन्द्रसखाय वै । स चास्य प्रतिजग्राह ससुतः शासनं तदा ६५ प्रीतिपूर्वं

देशाधिपति जयत्सेन १९, उभयतां विराट व द्रुपद, महाबलाढ्य शकुनि, अवंतीदेशाधिपति विंद व अनुविंद सर्वोत्कृष्ट पांड्यदेशाधिपति श्वेतराजा २०, महाभाग्यवान् शंख, मानी वृषसेन, पराक्रमी एकलव्य आणि महारथी व महावीर्यवान् कलिंग देशाचा अधिपति ह्यांना सोडून तूं केशवाची स्तुति कां करीत असतोस ? २१. हे भीष्मा, लोकांची स्तुति करण्याकडेच जर सर्वदां तुझ्या बुद्धीचा कल असेल तर शल्यप्रभृति भूपतींची तरी तूं स्तुति कां करीत नाहींस ? २२. (तूं मलाच दोष देत आहेस. परंतु) हे नृपा, ह्यापूर्वी धर्मवेत्त्या वृद्धांच्या तोंडून तूं कांहीं ऐकिलेंच नाहींस ह्याला मीं काय करावें ? २३. हे भीष्मा, आत्मस्तुति व आत्मनिंदा आणि त्याचप्रमाणें परस्तुति व परनिंदा हीं चारीं सभ्य लोक करीत नसतात हें तूं कधीं श्रवण केलेलेंच नाहींस २४. अरे, स्तुतीस अपात्र अशा केशवाची तूं अज्ञानामुळें नेहमीं भक्तिपूर्वक स्तुति करीत असतोस. परंतु, हे भीष्मा, तुझ्या त्या करण्याला कोणीही अनुमोदन देत नाहीं २५. अरे, केवल आपला कांहीं हेतु साधण्याकरितां तूं भोजदेशाधिपति कंसाचा जो यःकश्चित् गुरें राखणारा दास त्या दुरात्म्याचे ठिकाणीं तूं आपला सर्व जगताचा समावेश कसा करीत आहेस (ह्मणजे सर्व जगताला तोच कारण असल्याचें कसें ह्मणत आहेस) ? २६. तेव्हां (ह्या गोष्टींचा विचार केला असतां) तुझी ही बुद्धि जातीवर जात नाहीं कां ? अरे, भूलिंगनामक पक्ष्याप्रमाणें प्राणी आपल्या जातीवर जायचेच हें मीं तुला पूर्वीच सांगितलें आहे २७. हे भीष्मा, हिमालयपर्वताच्या पश्चिम बाजूस भूलिंग ह्मणून एक पक्षी असतो व ज्यांतील अर्थ कृतीशीं विरुद्ध असल्यामुळें अप्रशस्त

र्थविगर्हिताः२८ मा साहसमितीदं सा सततं वाशते किल। साहसं चात्मनातीव चरन्ती नावबुध्यते २९ सा हि मांसार्गलं भीष्म मुखात्सिंहस्य खादतः। दन्तान्तरविलग्नं यत्तदादत्तेल्पचेतना ३० इच्छतः सा हि सिंहस्य भीष्म जीवत्यसंशयम्। तद्वत्त्वमप्यधर्मिष्ठ सदा वाचः प्रभाषसे ३१ इच्छतां भूमिपालानां भीष्म जीवस्यसंशयम्। लोकविद्विष्टकर्मा हि नान्योस्ति भवता समः ३२ वैशम्पायन उवाच॥ ततश्चेदिपतेः श्रुत्वा भीष्मः स कटुकं वचः। उवाचेदं वचो राजंश्चेदिराजस्य शृण्वतः ३३ इच्छतां किल नामाहं जीवाम्येषां महीक्षिताम्। सोहं न गणयाम्येतांस्तृणेनापि नराधिपान् ३४ एवमुक्ते तु भीष्मेण ततः संचुक्रुशुर्नृपाः। केचिज्जहृषिरे तत्र केचिद्भीष्मं जगर्हिरे ३५ केचिदूचुर्महेष्वासाः श्रुत्वा भीष्मस्य तद्वचः। पापोवलिप्तो वृद्धश्च नायं भीष्मोर्हति क्षमाम् ३६ हन्यतां दुर्मतिर्भीष्मः पशुवत्साध्वयं नृपाः। सर्वैः समेत्य संरब्धो दह्यतां वा कटाग्निना ३७ इति तेषां वचः श्रुत्वा ततः कुरुपितामहः। उवाच मति-

---

आहे अशी त्या पक्ष्याचीं भाषणें सर्वदां ऐकण्यांत येत असत त २८. "साहस करूं नका; साहस करूं नका" असे हे शब्द तो पक्षी खरोखर नेहमीं उच्चारीत असतो आणि स्वतः पराकाष्ठेचें साहस करीत असतांना तें त्याच्या लक्ष्यांतही येत नाहीं२९. कारण, हे भीष्मा, खातां खातां अडकून राहिलेला मांसाचा तुकडा सिंहाच्या दाढेंतून तो अविचारी पक्षी नेहमीं घेऊन जात असतो ३०. तात्पर्य, हे भीष्मा, ज्याप्रमाणें त्या पक्ष्याचें जीवन निःसंशय सिंहाच्या इच्छेवरच अवलंबून आहे त्याचप्रमाणें हे अधर्मिष्ठा, सर्वदां (स्वकृतीच्या विरुद्ध) भाषा बोलत असलेल्या ३१ तुझेंही जीवित निःसंशय भूपालांच्याच इच्छेवर अवलंबून आहे. खरोखर, तुझ्यासारिखा लोकनिंद्य कर्म करणारा कोणीही नाहीं ३२. वैशंपायन सांगतातः—हे जनमेजय राजा, ह्याप्रमाणें चेदिराजानें केलेलें तें मर्मभेदक भाषण श्रवण करून तो चेदिराज ऐकत असतांनाच भीष्म ह्मणाले३३ " होय. मी खरोखर ह्या राजांच्या इच्छेमुळेंच जिवंत राहिलों आहें. परंतु, तो मी ह्या राजांना एका कसपटासमान देखील मानीत नाहीं " ३४. ह्याप्रमाणें भीष्मांनीं भाषण केलें असतां कांहीं राजे फारच क्रुद्ध झाले, कांहीं आनंदित झाले आणि कांहीं भीष्मांची निंदा करूं लागले ३५. भीष्मांचें तें भाषण श्रवण करून कांहीं महाधनुर्धारी भूपति ह्मणाले " अरे, गर्वानें चढून गेलेला हा पापी वृद्ध भीष्म क्षमेस पात्र नाहीं ३६. नृप हो, ह्या दुर्मति भीष्माला पशूप्रमाणें खुशाल मारून टाका अथवा सर्वांनीं मिळून ह्या मस्त झालेल्याला तृणाग्नीनें दग्ध करून टाका " ३७. ह्याप्रमाणें

मान्भीष्मस्तानेव वसुधाधिपान् ३८ उक्तस्योक्तस्य नेहान्तमहं समुपलक्षये । यत्तु वक्ष्यामि तत्सर्वं शृणुध्वं वसुधाधिपाः ३९ पशुवद्घातनं वा मे दहनं वा कटाग्निना । क्रियतां मूर्ध्नि वो न्यस्तं मयेदं सकलं पदम् ४० एष तिष्ठति गोविन्दः पूजितोस्माभिरच्युतः । यस्य वा त्वरते बुद्धिर्मरणाय स माधवम् ४१ कृष्णमाह्वयतामद्य युद्धे चक्रगदाधरम् । यावदस्यैव देवस्य देहं विशतु पातितः ४२ [१५८९] इतिश्रीमहाभारते०वैयासिक्यां सभापर्वणि शिशुपालवधपर्वणि भीष्मवाक्ये चतुश्चत्वारिंशोध्यायः ॥ ४४ ॥

वैशम्पायन उवाच ॥ ततः श्रुत्वैव भीष्मस्य चेदिराडुरुविक्रमः । युयुत्सुर्वासुदेवेन वासुदेवमुवाच ह १ आह्वये त्वां रणं गच्छ मया सार्धं जनार्दन । यावदद्य निहन्मि त्वां सहितं सर्वपाण्डवैः २ सह त्वया हि मे वध्याः सर्वथा कृष्ण पाण्डवाः । नृपतीन्समतिक्रम्य यैरराजा त्वमर्चितः३ ये त्वां दासमराजानं बाल्यादर्चन्ति दुर्मतिम् । अनर्हमर्हवत्कृष्ण वध्यास्त

त्यांचें भाषण श्रवण केल्यावर कुरुपितामह विचारी भीष्म त्याच राजांना उद्देशून ह्मणाले ३८ " (उत्तरास प्रत्युत्तर ह्याप्रमाणें) फिरून फिरून बोलणें चालविलें असतां तें ह्मणजे ह्या ठिकाणीं संपेल असें मला वाटत नाहीं. तेव्हां, हे नृपहो, मी जें आतां (एकदांच) सांगतों तें सर्व, तुह्मी श्रवण करा ३९. माझा पशुप्रमाणें वध होवो किंवा तृणाग्नीच्या योगानें माझें दहन होवो; मी हा आपला पाय पूर्णपणें तुमच्या मस्तकावर ठेवून येथें उभा राहिलों आहे ४० आणि आह्मीं अग्रपूजा केलेला हा गोविंदही ह्या ठिकाणीं उभा आहे. तेव्हां, ज्याचें मन मृत्यूकडे धांव घेत असेल त्यानें ह्या चक्रपाणि व गदापाणि लक्ष्मीपति श्रीकृष्णाला आज युद्धार्थ आव्हान करावें आणि ह्या कृष्णाच्या हातून वध पावून ह्या देवाच्याच देहामध्यें त्यानें प्रविष्ट व्हावें ४१, ४२. ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रंथात्मक श्रीमहाभारतांतर्गत सभापर्वांतील शिशुपालवधपर्वापैकीं भीष्मांच्या भाषणाविषयीं चवेचाळिसावा अध्याय समाप्त झाला ॥ ४४ ॥

वैशंपायन सांगतातः—भीष्मांचें भाषण श्रवण केल्याबरोबर महापराक्रमी चेदिराज शिशुपाल श्रीकृष्णाशीं युद्ध करण्याच्या उद्देशानें त्यांना ह्मणाला १ " हे जनार्दना, मी तुला आव्हान करितों. माझ्यासहवर्तमान तूं संग्राम कर. ह्मणजें आज एकदां सर्व पांडुपुत्रांसहवर्तमान तुझा वध तर करून टाकितों २. हे कृष्णा, भूपतींचा अपमान करून तूं राजा नसतांनाही ज्यांनीं तुझी अग्रपूजा केली त्या पांडवांचाही मला तुझ्यासहवर्तमान वध करणें सर्वथा अवश्यच आहे ३. हे कृष्णा, राजा नव्हेस इतकेंच नव्हें परंतु, दास आणि ह्मणूनच पूजनास अपात्र असलेल्या तुज दुर्मतीचें जे

इति मे मतिः ४ इत्युक्त्वा राजशार्दूलस्तथौ गर्जन्नमर्षणः ५ एवमुक्ते ततः कृष्णो मृदुपूर्वमिदं वचः । उवाच पार्थिवान्सर्वान्स समक्षं च वीर्यवान् ६ एष नः शत्रुरत्यन्तं पार्थिवाः सात्वतीसुतः । सात्वतानां नृशंसात्मा न हितोनपकारिणाम् ७ प्राग्ज्योतिषपुरं यातानस्माञ्ज्ञात्वा नृशंसकृत् । अदहद्द्वारकामेष स्वस्रीयः सन्नराधिपाः ८ क्रीडतो भोजराजस्य एष रैवतके गिरौ । हत्वा बद्ध्वा च तान्सर्वानुपायात्स्वपुरं पुरा ९ अश्वमेधे हयं मेध्यमुत्सृष्टं रक्षिभिर्वृतम् । पितुर्मे यज्ञविघ्नार्थमहरत्पापनिश्चयः १० सौवीरान्प्रतियातां च बभ्रोरेष तपस्विनः । भार्यामभ्यहरन्मोहादकामां तामितोगताम् ११ एष मायाप्रतिच्छन्नः करूषार्थे तपस्विनीम् । जहार भद्रां वैशालीं मातुलस्य नृशंसकृत् १२ पितृष्वसुः कृते दुःखं सुमहन्मर्षयाम्यहम् । दिष्ट्या हीदं सर्वराज्ञां संनिधावद्य वर्तते १३ पश्यन्ति हि भवन्तोद्य मद्व्यतीव व्यतिक्रमम् । कृतानि तु परोक्षं मे यानि तानि निबोधत १४

पूज्य समजून मूर्खपणामुळें पूजन करीत असतात त्यांचा वध केलाच पाहिजे असा माझा निश्चयच झाला आहे " ४. असें बोलून तो क्रुद्ध नृपश्रेष्ठ गर्जना करीतच उभा राहिला ५. तेव्हां ह्याप्रमाणें तो बोलल्यानंतर वीर्यवान् श्रीकृष्ण मृदु वाणीनें त्या शिशुपालासमक्ष सर्व राजांना ह्मणाले ६ "हे नृपहो, यादवकुलांतीलच स्त्रीचे ठिकाणीं उत्पन्न झालेला आणि निरुपद्रवी यादवांच्याच अहितावर असलेला हा दुष्ट आमचा अत्यंत शत्रु आहे ७. आह्मी प्राग्ज्योतिषनगराला गेलों आहोंत असें समजून हें नराधिप हो, यादवांचा प्रत्यक्ष भाचा असतांना ह्या दुष्टानें द्वारका दग्ध केली ८. रैवतक पर्वतावर भोजराजा क्रीडा करीत असतांना हा त्या सर्वांचा वध करून आपल्या नगराप्रत परत गेला ९. अश्वमेध यागाकरितां रक्षक बरोबर देऊन सोडिलेला पवित्र अश्व माझ्या पित्याच्या यज्ञाला विघ्न आणण्याकरितां ह्या दुर्मति शिशुपालानें बुद्धचा हरण केला १०. विचाऱ्या बभ्रुनामक यादवाची भार्या (विवाहसमयीं) येथून नेऊन सौवीर देशाला चालली असतांना ह्यानें मूर्खपणा करून ती निरिच्छ असतांही हरण केली ११ व त्याचप्रमाणें प्रत्यक्ष आपल्या मातुलाशीं दुष्टपणा करणाऱ्या ह्या शिशुपालानें विशालानामक राजाची भद्रानामक कन्या करूषदेशाच्या राजाला दिली असतांना कपटानें त्या करूषराजाचा वेष धारण करून त्या बिचारीला हरण करून नेली १२. परंतु, हें अत्यंत दुःसह दुःख मी आपल्या पितृभगिनीकरितां आजपर्यंत सहन करीत आहें. असो. आजचें हें ह्यांचें माझ्या विरुद्ध चाललेलें वर्तन सर्व राजांच्या समक्षच चाललें आहें हें खरोखर फार चांगलें झालें १३. सारांश, माझ्यासंबंधानें चाललेलें हें ह्यांचें

इमं त्वस्य न शक्ष्यामि क्षन्तुमद्य व्यतिक्रमम् । अवलेपाद्वधार्हस्य समग्रे राजमण्डले १५ रुक्मिण्यामस्य मूढस्य प्रार्थनासीन्मुमूर्षतः । न च तां प्राप्तवान्मूढः शूद्रो वेदश्रुतीमिव १६ वैशम्पायन उवाच ॥ एवमादि ततः सर्वे सहितास्ते नराधिपाः । वासुदेववचः श्रुत्वा चेदिराजं व्यगर्हयन् १७ तस्य तद्वचनं श्रुत्वा शिशुपालः प्रतापवान् । जहास स्वनवद्धासं वाक्यं चेदमुवाच ह १८ मत्पूर्वां रुक्मिणीं कृष्ण संसत्सु परिकीर्तयन् । विशेषतः पार्थिवेषु व्रीडां न कुरुषे कथम् १९ मन्यमानो हि कः सत्सु पुरुषः परिकीर्तयेत् । अन्यपूर्वां स्त्रियं जातु त्वदन्यो मधुसूदन २० क्षम वा यदि ते श्रद्धा मा वा कृष्ण मम क्षम । कुद्धाद्वापि प्रसन्नाद्वा किं मे त्वत्तो भविष्यति २१ तथा ब्रुवत एवास्य भगवान्मधुसूदनः । मनसाचिन्तयच्चक्रं दैत्यगर्वनिषूदनम् २२ एतस्मिन्नेव काले तु चक्रे हस्तगते सति। उवाच भगवानुच्चैर्वाक्यं वाक्यविशारदः २३ शृण्वन्तु मे महीपाला येनै-

---

अत्यंत उदामपणाचें वर्तन तुम्हीं पहातच आहांत. असो. तुमच्या परोक्ष ह्यानें जीं कांहीं माझ्याविरुद्ध कृत्यें केलीं तीं मीं तुह्मांला सांगितलीं १४. परंतु, माझ्या हातून वध होण्यासच योग्य असलेल्या ह्या शिशुपालानें आज जो संपूर्ण राजमंडलामध्यें गर्वानें हा माझा अपमान केला तो मात्र माझ्यानें सहन करवतच नाहीं १५. अहो, मृत्यूकडे धांव घेणाऱ्या ह्या मूढाची रुक्मिणीला वरण्याविषयीं इच्छा होती. परंतु, वेदाचें श्रवण देखील ज्याप्रमाणें शूद्राला प्राप्त होत नाहीं त्याप्रमाणें ह्या (अनधिकारी) मूढाला ती प्राप्त झाली नाहीं १६. वैशंपायन सांगतातः— हें व अशाप्रकारचें श्रीकृष्णांचें भाषण श्रवण करून ते सर्व राजे एकदम चेदिराज शिशुपालाची निंदा करूं लागले १७. परंतु, (तिकडे लक्ष्य न देतां) प्रतापी शिशुपाल त्या श्रीकृष्णांचें तें भाषण श्रवण केल्याबरोबर उच्चस्वरानें हंसला आणि ह्मणाला १८ "हे कृष्णा, रुक्मिणी पूर्वी माझी होती हें भर राजसभेमध्यें सांगतांना आणि विशेषतः राजांमध्यें सांगतांना तुला लाज कशी वाटत नाहीं ? १९. अरे, मधुसूदना, आपण वरिलेली स्त्री पूर्वी दुसऱ्यानें वरिली होती असें तुझ्यावांचून कोणता तरी दुसरा अब्रूची चव्हाड असलेला पुरुष कधीं तरी लोकांना सांगत बसेल काय? २०. हे कृष्णा, तुला वाटत असल्यास माझी क्षमा कर किंवा करूं नको. (मला त्याची मुळींच परवा नाहीं) कारण, तूं कुद्ध झालास किंवा प्रसन्न झालास तरी तुझ्या हातून माझें होणार आहे काय? २१. ह्याप्रमाणें हा शिशुपाल बोलत असतांनाच भगवान् श्रीकृष्णांनीं दैत्यसमूहनाशक सुदर्शनचक्राचें स्मरण केलें २२ आणि तत्क्षणींच तें चक्र हस्तगत झालें असतां संभाषण करण्यामध्यें निपुण असलेले ते भगवान् श्रीकृष्ण

मया । अपराधशतं क्षाम्यं मातुरस्यैव याचने २४ दत्तं मया यांचितं च तद्वै पूर्णं हि पार्थिवाः । अधुना वधयिष्यामि पश्यतां वो महीक्षिताम् २५ एवमुक्त्वा यदुश्रेष्ठश्चेदिराजस्य तत्क्षणात् । व्यपाहरच्छिरः क्रुद्धश्चक्रेणामित्रकर्षणः ॥ स पपात महाबाहुर्वज्राहत इवाचलः २६ ततश्चेदिपतेर्देहात्तेजोऽग्र्यं ददृशुर्नृपाः । उत्पतन्तं महाराज गगनादिव भास्करम् २७ ततः कमलपत्राक्षं कृष्णं लोकनमस्कृतम् । ववन्दे तत्तदा तेजो विवेश च नराधिप २८ तदद्भुतममन्यन्त दृष्ट्वा सर्वे महीक्षितः । यद्विवेश महाबाहुं तत्तेजः पुरुषोत्तमम् २९ अनभ्रे ववर्ष द्यौः पपात ज्वलिताशनिः । कृष्णेन निहते चैद्ये चचाल च वसुन्धरा ३० ततः केचिन्महीपाला नाब्रुवंस्तत्र किंचन । अतीतवाक्पथे काले प्रेक्षमाणा जनार्दनम् ३१ हस्तैर्हस्ताग्रमपरे प्रत्यर्पिषन्नमर्षिताः।अपरे दशनैरोष्ठानदशन्क्रोधमूर्च्छिताः३२ रहश्च केचिद्वार्ष्णेयं प्रशशंसुर्नराधिपाः । केचिदेव सुसंरब्धा मध्यस्थास्त्व-

---

ह्मणाले २३ " मी काय ह्मणत आहें हें सर्व भूपालांनीं श्रवण करावें. ह्याच्याच मातेनें प्रार्थना केल्यावरून मला ह्याचे शंभर अपराध सहन करावयाचे होते ते हे मीं सहन केले. २४ हे नृपहो, ह्याच्या मातेला जो मीं (ह्याचे शंभर अपराध क्षमा करण्याचा) वर दिला होता तो पूर्ण होऊन गेला. तेव्हां आतां, तुमच्या समक्ष मी ह्याचा वध करितों " २५. ह्याप्रमाणें राजांना सांगितल्यानंतर क्रुद्ध झालेल्या शत्रुनाशक यदुकुलश्रेष्ठ श्रीकृष्णांनीं तत्क्षणीं सुदर्शन चक्राच्या योगानें चेदिराजाचें शिर उडविलें. तेव्हां वज्राचा आघात झालेल्या पर्वताप्रमाणें तो महापराक्रमी शिशुपाल (भूतलावर) पडला २६. हे जनमेजय महाराजा, खालीं पडल्यानंतर आकाशांतून निघणारा सूर्यच कीं काय अशारीतीनें त्या चेदिराज शिशुपालाच्या देहांतून एक सर्वोत्कृष्ट तेज बाहेर येतांना भूपतींनीं पाहिलें २७. देहांतून बाहेर निघाल्यानंतर, हे जनमेजयराजा, जगद्वंद्य कमलनयन श्रीकृष्णाला वंदन करून तें तेज तत्क्षणींच त्या परमात्म्याचे ठिकाणीं प्रविष्ट झालें २८. महापराक्रमी श्रीकृष्णाचे ठिकाणीं तें तेज जाऊन मिळालें हें पाहून सर्व राजांना ती एक अद्भुत गोष्ट वाटली२९. असो. ह्याप्रमाणें श्रीकृष्णांनीं चेदिराज शिशुपालाचा वध केला असतां मेघावांचून पर्जन्य वृष्टि झाली; उज्ज्वल विजा पडूं लागल्या आणि पृथ्वी कंपित झाली ३०. तेव्हां त्या अनिर्वचनीय समयीं कांहीं भूपति चकारशब्दही न उच्चारितां श्रीकृष्णाला अवलोकन करीत स्वस्थ राहिले ३१; कांहीं राजे क्रोधानें अगदीं व्याप्त होऊन हात चोळूं लागले; कांहीं दांत ओठ खाऊं लागले ३२; कांहीं भूपाल मनामध्यें वृष्णिकुलोत्पन्न श्रीकृष्णांची प्रशंसा करूं लागले;

परेभवन् ३३ प्रहृष्टाः केशवं जग्मुः संस्तुवन्तो महर्षयः । स
महात्मानः पर्थिवाश्च मलाबलाः ३४ शशंसुनिर्वृताः सर्वे दृष्ट्वा कृष्णस्य विक्रमम् । पाण्डवस्त्वब्रवीद्भ्रातॄन्सत्कारेण महीपतिम् ३५ दमघोषात्मजं वीरं संस्कारयत मा चिरम् । तथा च कृतवन्तस्ते भ्रातुर्वै शासनं तदा ३६ चेदीनामाधिपत्ये च पुत्रमस्य महीपतेः । अभ्यषिञ्चत्तदा पार्थः सह तैर्वसुधाधिपैः ३७ ततः स कुरुराजस्य क्रतुः सर्वसमृद्धिमान् । यूनां प्रीतिकरो राजन्न बभौ विपुलौजसः ३८ शान्तविघ्नः सुखारम्भः प्रभूतधनधान्यवान् । अन्नवान्बहुभक्षश्च केशवेन सुरक्षितः ३९ समापयामास च तं राजसूयं महाक्रतुम् ४० तं तु यज्ञं महाबाहुरासमाप्तेर्जनार्दनः । ररक्ष भगवाञ्छौरिः शार्ङ्गचक्रगदाधरः ४१ ततस्त्ववभृथस्नातं धर्मात्मानं युधिष्ठिरम् । समस्तं पार्थिवं क्षत्रमुपागम्येदमब्रवीत् ४२ दिष्ट्या वर्धसि धर्मज्ञ साम्राज्यं प्राप्तवानसि । आजमीढाजमीढानां यशः संवर्धितं त्वया ४३ कर्मणैतेन

कांहीं नुसते आंतल्या आंतच जळफळूं लागले आणि कांहीं नृपति उदासीन राहिले ३३. तदनंतर महर्षि स्तुति करीत करीत केशवासमीप गेले आणि महात्मे ब्राह्मण व कांहीं महाबलाढ्य भूपति ह्यांनींही तोच मार्ग स्वीकारिला ३४. सारांश, तो शिशुपालवधरूप पराक्रम अवलोकन करून प्रायः सर्वजन सुखी झाले आणि श्रीकृष्णांची प्रशंसा करूं लागले. हे जनमेजयराजा, तदनंतर " दमघोषपुत्र वीर शिशुपालराजाचा सत्कारपूर्वक और्ध्वदेहिक संस्कार करा; विलंब लावूं नका " असें पांडुपुत्र युधिष्ठिरानें भ्रात्यांना सांगितलें असतां त्यांनींही आपल्या ज्येष्ठ भ्रात्यांच्या आज्ञेप्रमाणें केलें व ३५,३६ त्याप्रमाणें झाल्यानंतर कुंतीपुत्र युधिष्ठिरानें त्या तेथें जमलेल्या सर्व भूपालांसहवर्तमान शिशुपालाच्या पुत्राला चेदिदेशविषयक राज्याचा अभिषेक केला ३७. तदनंतर, हे जनमेजयराजा, विपुल धनधान्य–समृद्ध भक्ष्यपदार्थ आणि अन्न ह्यांनीं युक्त, इतरही सर्वप्रकारच्या समृद्धींनीं संपन्न, सुखानें सुरूं झालेला आणि श्रीकृष्णांनीं संरक्षण केलें असल्यामुळें आलेलें विघ्नही टळलेला अशा त्या महाप्रभावी युधिष्ठिरराजाचा तो राजसूय क्रतु तरुण पुरुषांनाही आनंदकारक झाला ३८,३९ व युधिष्ठिरानें त्या राजसूय महाक्रतूची समाप्तिही केली ४०. (हे जनमेजयराजा) शार्ंग धनुष्य, सुदर्शन चक्र व कौमोदकी गदा धारण करणारा असा जो शूरकुलामध्यें अवतीर्ण झालेला महापराक्रमी भगवान् जनार्दन त्यानें समाप्तीपर्यंत त्या यज्ञाचें संरक्षण केलें ४१. तदनंतर तेथें जुळलेले सर्व भूपति क्षत्रिय अवभृथस्नान केलेल्या धर्मात्म्या युधिष्ठिरासमीप येऊन ह्मणाले ४२ " हे धर्मवेत्त्या, तुला सार्वभौमत्व प्राप्त झालें असून तुझा

राजेन्द्र [illegible]पहान्कृतः । आपृच्छामो नरव्याघ्र सर्वकामैः सुपूजिताः ४४ [illegible]राष्ट्राणि गमिष्यामस्तदनुज्ञातुमर्हसि । श्रुत्वा तु वचनं राज्ञां धर्म[illegible]ा युधिष्ठिरः ४५ यथार्हं पूज्य नृपतीन्भ्रातॄन्सर्वानुवाच ह । राज[illegible]एवैते प्रीत्याम्मान्समुपागताः ४६ प्रस्थिताः स्वानि राष्ट्राणि मामापृच्छ्य परंतपाः । तेनव्रजत भद्रं वो विषयान्तं नृपोत्तमान् ४७ भ्रातुर्वचनमाज्ञाय पाण्डवा धर्मचारिणः । यथार्हं नृपतीन्सर्वानेकैकं समनुव्रजन् ४८ विराटमन्वयात्तूर्णं धृष्टद्युम्नः प्रतापवान् । धनंजयो यज्ञसेनं महात्मानं महारथम् ४९ भीष्मं च धृतराष्ट्रं च भीमसेनो महाबलः । द्रोणं तु ससुतं वीरं सहदेवो युधां पतिः ५० नकुलः सुबलं राजन्सहपुत्रं समन्वयात् । द्रौपदेयाः समौभद्राः पार्वतीयान्महारथान् ५१ अन्वगच्छंस्तथैवान्यान्क्षत्रियान्क्षत्रियर्षभाः । एवं सुपूजिताः सर्वे जग्मुर्विप्राः सहस्रशः ५२ गतेषु

अभ्युदय होत आहे ही फार चांगली गोष्ट आहे. हे अजमीढ, अजमीढवंशजांची कीर्ति खरोखर तूं वृद्धिंगत केली असून ४३ हे नृपश्रेष्ठा, ह्या यज्ञकर्मानें, तूं पुण्यही फारच मोठें संपादन केलें आहेस आणि आमच्याही सर्व इच्छा परिपूर्ण करून तूं उत्तम प्रकारें आमचा आदर सत्कार केलेला आहेस. हे पुरुषश्रेष्ठा, आतां तुझी अनुज्ञा घेऊन ४४ आम्ही स्वराष्ट्रांत परत जाणार आहोंत. करितां, तूं आम्हांला जाण्याची अनुज्ञा दे. " हें राजांचें भाषण श्रवण केल्यावर धर्मराज युधिष्ठिरानें ४५ योग्यतेप्रमाणें त्या राजांचें पूजन केलें आणि आपल्या सर्व कनिष्ठ भ्रात्यांना तो ह्मणाला " हे सर्व राजे प्रेमानें आपणांकडे आलेले आहेत ४६ व आतां मला विचारून हे महापराक्रमी आपआपल्या राष्ट्रांना परत जाण्याकरितां निघाले आहेत. करितां, ह्या श्रेष्ठ राजांना देशाच्या सीमेपर्यंत तुम्ही पोंचविण्यास जा. ह्यांत तुमचें कल्याण आहे ४७. ह्याप्रमाणें भ्रात्यानें केलेली आज्ञा समजून घेऊन ते धर्माचरणी पांडुपुत्र योग्यतेप्रमाणें एकेकजण सर्व राजांना पोंचविण्याकरितां गेले ४८. प्रतापी धृष्टद्युम्न सत्वर विराटराजावरोबर गेला; महात्म्या महारथी द्रुपदाच्या मागोमाग अर्जुन चालता झाला ४९; भीष्म व धृतराष्ट्र ह्यांना पोंचविण्याकरितां महाबलाढ्य भीमसेन गेला; वीरनायक सहदेव पुत्रासह असलेल्या वीर द्रोणाचार्यांसहवर्तमान गेला ५०; हे जनमेजय राजा, नकुलानें पुत्रासहवर्तमान निघालेल्या सुबल राजाला पोंचवून दिला; सुभद्रेच्या पुत्रासह द्रौपदीचे पुत्र महारथी पर्वतप्रदेशाधिपतींबरोबर गेले ५१ आणि त्याचप्रमाणें इतरही क्षत्रियांना पांडवांकडील मुख्य मुख्य क्षत्रियांनीं पोंचवून दिले. ह्याचप्रमाणें उत्तमप्रकारें आदरसत्कार झाल्यावर सर्व हजारों विप्रही स्वस्थांनीं परत गेले ५२. असो. सर्व

पार्थिवेन्द्रेषु सर्वेषु ब्राह्मणेषु च । युधिष्ठिरमुवाचेदं वासु[illegible]वान्५३
आपृच्छे त्वां गमिष्यामि द्वारकां कुरुनन्दन । राजसूयं क्रतु[illegible]दृष्ट्या त्वं
प्राप्तवानसि ५४ तमुवाचैवमुक्तस्तु धर्मराजो जनार्दनम् । तव प्र[illegible]द्गोविन्द
प्राप्तः क्रतुवरो मया ५५ क्षत्रं समग्रमपि च त्वत्प्रसादाद्व[illegible]
उपादाय बलिं मुख्यं मामेव समुपस्थितम् ५६ कथं त्वद्गमनार्थं मे वाणी
वितरतेनघ । न ह्यहं त्वामृते वीर रतिं प्राप्नोमि कर्हिचित् ५७ अवश्यं
चैव गन्तव्या भवता द्वारकापुरी । एवमुक्तः स धर्मात्मा युधिष्ठिरसहा-
यवान् ५८ अभिगम्याब्रवीत्प्रीतः पृथां पृथुयशा हरिः । साम्राज्यं सम-
नुप्राप्ताः पुत्रास्तेय पितृष्वसः ५९ सिद्धार्था वसुमन्तश्च सा त्वं प्रीतिमवा-
प्नुहि । अनुज्ञातस्त्वया चाहं द्वारकां गन्तुमुत्सहे ६० सुभद्रां द्रौपदीं
चैव सभाजयत केशवः । निष्क्रम्यान्तः पुरात्तस्माद्युधिष्ठिरसहायवान्६१
स्नातश्च कृतजप्यश्च ब्राह्मणान्स्वस्ति वाच्य च । ततो मेघवपुःप्रख्यं
स्यन्दनं च सुकल्पितम् ६२ योजयित्वा महाबाहुर्दारुकः समुपस्थितः ।

मुख्य मुख्य राजे आणि ब्राह्मण परत गेल्यानंतर " हे कुरुनंदना, सुदैवानें एकदा राजसूयनामक श्रेष्ठ क्रतु तुझ्या हातून शेवटास गेला. आतां मी तुझा निरोप घेऊन द्वारकेस जातों " असें प्रतापी श्रीकृष्ण युधिष्ठिराला ह्मणाले ५३, ५४. तेव्हां ह्याप्रमाणें श्रीकृष्णांनीं ह्मटल्यावर धर्मराज त्यांना ह्मणाला " हे गोविंदा, तुझ्या कृपेमुळें माझ्या हातून हा श्रेष्ठ क्रतु शेवटास गेला ५५; तुझ्याच कृपेमुळें संपूर्ण राजे वश झाले आणि मलाच सार्वभौम समजून ते माझ्याकडे करभार घेऊन आले५६. तस्मात्, हे निष्पापा, तुझ्या गमनाविषयीं माझी जिव्हा वदण्यास समर्थ कशी होईल ? हे वीरा, तुझ्या वांचून मला कांहीं क्षणभरही सुचावयाचें नाहीं ५७. परंतु, तुला तर द्वारका नगरीस जाणें अवश्य आहे. " ह्याप्रमाणें युधिष्ठिरानें सांगितलें असतां ते महाकीर्तिमान् व धर्म-स्वरूप श्रीहरि युधिष्ठिराला बरोबर घेऊन आनंदानें कुंतीकडे आले आणि तिला ह्मणाले " हे पितृभगिनि, तुझ्या पुत्रांना सार्वभौमत्व प्राप्त होऊन ५८,५९ ते आज कृत-कृत्य व वैभवसंपन्न झाले आहेत. तेव्हां तूं आनंद मान. तुझी अनुज्ञा घेऊन आतां माझ्या मनांत द्वारकेस जाण्याचें आहे" ६०. ह्याप्रमाणें कुंतीला भेटल्यानंतर श्रीकृष्णांनीं (विचा-रपूस करून) सुभद्रा आणि द्रौपदी ह्यांनाही आनंदित केले आणि युधिष्ठिराबरोबर ते त्या अंतःपुरांतून बाहेर पडले ६१. तदनंतर स्नान व जपजाप्य आटोपून त्यांनीं ब्राह्मणांकडून स्वस्तिवाचन करविलें तों इतक्यांत उत्तम प्रकारच्या साहित्यानें युक्त असलेला मेघसदृश रथ ६२ जोडून महापराक्रमी दारुक सारथि द्वाराशीं येऊन ठेपला.

उपस्थितं रथं दृष्ट्वा तार्क्ष्यप्रवरकेतनम् ६३ प्रदक्षिणमुपावृत्य समारुह्य महामनाः । प्रययौ पुण्डरीकाक्षस्ततो द्वारवतीं पुरीम् ६४ तं पद्भ्यामनुवव्राज धर्मराजो युधिष्ठिरः । भ्रातृभिः सहितः श्रीमान्वासुदेवं महाबलम् ६५ ततो मुहूर्तं संगृह्य स्यन्दनप्रवरं हरिः । अब्रवीत्पुण्डरीकाक्षः कुन्तीपुत्रं युधिष्ठिरम् ६६ अप्रमत्तः स्थितो नित्यं प्रजाः पाहि विशांपते । पर्जन्यमिव भूतानि महाद्रुममिव द्विजाः ६७ बान्धवास्त्वोपजीवन्तु सहस्राक्षमिवामराः । कृत्वा परस्परेणैवं संविदं कृष्णपाण्डवौ ६८ अन्योन्यं समनुज्ञाप्य जग्मतुः स्वगृहान्प्रति । गते द्वारवतीं कृष्णे सात्वतप्रवरे नृप ६९ एको दुर्योधनो राजा शकुनिश्चापि सौबलः । तस्यां सभायां दिव्यायामूषतुस्तौ नरर्षभौ७० [१६५९] इति०सभापर्वणि शिशुपालवधपर्वणि शिशुपालवधे पञ्चचत्वारिंशोध्यायः॥४५॥समाप्तं च शिशुपालवधपर्व॥

अथ द्यूतपर्व ॥ वैशम्पायन उवाच ॥ समाप्ते राजसूये तु क्रतुश्रेष्ठे सुदुर्लभे। शिष्यैः परिवृतो व्यासः पुरस्तात्समपद्यत १ सोभ्ययादासनात्तूर्णं भ्रातृभिः

तेव्हां गरुडचिन्हांकित श्रेष्ठ ध्वजानें युक्त असलेला तो रथ तेथें आलेला अवलोकन केल्यावर ६३ महात्मे कमलनयन श्रीकृष्ण प्रदक्षिणापूर्वक त्या रथावर आरुढ होऊन द्वारकेस निघाले ६४. तेव्हां वैभवशाली धर्मराज युधिष्ठिर भ्रात्यांसहवर्तमान महाबलाढ्य वासुदेवांच्या मागोमाग पायांनीं जाऊं लागला असतां ६५ क्षणभर तो उत्कृष्ट रथ उभा करून कमलनयन श्रीहरि कुंतीपुत्र युधिष्ठिराला ह्मणाले ६६ " हे प्रजाधिपते, तूं नित्य दक्ष राहून प्रजांचें परिपालन करीत जा आणि प्राणी ज्याप्रमाणें उपजीविकेकरितां पर्जन्यावर अवलंबून असतात किंवा पक्षी ज्याप्रमाणें महावृक्षाच्या आश्रयाला राहतात६७ अथवा देव ज्याप्रमाणें स्वर्गाधिपति इंद्राचा आश्रय करून असतात त्याप्रमाणें बांधव तुझ्यावर अवलंबून राहोंत." ह्याप्रमाणें ते उभयतां श्रीकृष्ण व युधिष्ठिर परस्परांशीं संभाषण करून ६८ व परस्परांचा निरोप घेऊन आपआपल्या गृहाप्रत जाण्यास निघाले. असो. हे जनमेजयराजा, यादवश्रेष्ठ श्रीकृष्णही द्वारवती नगरीस परत गेल्यानंतर ६९ एक दुर्योधन राजा आणि दुसरा सुबलपुत्र शकुनि (त्याचा मातुल) हे मात्र ह्मणण्यासारखे (परस्थांपैकीं) दोघेजण त्या दिव्य सभेमध्यें राहिले७०. ह्याप्रमाणें०महाभारतांतर्गत सभापर्वांतील शिशुपालवधपर्वांपैकीं शिशुपालवधाविषयीं पंचेचाळिसावा अध्याय समाप्त झाला ॥ ४५ ॥ ह्या ठिकाणीं शिशुपालवधविषयक पर्वही संपूर्ण झालें॥

येथून द्यूतसंबंधीं पर्वाला आरंभ झाला. वैशंपायन सांगतातः—होण्यास फारच दुर्घट असा राजसूय क्रतु समाप्त झाल्यावर शिष्यगणांनीं परिवेष्टित व्यासमुनि

परिवारितः। पाद्येनासनदानेन पितामहमपूजयत् २ अथोपविश्य भगवान्काञ्चने परमासने । आस्यतामिति चोवाच धर्मराजं युधिष्ठिरम् ३ अथोपविष्टं राजानं भ्रातृभिः परिवारितम् । उवाच भगवान्व्यासस्तत्तद्वाक्यविशारदः ४ दिष्ट्या वर्धसि कौन्तेय साम्राज्यं प्राप्य दुर्लभम् । वर्धिताः कुरवः सर्वे त्वया कुरुकुलोद्वह ५ आपृच्छे त्वां गमिष्यामि पूजितोस्मि विशांपते । एवमुक्तः स कृष्णेन धर्मराजो युधिष्ठिरः ६ अभिवाद्योपसंगृह्य पितामहमथाब्रवीत् । युधिष्ठिर उवाच ॥ संशयो द्विपदां श्रेष्ठ ममोत्पन्नः सुदुर्लभः ७ तस्य नान्योस्ति वक्ता वै त्वामृते द्विजपुङ्गव । उत्पातस्त्रिविधान्प्राह नारदो भगवान्ऋषिः ८ दिव्यांश्चैवान्तरीक्षांश्च पार्थिवांश्च पितामह । अपि चैद्यस्य पतनाच्छन्नमौत्पातिकं महत् ९ वैशम्पायन उवाच ॥ राज्ञस्तु वचनं श्रुत्वा पराशरसुतः प्रभुः । कृष्णद्वैपायनो व्यास इदं वचनमब्रवीत् १० त्रयोदश समा राजन्नुत्पातानां फलं महत् । सर्वक्षत्रविनाशाय भविष्यति विशांपते ११ त्वामेकं कारणं कृत्वा कालेन भरत-

---

पुढें आले असतां १ भ्रात्यांनीं परिवेष्टित असलेला तो युधिष्ठिर सत्वर आसनावरून उठला आणि पाद्यपूर्वक आसन देऊन त्यानें आपले पितामह जे व्यास मुनि त्यांचा आदरसत्कार केला २. तदनंतर सुवर्णमय उत्कृष्ट आसनावर विराजमान झाल्यानंतर भगवान् व्यासमहर्षीनीं "बैस" ह्मणून धर्मराजाला सांगितलें ३ आणि भ्रात्यांनीं परिवेष्टित असलेला तो धर्मराज युधिष्ठिर बसल्यानंतर संभाषण करण्यांत निपुण असलेले ते भगवान् व्यासमुनि त्याला ह्मणाले ४ " हे कुंतीपुत्रा, दुर्लभ असें साम्राज्य प्राप्त होऊन तुझा अभ्युदय होत आहे ही मोठी आनंदाची गोष्ट आहे. हे कुरुवंशजश्रेष्ठा, तूं खरोखर सर्व कुरुवंशजांची कीर्ति वृद्धिंगत केली आहेस ५. हे प्रजाधिपते, माझा सत्कार झाला आहे. करितां, मी आतां तुझी अनुज्ञा घेऊन गमन करितों." ह्याप्रमाणें व्यासमुनींनीं सांगितल्यानंतर धर्मराज युधिष्ठिर ६ अभिवंदनपूर्वक पितामह व्यासमुनींचें चरण धरून त्यांना ह्मणाला " हे पुरुषश्रेष्ठ, निवृत्त होण्यास फारच कठीण असा मला एक संशय उत्पन्न झाला आहे ७ व हे द्विजश्रेष्ठ, त्याचें निरसन करणारा आपणांवांचून दुसरा कोणीही नाहीं. हे पितामह, भगवान् नारदमुनींनीं स्वर्ग, अंतरिक्ष आणि पृथ्वी ह्यांसंबंधाचे तीन प्रकारचे उत्पात सांगितले आहेत. तेव्हां चेदिराज शिशुपालाच्या मरणानेंच उत्पातसंबंधीं मोठें अरिष्ट टळलें कीं काय?" ८,९. वैशंपायन सांगतातः—ह्याप्रमाणें युधिष्ठिरराजाचें भाषण श्रवण करून प्रभु पराशरपुत्र कृष्णद्वैपायन व्यास ह्मणाले १० " हे प्रजाधिपते युधिष्ठिरराजा, तेरा वर्षेपर्यंत उत्पातांचें

र्षभ । समेतं पार्थिवं क्षत्रं क्षयं यास्यति भारत । दुर्योधनापराधेन भीमार्जुनबलेन च १२ स्वप्ने द्रक्ष्यसिराजेन्द्र क्षपान्ते त्वं वृषध्वजम् । नीलकण्ठं भवं स्थाणुं कपालिं त्रिपुरान्तकम् १३ उग्रं रुद्रं पशुपतिं महादेवमुमापतिम्। हरं शर्वं वृषं शूलं पिनाकिं कृत्तिवाससम् १४ कैलासकूटप्रतिमं वृषभेवस्थितं शिवम् । निरीक्षमाणं सततं पितृराजाश्रितां दिशम् १५ एवमीदृशकं स्वप्नं द्रक्ष्यसि त्वं विशांपते । मा तत्कृते ह्यनुध्याहि कालो हि दुरतिक्रमः १६ स्वस्ति तेस्तु गमिष्यामि कैलासं पर्वतं प्रति । अप्रमत्तः स्थितो दान्तः पृथिवीं परिपालय १७ वैशम्पायन उवाच ॥ एवमुक्त्वा स भगवान्कैलासं पर्वतं ययौ। कृष्णद्वैपायनो व्यासः सह शिष्यैः श्रुतानुगैः १८ गते पितामहे राजा चिन्ताशोकसमन्वितः । निःश्वसन्नुष्णमसकृत्तमेवार्थं विचिन्तयन् १९ कथं तु दैवं शक्येत पौरुषेण प्रबाधितुम् । अवश्यमेव भविता यदुक्तं परमर्षिणा २० ततोब्रवीन्महातेजाः सर्वान्भ्रातॄन्युधिष्ठिरः । श्रुतं वै पुरुषव्याघ्रा यन्मां द्वैपायनो-

---

मोठें भयंकर फल येईल आणि सर्व क्षत्रिय जातीचा संहार हा त्याचा परिणाम होईल ११. सारांश, हे भरतवंशजश्रेष्ठा भारता, एक तूं कारणीभूत होऊन दुर्योधनाच्या अपराधामुळें व भीमार्जुनांच्या बलामुळें सर्व क्षत्रियसमुदाय एकत्र जुळून नाश पावेल १२. हे नृपश्रेष्ठा, प्रभातकालाच्या सुमारास तुला एक स्वप्न पडेल आणि त्या स्वप्नांत वृषध्वज, नीलकंठ, भव, स्थाणु, कपालि, त्रिपुरांतक १३, उग्र, रुद्र, पशुपति, महादेव, उमापति, हर, शर्व, वृष, शूल, पिनाकी व कृतिवास १४ असा जो कैलासपर्वताच्या शिखरासारिख्या शुभ्रवर्णानें युक्त असलेला शिव तो वृषभावर आरूढ होऊन एकसारखा दक्षिणदिशेस निरीक्षण करीत आहे—असें तूं अवलोकन करशील १५. तात्पर्य, हे प्रजाधिपते, हें अथवा अशाप्रकारचें स्वप्न तूं अवलोकन करशील. परंतु, तूं त्याकरितां चिंता करीत बसूं नको. कारण, कालाचें उल्लंघन होणें दुर्घट आहे १६. तुझें कल्याण असो. मी आतां कैलासपर्वताकडे गमन करितों. तूं जितेंद्रिय व दक्ष राहून पृथ्वीचें परिपालन कर " १७. वैशंपायन सांगतातः—ह्याप्रमाणें युधिष्ठिराला सांगून भगवान् कृष्णद्वैपायनव्यास वेदाभ्यासी शिष्यांसहवर्तमान कैलासपर्वतावर गेले १८. ते पितामह व्यासमुनि गेल्यानंतर तो युधिष्ठिर राजा चिंताग्रस्त व शोकाकुल होऊन दुःखानें सुस्कारे टाकूं लागला आणि " पौरुष प्रयत्नानें दैव हाणून पाडणें शक्य कसें होणार ? तेव्हां महर्षि व्यास मुनींनीं जें सांगितलें तें निःसंशय घडून येणारच " अशाप्रकारें वारंवार त्याच गोष्टीचें मनन करूं लागला १९,२०. असो. ह्याप्रमाणें चिंतन केल्यानंतर तो महातेजस्वी युधिष्ठिर (नकुलसहदेवांसुद्धां) आपल्या सर्व भ्रात्यांना

ब्रवीतु २१ तदा तद्वचनं श्रुत्वा मरणे निश्चिता मतिः । सर्वक्षत्रस्य निधने यद्यहं हेतुरीप्सितः २२ कालेन निर्मितस्तात को ममार्थोस्ति जीवतः । एवं ब्रुवन्तं राजानं फाल्गुनः प्रत्यभाषत २३ मा राजन्कश्मलं घोरं प्राविशो बुद्धिनाशनम् । संप्रधार्य महाराज यत्क्षमं तत्समाचर २४ ततो-ब्रवीत्सत्यधृतिर्भ्रातॄन्सर्वान्युधिष्ठिरः । द्वैपायनस्य वचनं तत्रैव समचिन्तयन् २५ अद्यप्रभृति भद्रं वः प्रतिज्ञां मे निबोधत । त्रयोदश समास्तात को ममार्थोस्ति जीवतः २६ न प्रवक्ष्यामि परुषं भ्रातॄनन्यांश्च पार्थिवान् । स्थितो निदेशे ज्ञातीनां योक्ष्ये तत्समुदाहरन् २७ एवं मे वर्तमानस्य स्वेषु तेष्वितरेषु च । भेदो न भविता लोके भेदमूलो हि विग्रहः २८ विग्रहं दूरतो रक्षन्प्रियाण्येव समाचरन् । वाच्यतां न गमिष्यामि लोकेषु मनुजर्षभाः २९ भ्रातुर्ज्येष्ठस्य वचनं पाण्डवाः संनिशम्य तत् । तमेव समवर्तन्त धर्मराजहिते रताः ३० संसत्सु समयं कृत्वा धर्मराट् भ्रातृभिः

ह्मणाला " हे पुरुषश्रेष्ठहो, द्वैपायन मुनींनीं मला जें सांगितलें तें तुह्मीं श्रवण केलेंच आहे २१. परंतु, तें त्यांचें भाषण श्रवण केल्यापासून माझा तर मरणाविषयींच निश्चय झालेला आहे. कारण, बाबांनों, सर्व क्षत्रियांच्या मृत्यूला हेतु ह्मणून कालानेंच जर बुद्धिपूर्वक माझी योजना केलेली आहे तर माझा जिवंत राहून तरी काय उपयोग आहे ? " ह्याप्रमाणें युधिष्ठिर राजा बोलूं लागला असतां अर्जुन त्याला ह्मणाला २२,२३ " हे राजा, बुद्धीला भ्रंश पाडणाऱ्या घोरमोहामध्यें तूं शिरूं नको. हे महाराजा, व्यास मुनींनीं सांगितलेलें लक्ष्यांत ठेवून जें करणें उचित असेल तें तूं कर " २४. ह्यानंतर द्वैपायन मुनींच्या भाषणाचें चिंतन करीत असलेला तो सत्यनिष्ठ युधिष्ठिर त्या ठिकाणींच सर्व भ्रात्यांना ह्मणाला २५ " तुमचें कल्याण असो. आजपासून माझी प्रतिज्ञा तुह्मी ऐकून ठेवा. बाबांनों, तेरा वर्षें पर्यंत तरी वाचून मला काय कर्तव्य आहे? २६. असो. मी आजपासून भ्रात्यांशीं व इतरही भूपालांशीं कठोर भाषण न करितां ज्ञातिबांधवांच्या आज्ञेंत राहीन आणि काय जें करावयाचें तें त्यांना सांगून करीत जाईन २७. सारांश, ह्याचप्रकारानें मी आपल्या पुत्रांशीं व इतरांशीं वागेन ह्मणजे मतभेद मुळीं होणारच (नसून कलहही होणार) नाहीं. कारण, जगतामध्यें मतभेद हेंच कलहाचें मूळ असतें २८. करितां, अशारीतीनें कलहापासून दूर राहून लोकांना प्रिय असेल तेंच मी करूं लागलों ह्मणजे हे पुरुषश्रेष्ठहो, मी लोकांमध्यें कोणाच्या निंदेसही पात्र होणार नाहीं " २९. ह्याप्रमाणें आपल्या ज्येष्ठ भ्रात्याचें तें ह्मणणें लक्ष्यपूर्वक ऐकून घेऊन धर्मराजाच्या हिताविषयीं तत्पर असलेले

सह । पितॄंस्तर्प्य यथान्यायं देवताश्च विशां पते ३१ कृतमङ्गलकल्याणो भ्रातृभिः परिवारितः । गतेषु क्षत्रियेन्द्रेषु सर्वेषु भरतर्षभ ३२ युधिष्ठिरः सहामात्यः प्रविवेश पुरोत्तमम् ३३ दुर्योधनो महाराज शकुनिश्चापि सौबलः । सभायां रमणीयायां तत्रैवास्ते नराधिप ३४ [१६९३] इति० सभापर्वणि द्यूतपर्वणि युधिष्ठिरसमये षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

वैशम्पायन उवाच ॥ वसन्दुर्योधनस्तस्यां सभायां पुरुषर्षभ । शनैर्ददर्श तां सर्वां सभां शकुनिना सह १ तस्यां दिव्यानभिप्रायान्ददर्श कुरुनन्दनः । न दृष्टपूर्वा ये तेन नगरे नागसाह्वये २ स कदाचित्सभामध्ये धार्तराष्ट्रो महीपतिः । स्फाटिकं स्थलमासाद्य जलमित्यभिशङ्कया ३ स्ववस्त्रोत्कर्षणं राजा कृतवान्बुद्धिमोहितः । दुर्मना विमुखश्चैव परिचक्राम तां सभाम् ४ ततः स्थले निपतितो दुर्मना व्रीडितो नृपः । निःश्वसन्विमुखश्चापि परिचक्राम तां सभाम् ५ ततः स्फाटिकतोयां वै स्फाटिकाम्बुजशोभिताम् । वापीं मत्वा स्थलमिव सवासाः प्रापतज्जले ६ जले निपतितं

पांडुपुत्र त्याच्याच अनुरोधानें वागूं लागले १०. हे जनमेजयराजा, भ्रात्यांसहवर्तमान त्या सभेमध्यें अशी प्रतिज्ञा केल्यावरून धर्मराजानें यथाविधि पितर आणि देव ह्यांचें संतर्पण केलें ११. असो. हे भरतवंशजश्रेष्ठा, सर्व श्रेष्ठ श्रेष्ठ क्षत्रिय परत गेल्यानंतर भ्रात्यांनीं परिवेष्टित असलेला तो युधिष्ठिर मंगलकारक आणि कल्याणप्रद असें पुण्याहवाचन वगैरे करवून अमात्यासहवर्तमान आपल्या उत्कृष्ट नगरामध्यें प्रविष्ट झाला ३२,३३ आणि, हे प्रजाधिपते जनमेजयमहाराजा, दुर्योधन आणि सुबलपुत्र शकुनि हे तेथें त्या रमणीय सभेमध्येंच (कांहीं कालपर्यंत) राहिले ३४. ह्याप्रमाणें० सभापर्वांतील द्यूतपर्वापैकीं युधिष्ठिराच्या प्रतिज्ञेविषयीं शेहेचाळिसावा अध्याय समाप्त झाला ॥ ४६ ॥

वैशंपायन सांगतातः—हे पुरुषश्रेष्ठा जनमेजया, त्या सभेमध्यें असलेल्या दुर्योधनानें हळूं हळूं ती सर्व सभा शकुनीसहवर्तमान अवलोकन केली १. तेव्हां हास्तिनपुरनामक नगरामध्यें पूर्वी न पाहिलेले असे कांहीं दिव्य चमत्कार त्या कुरुनंदनानें पाहिले २. एकदां तो धृतराष्ट्रपुत्र भूपति त्या सभेमध्यें स्फटिकमय बनविलेल्या स्थलासमीप गेला असतां त्याला हें जल असावें असें वाटलें ३ व त्यामुळें त्या राजानें फसून जाऊन आपलें वस्त्र वर केलें आणि तो खिन्न व निस्तेज होऊन त्या सभेमध्यें हिंडूं लागला ४. ह्याप्रमाणें फसल्यानंतर स्थलावरच असलेला तो दुर्योधन खिन्न, लज्जित व निस्तेज होऊन दुःखाचे सुस्कारे टाकीत टाकीत तसाच त्या सभेमध्यें हिंडूं लागला असतां ५ स्फाटिकासारख्या स्वच्छ जलानें युक्त असून स्फटिकासारख्याच शुभ्रवर्ण कमलांनीं

दृष्ट्वा भीमसेनो महाबलः । जहास जहसुश्चैव किंकराश्च सुयोधनम् ॥ वासांसि च शुभान्यस्मै प्रददू राजशासनात् ७ तथागतं तु तं दृष्ट्वा भीमसेनो महाबलः । अर्जुनश्च यमौ चोभौ सर्वे ते प्राहसंस्तदा ८ नामर्षयत्ततस्तेषामवहासममर्षणः । आकारं रक्षमाणस्तु न स तान्समुदैक्षत ९ पुनर्वसनमुत्क्षिप्य प्रतरिष्यन्निव स्थलम् । आरुरोह ततः सर्वे जहसुश्च पुनर्जनाः १० द्वारं तु पिहिताकारं स्फाटिकं प्रेक्ष्य भूमिपः । प्रविशन्नाहतो मूर्ध्नि व्याघूर्णित इवस्थितः ११ तादृशं च परं द्वारं स्फाटिकोरुकपाटकम् । विघट्टयन्कराभ्यां तु निष्क्रम्याग्रे पपात ह १२ द्वारं तु वितताकारं समापेदे पुनश्च सः । तद्वृत्तं चेति मन्वानो द्वारस्थानादुपारमत् १३ एवं प्रलम्भान्विविधान्प्राप्य तत्र विशां पते । पाण्डवेयाभ्यनुज्ञातस्ततो

सुशोभित अशी बापी पुढें असतांना तें स्थलच आहे असें समजून तो वस्त्रप्रावरणांसह उदकामध्यें पडला ६. जलामध्यें त्याला पडलेला अवलोकन करून महाबलाढ्य भीमसेनाला हसूं आलें व तेथील सेवकही हसूं लागले. नंतर राजाच्या आज्ञेवरून त्या दुर्योधनाला सेवकांनीं शुभ वस्त्रें आणून दिलीं ७. असो. त्याप्रमाणें उपहासास्पद झालेल्या त्या दुर्योधनाला अवलोकन करून महाबलाढ्य भीमसेन, अर्जुन व उभयतां नकुलसहदेव ह्या सर्वांनाच हंसें कोसळलें ८. तथापि क्रुद्ध दुर्योधनानें त्यांच्या हास्याकडे लक्ष्य दिलें नाहीं इतकेंच नव्हें परंतु, क्रुद्ध झालेली मुद्रा इतरांच्या लक्ष्यांत न यावी ह्मणून त्यानें त्यांच्याकडे वर तोंड करून पाहिलें देखील नाहीं ९. इतक्यांत जातां जातां पुनरपि उदकाचा भास होऊन त्यांतून पलीकडे जाण्याच्या उद्देशानें दुर्योधन राजा आपलें वस्त्र वर सावरून धरून स्थलावरूनच चालूं लागला असतां पुनरपि समीप असलेले सर्व लोक त्याला हंसले १०. तेथून पुढें जातां जातां एक भिंत समोर असतांना आकृति समजण्यांत न येण्यासारखें येथें एक स्फटिकमय द्वारच आहे असें समजून दुर्योधन निःशंकपणें आंत शिरूं लागला तेव्हां भिंतीवर मस्तक हापटून तिरमिरी आल्यामुळें कांहीं वेळ त्याला तेथें थांबावेंच लागलें ११. नंतर पुढें जाऊं लागला तों तशाच प्रकारचें मोठमोठ्या स्फटिकाच्या फळ्यांनीं युक्त असें एक द्वार बंद केलेलें पुढें आहेसें पाहून हातांनीं तें उघडूं लागला असतां (द्वार वास्तविक बंद केलेलें नसल्यामुळें) तो झोक जाऊन पुढें तोंडघशीं पडला १२. तदनंतर तसाच पुढें जाऊं लागला असतां पुनरपि वास्तविकच उघडलेलें असें एक द्वार लागलें; परंतु, ह्यांतहीं कांहीं पूर्वीप्रमाणेंच विपरीत असेल ह्मणजे वस्तुतः हें द्वार लावलेलेंच असेल असें समजून सरळ आंत न शिरतां द्वाराशींच तो थबकून राहिला १३. सारांश, हे जनमेजय राजा,

दुर्योधनो नृपः १४ अप्रहृष्टेन मनसा राजसूये महाक्रतौ । प्रेक्ष्य तामद्भुतामृद्धिं जगाम गजसाह्वयम् १५ पाण्डवश्रीप्रतप्तस्य ध्यायमानस्य गच्छतः। दुर्योधनस्य नृपतेः पापा मतिरजायत १६ पार्थान्सुमनसो दृष्ट्वा पार्थिवांश्च वशानुगान् । कृत्स्नं चापि हितं लोकमाकुमारं कुरूद्वह १७ महिमानं परं चापि पाण्डवानां महात्मनाम् । दुर्योधनो धार्तराष्ट्रो विवर्णः समपद्यत १८ स तु गच्छन्ननेकाग्रः सभामेकोन्वचिन्तयत् । श्रियं च तामनुपमां धर्मराजस्य धीमतः १९ प्रमत्तो धृतराष्ट्रस्य पुत्रो दुर्योधनस्तदा । नाभ्यभाषत्सुबलजं भाषमाणं पुनः पुनः २० अनेकाग्रं तु तं दृष्ट्वा शकुनिः प्रत्यभाषत । दुर्योधन कुतोमूलं निःश्वसन्निव गच्छसि २१ दुर्योधन उवाच ॥ दृष्ट्वेमां पृथिवीं कृत्स्नां युधिष्ठिरवशानुगाम् । जितामस्त्रप्रतापेन श्वेताश्वस्य महात्मनः २२ तं च यज्ञं तथाभूतं दृष्ट्वा पार्थस्य मातुल। यथा शक्रस्य देवेषु तथाभूतं महाद्युतेः २३ अमर्षेण तु संपूर्णो दह्यमानो

ह्याप्रमाणें नानाप्रकारांनीं उपहासास्पद झाल्यानंतर दुर्योधन राजाला पांडुपुत्रांनीं जाण्याविषयीं अनुज्ञा दिली १४ असो. राजसूयसंज्ञक महाक्रतूंतील पांडवांची ती अद्भुत संपत्ति आनंदरहित मनानेंच अवलोकन करून तो हास्तिनपुराप्रत परत गेला १५. पांडवांचें वैभव पाहून संतप्त झालेला तो दुर्योधन राजा एकसारखा त्याच गोष्टीचें चिंतन करीत करीत जाऊं लागला असतां त्याच्या अंतःकरणामध्यें पाप बुद्धि उत्पन्न झाली १६. हे कुरुकुलोद्धारका जनमेजय राजा, कुंतीपुत्र आनंदित झाले असून (पृथ्वीतील सर्व) राजे त्यांना वश होऊन राहिले आहेत इतकेंच नव्हे परंतु, मुलाबाळांपर्यंत पृथ्वींतील सर्व लोक त्यांच्या हितावर असून १७ महात्म्या पांडवांची कीर्तिही पराकाष्ठेची झाली आहे असें अवलोकन केल्यावर धृतराष्ट्रपुत्र दुर्योधन निस्तेज झाला १८ आणि अंतःकरणामध्यें क्षुब्ध होऊन (शकुनि बरोबर आहे किंवा नाहीं ह्याचेंही भान नसल्यामुळें जसा कांहीं) एकटाच हास्तिनपुरास तो परत जाऊं लागला असतां विचारी धर्मराजाची ती अनुपम संपत्ति आणि सभा ह्यांवांचून त्याच्या मनांत दुसरें कांहीं येईनाच १९ व सुबलपुत्र शकुनि वारंवार बोलत असतांनाही बेफाम होऊन चाललेला तो धृतराष्ट्रपुत्र दुर्योधन त्याच्याशींही कांहीं भाषण करीना २०. तेव्हां हा अगदीं क्षुब्ध झालेला आहे असें अवलोकन करून " हे दुर्योधना, तूं मुस्कारे टाकीत कां चालला आहेस ? " ह्मणून शकुनीनें त्याला विचारिलें असतां २१ दुर्योधन ह्मणतोः—महात्म्या अर्जुनाच्या प्रतापामुळें जिंकिलेली ही संपूर्ण पृथ्वी युधिष्ठिराच्या आज्ञेंत वागत आहे २२ असें दृष्टोत्पत्तीस आल्यापासून आणि देवांमध्यें झालेल्या इंद्राच्या यज्ञाप्रमाणें

दिवानिशम् । शुचिशुक्रागमे काले शुष्येत्तोयमिवाल्पकम् २४ पश्य सात्वतमुख्येन शिशुपालो निपातितः । न च तत्र पुमानासीत्काश्चित्तस्य पदानुगः २५ दह्यमाना हि राजानः पाण्डवोत्थेन वह्निना । क्षान्तवन्तोपराधं ते को हि तत्क्षन्तुमर्हति २६ वासुदेवेन तत्कर्म यथायुक्तं महत्कृतम् । सिद्धं च पाण्डुपुत्राणां प्रतापेन महात्मनाम् २७ तथा हि रत्नान्यादाय विविधानि नृपा नृपम् । उपातिष्ठन्त कौन्तेयं वैश्या इव करप्रदाः २८ श्रियं तथागतां दृष्ट्वा ज्वलन्तीमिव पाण्डवे । अमर्षवशमापन्नो दह्यामि न तथोचितः २९ एवं स निश्चयं कृत्वा ततो वचनमब्रवीत् । पुनर्गान्धारनृपतिं दह्यमान इवाग्निना ३० वह्निमेव प्रवेक्ष्यामि भक्षयिष्यामि वा विषम् । अपो वापि प्रवेक्ष्यामि न हि शक्ष्यामि जीवितुम् ३१ को हि नाम पुमाँल्लोके मर्षयिष्यति सत्त्ववान् । सपत्नानृध्यतो दृष्ट्वा हीनमात्मानमेव च ३२ सोहं नस्त्री न चाप्यस्त्री न पुमान्नापुमानपि । योहं तां मर्षयाम्यद्य तादृशीं

महातेजस्वी कुंतीपुत्र युधिष्ठिराचा तो यज्ञ झालेला अवलोकन केल्यापासून, हे मातुला २३, क्रोधानें मी अगदीं व्याप्त झालों असल्यामुळें रात्रंदिवस माझ्या अंगाची एकसारखी आग होत आहे आणि ग्रीष्मऋतु समीप आला असतां अल्प तोयानें युक्त असलेला जलाशय ज्याप्रमाणें शुष्क होऊन जातो तशी माझी अवस्था झाली आहे २४ पहा बरें, यादवश्रेष्ठ श्रीकृष्णानें शिशुपालाचा वध केला असून त्याचा प्रतीकार करणारा कोणीही पुरुष त्या सभेमध्यें निघाला नाहीं २५. अरे, पांडवांपासून निघालेल्या अग्नीनें राजांच्या अंगाचा भडका झाला असूनही त्यांनीं त्यांचा अपराध सहन केला. परंतु, वास्तविक पाहिलें असतां तें त्यांचें वर्तन कोणाला तरी सहन होण्यासारखें होतें काय ? २६. तात्पर्य, वासुदेवानें तें मोठेंच अयोग्य कृत्य केलें आणि महात्म्या पांडुपुत्रांच्या प्रतापामुळें तें शेवटासही गेलें २७. (हे मातुला) कर घेऊन येणाऱ्या वैश्यांप्रमाणें नानाप्रकारचीं रत्नें घेऊन प्रत्यक्ष भूपति त्या धर्मराजाकडे त्या यज्ञसमयीं आले २८. सारांश, पांडुपुत्र युधिष्ठिराचे ठिकाणीं असलेली तशा प्रकारची उज्ज्वल संपत्ति अवलोकन केल्यापासून मी क्रोधवश होऊन आंतल्या आंत जळफळूं लागलों आहें. परंतु, ह्याप्रमाणें नुसतें जळफळत राहणें योग्य नाहीं २९. ह्याप्रकारें मनामध्यें आणून अग्नीनें जसा कांहीं जळतच असलेला तो दुर्योधन पुनरपि गांधारदेशाधिपति शकुनीला ह्मणाला ३०. " करितां, अग्निप्रवेश, विषभक्षण अथवा उदकनिमज्जन ह्यापैकीं कांहीं तरी मी करून घेतों. माझ्यानें आतां जीव ठेववत नाहीं ३१. कारण, शत्रूंचा उत्कर्ष व आपला अपकर्ष होत असलेला अवलोकन करणें जगतामध्यें कोणत्या बरें अभिमानी

श्रियमागताम् ३३ ईश्वरत्वं पृथिव्याश्च वसुमत्तां च तादृशीम् । यज्ञं च तादृशं दृष्ट्वा मादृशः को न संज्वरेत् ३४ अशक्तश्चैक एवाहं तामाहर्तुं नृपश्रियम् । सहायांश्च न पश्यामि तेन मृत्युं विचिन्तये ३५ दैवमेव परं मन्ये पौरुषं च निरर्थकम् । दृष्ट्वा कुन्तीसुते शुद्धां श्रियं तामहतां तथा ३६ कृतो यत्नो मया पूर्वं विनाशे तस्य सौबल । तच्च सर्वमतिक्रम्य संवृद्धोऽस्मिन्व पङ्कजम् ३७ तेन दैवं परं मन्ये पौरुषं च निरर्थकम् । धार्तराष्ट्राश्च हीयन्ते पार्था वर्धन्ति नित्यशः ३८ सोहं श्रियं च तां दृष्ट्वा सभां तां च तथाविधाम् । रक्षिभिश्चावहासं तं परितप्ये यथाग्निना ३९ स माम-भ्यनुजानीहि मातुलाद्य सुदुःखितम् । अमर्षं च समाविष्टं धृतराष्ट्रे निवे-

---

पुरुषाला सहन होईल ? ३२. खरोखर पांडवांना प्राप्त झालेलें तें वैभव अवलोकन करणाऱ्या माझी स्थिति धड स्त्री नव्हे, पुरुष नव्हें आणि नपुंसकही नव्हें अशा प्रकारची सांप्रत झालेली आहे (स्त्री आहें ह्मणून ह्मणावें तर स्त्रिया ज्याप्रमाणें सवतीचा उत्कर्ष निमूटपणें सहन करितात त्याप्रमाणें पांडवांचा उत्कर्ष माझ्यानें सहन करवत नाहीं; पुरुष आहें ह्मणावें तर मी बलाचें अवलंबन करून पांडवांना जिंकण्यास समर्थ नाहीं आणि नपुंसक आहें ह्मणून ह्मणावें तर अगदींच सामर्थ्यहीन आहें असेंही नाहीं) ३३. अरे, सर्व पृथ्वीचें स्वामित्व, तशाप्रकारचें वैभव आणि तसा यज्ञ अवलोकन करून माझ्यासारख्या कोणत्या बरें (अभिमानी) पुरुषाच्या अंगाचा दाह होणार नाहीं ? ३४. (परंतु, करूं काय ?) ती राजसंपत्ति हरण करून आणण्यास मी एकटा असमर्थ आहें आणि साहाय्य करणारेही मला कोणी दिसत नाहींत. तेव्हां मृत्यूविषयीं मी मनामध्यें आणीत आहें ३५. (अरे ! इतका अट्टहास केला असतांही शेवटीं) कुंतीपुत्र युधिष्ठिराला ती शुद्ध व अविच्छिन्न संपत्ति प्राप्त झाल्याचें पाहून "दैवच श्रेष्ठ आहे ; पौरुष यत्नांत कांहीं अर्थ नाहीं" असें मला निश्चित वाटूं लागलें आहे ३६. हे, सौबला, मी त्या युधिष्ठिराचा नाश करण्याकरितां पूर्वी यत्नही केला होता. परंतु, त्या सर्वाला न जुमानितां उदकांत वृद्धिंगत होणाऱ्या कमलाप्रमाणें तो वृद्धिंगत झालाच ३७. ह्मणून दैवच बलवत्तर असून पौरुष व्यर्थ आहे असें मला वाटतें. कारण, कुंतीपुत्रांचा नित्य उत्कर्ष होत असून धृतराष्ट्रपुत्रांचें मान उत्तरोत्तर कमी होत चाललें आहे ३८. सारांश, वर सांगितल्याप्रमाणें धड स्त्री, पुरुष अथवा नपुंसक नसलेल्या माझ्या अंगाचा--ती संपत्ति व तशाप्रकारची ती अद्भुत सभा अवलोकन केल्यापासून आणि सभारक्षकांच्याही उपहासास पात्र झाल्यापासून--जसा कांहीं अग्नीनेंच कीं काय अगदीं भडका होऊन राहिलेला आहे ३९. तस्मात्, हे मातुला, अत्यंत दुःखित झालेल्या मला तूं

दय ४० [१७३३] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सभापर्वणि द्यूतपर्वणि दुर्योधनसंतापे सप्तचत्वारिंशोध्यायः ॥ ४७ ॥

शकुनिरुवाच ॥ दुर्योधन न तेमर्षः कार्यः प्रति युधिष्ठिरम् । भागधेयानि हि स्वानि पाण्डवा भुञ्जते सदा १ विधानं विविधाकारं परं तेषां विधानतः । अनेकैरभ्युपायैश्च त्वया न शकिताः पुरा २ आरब्धापि महाराज पुनः पुनररिन्दम । विमुक्ताश्च नरव्याघ्रा भागधेयपुरस्कृताः ३ तैर्लब्धा द्रौपदी भार्या द्रुपदश्च सुतैः सह । सहायः पृथिवीलाभे वासुदेवश्च वीर्यवान् ४ लब्धश्चानभिभूतार्थैः पित्र्यांशः पृथिवीपते । विवृद्धस्तेजसा तेषां तत्र का परिदेवना ५ धनंजयेन गाण्डीवमक्षय्यौ च महेषुधी । लब्धान्यस्त्राणि दिव्यानि तोषयित्वा हुताशनम् ६ तेन कार्मुकमुख्येन बाहुवीर्येण चात्मनः । कृता वशे महीपालास्तत्र का परिदेवना ७ अग्निदाहान्मयं चापि मोक्षयित्वा स दानवम् । सभां तां कारयामास सव्यसाची परंतपः ८ तेन चैव मयेनोक्ताः किंकरा नाम राक्षसाः । वहन्ति

आपला आज पूर्वी सांगितल्याप्रमाणें दुःखांतून सुटका करून घेण्याची अनुज्ञा दे आणि मला संताप झाल्याविषयीं धृतराष्ट्राला निवेदन कर ४०. ह्याप्रमाणें० श्रीमहाभारतांतर्गत सभापर्वांतील द्यूतपर्वांपैकीं दुर्योधनाच्या संतापाविषयीं चाळिसावा अध्याय समाप्त झाला ॥४०॥

शकुनि ह्मणतोः—हे दुर्योधना, तुला युधिष्ठिराशीं मत्सर करण्याचें कांहीं कारण नाहीं. अरे, पांडवांना हें सर्वदां त्यांच्या स्वकर्मांचेंच फल प्राप्त होत आहे १. त्यांच्या उपायापेक्षां तूं पूर्वी अनेक प्रकारचे उपाय योजून पाहिलेस. परंतु, त्या अनेक उपायांनींही त्यांचा नाश करणें तुला शक्य झालें नाहीं २. हे महाराज शत्रुनाशका, तूं अनेक वेळां त्यांना संकटांत आणिलेंस ; परंतु, दैवाच्या बलावर ते पुरुषश्रेष्ठ पुनः पुनः त्या त्या संकटांतून मुक्त झाले ३. द्रौपदी त्यांना भार्या प्राप्त शाली, पुत्रांसहवर्तमान द्रुपदराजाही त्यांना मिळाला आणि वीर्यवान् वासुदेवही पृथ्वीचा लाभ होण्यास त्यांना साहाय्यभूत झाला ४. सारांश, हे पृथिवीपते, ज्यांचा कोणताही मनोरथ व्यर्थ झाला नाहीं अशा त्या पांडुपुत्रांना राज्यसंबंधीं पैतृक अंश प्राप्त होऊन त्यांच्या तेजानें तो वृद्धिंगत झाला आहे तेव्हां ह्यामध्यें दुःख मानण्याचें कारण काय? ५. अग्नीला संतुष्ट करून अर्जुनानें गांडीव धनुष्य, मोठेमोठे दोन अक्षय्य भाते आणि दिव्य अस्त्रें हीं प्राप्त करून घेतलीं ६ आणि त्या श्रेष्ठ धनुष्यानें व आपल्या बाहुवीर्यानें त्यानें सर्व भूपाल पादाक्रांत केले. परंतु, ह्याविषयीं शोक करीत बसण्याचें प्रयोजन काय? ७. त्याचप्रमाणें अग्नीच्या दाहापासून मयासुराला सोडवून त्या शत्रुविजयी अर्जुनानें

तां सभां भीमास्तत्र का परिदेवना ९ यच्चासहायतां राजन्नुक्तवानसि भारत । तन्मिथ्या भ्रातरो ह्यमे तव सर्वे वशानुगाः १० द्रोणस्तव महेष्वासः सह पुत्रेण वीर्यवान् । सूतपुत्रश्च राधेयो गौतमश्च महारथः ११ अहं च सह सोदर्यैः सौमदत्तिश्च पार्थिवः । एतैस्त्वं सहितः सर्वैर्जय कृत्स्नां वसुन्धराम् १२ दुर्योधन उवाच ॥ त्वया च सहितो राजन्नेतैश्चान्यैर्महारथैः । एतानेव विजेष्यामि यदि त्वमनुमन्यसे १३ एतेषु विजितेष्वद्य भविष्यति मही मम । सर्वे च पृथिवीपालाः सभा सा च महाधना १४ शकुनिरुवाच ॥ धनंजयो वासुदेवो भीमसेनो युधिष्ठिरः । नकुलः सहदेवश्च द्रुपदश्च सहात्मजैः १५ नैते युधि पराजेतुं शक्या देवगणैरपि । महारथा महेष्वासाः कृतास्त्रा युद्धदुर्मदाः १६ अहं तु तद्विजानामि विजेतुं येन शक्यते । युधिष्ठिरं स्वयं राजंस्तन्निबोध जुषस्व च १७ दुर्योधन उवाच ॥ अप्रमादेन सुहृदामन्येषां च महात्मनाम् । यदि शक्या विजेतुं ते

त्याच्याकडून ती सभा निर्माण करविली ८ व ती सभा मयासुरानें सांगितलें असतां किंकरनामक घोर राक्षस (हवी तिकडे) नेत असतात. तेव्हां ह्याविषयीं खेद करण्यांत काय अर्थ आहे ? ९. परंतु, हे भरतकुलोत्पन्ना दुर्योधनराजा, कोणाचें साहाय्य नाहीं असें जें तूं ह्मणालास तें मात्र मिथ्या आहे. कारण, हे भ्राते सर्व तुझ्या आज्ञेनें वागणारे आहेत १०. महाधनुर्धारी द्रोण पुत्रासहवर्तमान तुझ्या वचनांत असून वीर्यवान् सूतपुत्र कर्ण व महारथी कृपाचार्य हेही तूं सांगशील तसे वागणारे आहेत ११ आणि सहोदर भ्रात्यांसहवर्तमान मी व राजा सौमदत्ति हे आह्मीही त्याचप्रमाणें तुझ्या बाहेर नाहीं. तेव्हां ह्या सर्वांच्या साहाय्यानें तूं संपूर्ण पृथ्वी जिंकून घे १२. दुर्योधन ह्मणतोः— हे राजा, तूं आणि हे दुसरे महारथि ह्यांच्या साहाय्यानें (तूर्त पृथ्वी न जिंकितां) तुझें अनुमोदन असेल तर ह्या पांडवांनाच जिंकण्याची माझी इच्छा आहे १३. कारण, एक ह्यांचा आज पराजय केला ह्मणजे पृथ्वी, सर्व भूपति व ती महामूल्यवान् सभा हें सर्व माझेंच होणार आहे १४. शकुनि ह्मणतोः— अर्जुन, वासुदेव, भीमसेन, युधिष्ठिर, नकुलसहदेव आणि पुत्रांसहवर्तमान द्रुपद १५ ह्या महारथी, महाधनुर्धारी, अस्त्रनिपुण व युद्धामध्यें पराजित होण्यास अशक्य असलेल्या वीरांचा संग्रामामध्यें देवगणांच्या हातूनही पराभव होणें शक्य नाहीं १६. ज्या उपायानें, हे राजा, स्वतः युधिष्ठिराला जिंकणें शक्य आहे तो उपाय मी जाणीत आहें. करितां, तूं ऐकून घेऊन त्याचा अवलंब कर १७. दुर्योधन ह्मणतोः—सुहृद व इतरही महात्मे ह्यांना धक्का न लागतां जर त्या पांडवांचा पराजय होणें शक्य असेल

तन्ममाचक्ष्व मातुल १८ शकुनिरुवाच ॥ द्यूतप्रियश्च कौन्तेयो न स्म जानाति देवितुम् । समाहूतश्च राजेन्द्रो न शक्ष्यति निवर्तितुम् १९ देवने कुशलश्चाहं न मेस्ति सदृशो भुवि । त्रिषु लोकेषु कौरव्य तं त्वं द्यूते समाह्वय २० तस्याक्षकुशलो राजन्नादास्येहमसंशयम् । राज्यं श्रियं च तां दीप्तां त्वदर्थं पुरुषर्षभ २१ इदं तु सर्वं त्वं राज्ञे दुर्योधन निवेदय । अनुज्ञातस्तु ते पित्रा विजेष्ये तान्न संशयः २२ दुर्योधन उवाच ॥ त्वमेव कुरुमुख्याय धृतराष्ट्राय सौबल । निवेदय यथान्यायं नाहं शक्ष्ये निवेदितुम् २३ [१७५६] इति० सभापर्वणि द्यूतपर्वणि दुर्योधनसंतापेष्टचत्वारिंशोध्यायः ॥ ४८ ॥

वैशम्पायन उवाच ॥ अनुभूय च राज्ञस्तं राजसूयं महाक्रतुम् । युधिष्ठिरस्य नृपतेर्गान्धारीपुत्रसंयुतः १ प्रियकृन्मतमादाय पूर्वं दुर्योधनस्य ततू । प्रज्ञाचक्षुषमासीनं शकुनिः सौबलस्तदा २ दुर्योधनवचः श्रुत्वा धृतराष्ट्रं जनाधिपम् । उपगम्य महाप्राज्ञं शकुनिर्वाक्यमब्रवीतू ३ शकुनिरुवाच ॥ दुर्योधनो महाराज विवर्णो हरिणः कृशः । दीनश्चिन्तापरश्चैव तं विद्धि

तर, हे मातुला, तूं मला सांग १८. शकुनि ह्मणतोः—कुंतीपुत्र युधिष्ठिराला द्यूत प्रिय असून तें करण्यांत तो मुळींच प्रवीण नाहीं आणि आव्हान केलें असतां त्या नृपश्रेष्ठाकडून त्याचा स्वीकार न होणेंही शक्य नाहीं १९. शिवाय, मी द्यूत खेळण्यांत प्रवीण आहें इतकेंच नव्हें तर माझ्यासारखा द्यूत खेळगारा पृथ्वींत नव्हें त्रैलोक्यांतही कोणी नाहीं. करितां, हे कुरुकुलोत्पन्ना दुर्योधना, त्या युधिष्ठिराला तूं द्यूताविषयीं आव्हान कर २०. हे पुरुषश्रेष्ठा दुर्योधन राजा, फांशांत प्रवीण असलेला मी तें त्याचें राज्य व ती डोळे दिपविणारी संपत्ति तुझ्याकरितां निःसंशय हरण करीन २१. परंतु, हे राजा, तूं हें सर्व धृतराष्ट्र राजाला निवेदन कर. ह्मणजे तुझ्या पित्याची अनुज्ञा मिळाल्यावर मी त्यांना निःसंशय जिंकून टाकीन २२. दुर्योधन ह्मणतोः—हे सौबला, तूंच कुरुवंशजाधिपति धृतराष्ट्राला हें जसें खुलवून सांगावयाचें असेल तसें सांग. मला तें नीट सांगतां येणार नाहीं २३. ह्याप्रमाणें महामुनिव्यासप्रणीतलक्षग्रंथात्मक श्रीमहाभारतांतर्गत सभापर्वांतील द्यूतपर्वांपैकीं दुर्योधनाच्या संतापाविषयीं अठ्ठेचाळिसावा अध्याय समाप्त झाला॥ ४८ ॥

वैशंपायन सांगतातः—नृपति युधिष्ठिर राजाचा तो राजसूय महाक्रतु कसा काय झाला ह्याचा प्रत्यक्ष अनुभव घेऊन, दुर्योधनाचेंही तें मत आपल्याला अनुकूलच आहे असें जाणून आणि (तूंच धृतराष्ट्र राजाला सांग हें) दुर्योधनाचें भाषण श्रवण करून सुबलपुत्र शकुनि दुर्योधनासहवर्तमान महाबुद्धिमान् व अंध असा जो प्रजाधिपति धृतराष्ट्र राजा त्याचे समीप गेला आणि ह्मणाला १,२,३ " हे मनुष्याधिपते

मनुजाधिप ४ न वै परीक्षसे सम्यगसह्यं शत्रुसंभवम् । ज्येष्ठपुत्रस्य हृच्छोकं किमर्थं नावबुध्यसे ५ धृतराष्ट्र उवाच ॥ दुर्योधन कुतोमूलं भृशमार्तोसि पुत्रक । श्रोतव्यश्चेन्मया सोर्थो ब्रूहि मे कुरुनन्दन ६ अयं त्वां शकुनिः प्राह विवर्णं हरिणं कृशम् । चिन्तयंश्च न पश्यामि शोकस्य तव संभवम् ७ ऐश्वर्यं हि महत्पुत्र त्वयि सर्वं प्रतिष्ठितम् । भ्रातरः सुहृदश्चैव नाचरन्ति तवाप्रियम् ८ आच्छादयसि प्रावारानश्नासि पिशितौदनम् । आजानेया वहन्त्यश्वाः केनासि हरिणः कृशः ९ शयनानि महार्हाणि योषितश्च मनोरमाः । गुणवन्ति च वेश्मानि विहाराश्च यथासुखम् १० देवानामिव ते सर्वं वाचि बद्धं न संशयः । स दीन इव दुर्धर्ष कस्माच्छोचसि पुत्रक ११ दुर्योधन उवाच ॥ अश्नाम्याच्छादये चाहं यथा कुपुरुषस्तथा । अमर्षं धारये चोग्रं निनीषुः कालपर्ययम् १२ अमर्षणः स्वाः प्रकृतीरभिभूय परं स्थितः ।

देवा यदि ते सहायाः ३७ धर्मे स्थितो धर्मसुतो महात्मा धर्मश्च सूक्ष्मो निपुणोपलक्ष्यः । वाचापि भर्तुः परमाणुमात्रमिच्छामि दोषं न गुणान्विसृज्य ३८ इदं त्वकार्यं कुरुवीरमध्ये रजस्वलां यत्परिकर्षसे माम् । न चापि कश्चित्कुरुतेत्र कृत्सां ध्रुवं तवेदं मतमभ्युपेतः ३९ धिगस्तु नष्टः खलु भारतानां धर्मस्तथा क्षत्रविदां च वृत्तम् । यत्र ह्यतीतां कुरुधर्मवेलां प्रेक्षन्ति सर्वे कुरवः सभायाम् ४० द्रोणस्य भीष्मस्य च नास्ति सत्त्वं क्षत्तुस्तथैवास्य महात्मनोपि । राज्ञस्तथा हीममधर्ममुग्रं न लक्षयन्ते कुरुवृद्धमुख्याः ४१ वैशम्पायन उवाच ॥ तथा ब्रुवन्ती करुणं सुमध्यमा भर्तृन्कटाक्षैः कुपितानपश्यत् । सा पाण्डवान्कोपपरीतदेहान्संदीपयामास कटाक्षपातैः ४२ हृतेन राज्येन तथा धनेन रत्नैश्च मुख्यैर्न तथा बभूव ।

इंद्रासहवर्तमान देव जरी तुला सहाय असले तरी, हे राजकुमार (पांडव) तुझें हें कृत्य सहन करणार नाहींत ३७. हा महात्मा धर्मपुत्र युधिष्ठिर धर्मानें सर्वदां वागणारा आहे आणि धर्म सूक्ष्म असून निपुण पुरुषालाच समजणारा आहे. करितां, गुण सोडून देऊन भर्त्या युधिष्ठिराला अणुरेणु इतका देखील दोष नुसत्या शब्दानेंही लावण्याचें माझ्या मनांत येत नाहीं ३८. अरे, कुरुवंशज वीरांमध्यें रजस्वला असतांना मला ओढून नेत आहेस हें निंद्य कृत्य आहे आणि ज्याअर्थी ह्या कृत्याबद्दल तुला कोणी दोष देत नाहीं त्याअर्थी प्रत्येकजण निःसंशय तुझ्याच मतावें अवलंबन करून राहिला आहे (असें मला वाटतें) ३९. अहो, ज्याअर्थी कुरुवंशजांकडूनच धर्ममर्यादेचें अतिक्रमण भर सभेमध्यें होत असतांना इतर सर्व कुरुवंशज अवलोकन करीत बसले आहेत त्याअर्थी ह्या क्षत्रियधर्मवेत्त्या भरतवंशजांच्या नष्ट झालेल्या धर्माला व वर्तनाला धिक्कार असो ४०. अरे, ह्या धृतराष्ट्रराजाकडून होत असलेला हा भयंकर अधर्म कुरुकुलांतील मुख्य व वृद्ध पुरुषांच्याही लक्ष्यांत येत नाहीं. तेव्हां द्रोणाचार्य आणि भीष्म ह्यांच्यांत कांहीं सत्व राहिलेंच नसून ह्या महात्म्या विदुराचीही तशीच स्थिति झाल्याचें दिसत आहे ४१. वैशंपायन सांगतातः—ह्याप्रमाणें करुणस्वरानें बोलत असलेल्या त्या सौंदर्यसंपन्न द्रौपदीनें क्रुद्ध झालेल्या आपल्या भर्त्यांना नेत्र कटाक्षांनीं अवलोकन केले आणि कोपानें व्याप्त होऊन गेलेल्या त्या पांडवांना कटाक्षाच्या योगानें तिनें अगदीं प्रदीप्त करून टाकिले (सारांश, कुरुवंशजांना उद्देशून दीनवाणीनें बोलतां बोलतां द्रौपदीची दृष्टि सहज भर्त्यांकडे गेली. तेव्हां आधींच क्रुद्ध झालेल्या त्या पांडवांच्या अंगाचा तर अगदीं भडकाच झाला) ४२. तात्पर्य, लज्जा व कोप ह्यांनीं युक्त असलेल्या द्रौपदीच्या कटाक्षानें जें (दुःसह) दुःख पांडवांना झालें तसें दुःख राज्य, धन व

यथा त्वपाकोपसमीरितेन कृष्णाकटाक्षेण बभूव दुःखम् ४३ दुःशासनश्चापि समीक्ष्य कृष्णामवेक्षमाणां कृपणान्पतींस्तान् । आधूय वेगेन विसंज्ञकल्पामुवाच दासीति हसन्सशब्दम् ४४ कर्णस्तु तद्वाक्यमतीवहृष्टः संपूजयामास हसन्सशब्दम् । गान्धारराजः सुबलस्य पुत्रस्तथैव दुःशासनमभ्यनन्दत् ४५ सभ्यास्तु ये तत्र बभूवुरन्ये ताभ्यामृते धार्तराष्ट्रेण चैव । तेषामभूद्दुःखमतीव कृष्णां दृष्ट्वा सभायां परिक्लिश्यमानाम् ४६ भीष्म उवाच ॥ न धर्मसौक्ष्म्यात्सुभगे विवेक्तुं शक्नोमि ते प्रश्नमिमं यथावत् । अस्वाम्यशक्तः पणितुं परस्वं स्त्रियाश्च भर्तुर्वशतां समीक्ष्य ४७ त्यजेत सर्वां पृथिवीं समृद्धां युधिष्ठिरो धर्ममथो न जह्यात् । उक्तं जितोस्मीति च पाण्डवेन तस्मान्न शक्नोमि विवेक्तुमेतत् ४८ द्यूतेद्वितीयः शकुनिर्नरेषु

मुख्य मुख्य रत्नें ह्यांच्या अपहारानेंही झालें नाहीं ४३. असो. दीन होऊन बसलेल्या त्या पांडवांकडे द्रौपदी पहात असल्याचें अवलोकन केल्यावर दुःशासनानें केसांना हिसका देऊन तिला कंपित केली आणि त्यामुळें जवळ जवळ मूर्छित झालेल्या त्या द्रौपदीला "बटीक, बटीक" ह्मणून उच्चस्वरानें हंसत हंसत त्यानें हांकाही मारिल्या ४४. तेव्हां कर्ण तर अत्यंत आनंदित झाला आणि मोठमोठ्यानें हंसून दुःशासनाच्या त्या भाषणाची मोठी तारीफ करूं लागला व त्याचप्रमाणें सुबलपुत्र गांधारदेशाधिपति शकुनीनेंही दुःशासनाचें (उच्चहास्यपूर्वक) अभिनंदन केलें ४५. परंतु, कर्ण, शकुनि व धृतराष्ट्रपुत्र ह्यांवांचून इतर जे त्या सभेमध्यें सभासद होते त्यांना दुःशासन द्रौपदीला सभेमध्यें ओढून आणीत असल्याचें पाहून अतिशयच दुःख झालें ४६. भीष्म ह्मणतातः—स्वामित्वरहित पुरुषाला परधन पणाला लावितां येत नाहीं हें पाहून आणि स्त्रीची भर्तृवशताही अवलोकन करून धर्माची गति सूक्ष्म असल्यामुळें, हे सुभगे, तुझ्या ह्या प्रश्नाचें यथायोग्य उत्तर देण्यास मी समर्थ नाहीं (सारांश, हे कल्याणि द्रौपदि, युधिष्ठिरानें प्रथम आपणाला पणाला लावून घेतलें; तेव्हां स्वतःचेंही स्वामित्व त्याचे ठिकाणीं राहिलें नसल्यामुळें इतर कोणतेंही द्रव्य पणाला लावण्यास त्याला अधिकार नाहीं हें खरें आहे. परंतु, कोणतीही अवस्था प्राप्त झाली तरी स्त्रीनें भर्त्याच्या अधीन असलेंच पाहिजे असेंही धर्मशास्त्र सांगत आहे. तेव्हां, धर्माची ही बाब फारच सूक्ष्म असल्यामुळें तुला जिंकिली किंवा नाहीं ह्या प्रश्नाचें यथायोग्य उत्तर देण्यास मी असमर्थ आहें) ४७. शिवाय, धनधान्यानें परिपूर्ण असलेल्या सर्व पृथ्वीचा युधिष्ठिर त्याग करील. तथापि, धर्माचा त्याग करणार नाहीं. परंतु, "हरलों" ह्मणून त्या पांडुपुत्र युधिष्ठिरानेंच सांगितलें आहे. तस्मात्, ह्याचा निर्णय करण्यास मी समर्थ नाहीं ४८. मानवांमध्यें

कुन्तीसुतस्तेन निसृष्टकामः। न मन्यते तां निकृतिं युधिष्ठिरस्तस्मान्न ते प्रश्नमिमं ब्रवीमि ४९ द्रौपद्युवाच ॥ आहूय राजा कुशलैरनार्यैर्दुष्टात्मभिर्नैकृतिकैः सभायाम्। द्यूतप्रियैर्नातिकृतप्रयत्नः कस्मादयं नाम निसृष्टकामः ५० अशुद्धभावैर्निकृतिप्रवृत्तैरबुध्यमानः कुरुपाण्डवाद्यः। संभूय सर्वैश्च जितोपि यस्मात्पश्चादयं कैतवमभ्युपेतः ५१ तिष्ठन्ति चेमे कुरवः सभायामीशाः सुतानां च तथा स्नुषाणाम्। समीक्ष्य सर्वे मम चापि वाक्यं विब्रूत मे प्रश्नमिमं यथावत् ५२ वैशम्पायन उवाच ॥ तथा ब्रुवन्तीं करुणं रुदन्तीमवेक्षमाणां कृपणान्पतींस्तान्। दुःशासनः परुषाण्यप्रियाणि वाक्यान्युवाचामधुराणि चैव ५३ तां कृष्यमाणां च रजस्वलां च स्रस्तोत्तरीयामतदर्हमाणाम्। वृकोदरः प्रेक्ष्य युधिष्ठिरं च चकार कोपं परमार्तरूपः ५४ [२२९१] इति० सभापर्वणि द्यूतपर्वणि द्रौपदीप्रश्ने सप्तषष्टितमोध्यायः॥६७॥

भीम उवाच ॥ भवन्ति गेहे बन्धक्यः कितवानां युधिष्ठिर। न ताभिरुत

शकुनीच्या तोडीचा द्यूत खेळगारा कोणीही नाहीं आणि कुंतीपुत्र युधिष्ठिरानें (द्यूत खेळण्याविषयीं) शकुनीचा मनोरथ पूर्ण केला. परंतु, शकुनीचें तें कपट असें युधिष्ठिर समजत नाहीं. तस्मात्, तुझ्या ह्या प्रश्नाचें उत्तर देण्यास मी समर्थ नाहीं४९. द्रौपदी ह्मणतेः—द्यूतप्रिय व तें करण्यांत निपुण असलेल्या कपटी नीच दुष्टांनीं सभेमध्यें आव्हान केलें असतां द्यूतामध्यें विशेष ज्याचा अभ्यास नाहीं अशा ह्या राजानें त्या शत्रूंचा मनोरथ कां पूर्ण होऊं दिला ? ५०. असो. कौरवपांडवांमध्यें श्रेष्ठ असलेल्या ह्या कपटानभिज्ञ धर्मराजाला दुष्ट इच्छेनें कपट करण्यास प्रवृत्त झालेल्या सर्वांनीं मिळून जिंकिला असतांही ह्यानें माझा पण लाविला आहे ५१ आणि पुत्र व स्नुषा ह्यांचे स्वामी असलेले हे (भीष्मप्रभृति) कुरुवंशजही सभेमध्यें बसले आहेत. तेव्हां माझ्याही ह्मणण्याकडे सर्वांनीं लक्ष्य देऊन माझ्या ह्या प्रश्नाचें यथायोग्य उत्तर द्यावें ५२. वैशंपायन सांगतातः—ह्याप्रमाणें बोलत असून करुणस्वरानें रोदन करीत असलेली ती द्रौपदी त्या अनाथपतींकडे पाहूं लागली असतां दुःशासन तिला कर्कश स्वरानें कठोर व अप्रिय असे शब्द बोलला ५३. तेव्हां रजस्वला असलेल्या द्रौपदीचा पदर खालीं गळला आहे व सभेमध्यें ओढीत आणण्यास ती अयोग्य असतांही दुःशासन तिला ओढीत आहे असें अवलोकन केल्यावर युधिष्ठिराकडे पाहून दुःखित झालेला भीमसेन अत्यंत क्रुद्ध झाला ५४. ह्याप्रमाणें० लक्षग्रंथात्मक श्रीमहाभारतांतर्गत सभापर्वांतील द्यूतपर्वांपैकीं द्रौपदीच्या प्रश्नाविषयीं सदुसष्टावा अध्याय समाप्त झाला ॥ ६७॥

भीम ह्मणतोः—हे युधिष्ठिरा, जुवेबाजांच्या घरीं राखा असतात; परंतु, त्यांना

दीव्यन्ति दया चैवास्ति तास्वपि १ काश्यो यद्धनमाहार्ष्टिव्यं यच्चान्यदुत्तमम् । तथान्ये पृथिवीपाला यानि रत्नान्युपाहरन् २ वाहनानि धनं चैव कवचान्यायुधानि च। राज्यमात्मा वयं चैव कैतवेन हृतं परैः ३ न च मे तत्र कोपोभूत्सर्वस्येशो हि नो भवान् । इमं व्यतिक्रमं मन्ये द्रौपदी यत्र पण्यते ४ एषा ह्यनर्हती बाला पाण्डवान्प्राप्य कौरवैः । त्वत्कृते क्लिश्यते क्षुद्रैर्नृशंसैरकृतात्मभिः ५ अस्याः कृते मन्युरयं त्वयि राजन्निपात्यते । बाहू ते संप्रधक्ष्यामि सहदेवाग्निमानय ६ अर्जुन उवाच ॥ न पुरा भीमसेन त्वमीदृशीर्वदिता गिरः । परैस्ते नाशितं नूनं नृशंसैर्धर्मगौरवम् ७ न सकामाः परे कार्या धर्ममेवाचरोत्तमम् । भ्रातरं धार्मिकं ज्येष्ठं कोतिवर्तितुमर्हति ८ आहूतो हि परै राजा क्षात्रं व्रतमनुस्मरन् । दीव्यते परकामेन तन्नः कीर्तिकरं महत् ९ भीमसेन उवाच॥एवमस्मिन्कृतं विद्यां यदि नाहं धनञ्जय ।

देखील ते पणाला लावीत नाहींत. त्यांच्यावरही जुगार खेळणारे लोक दया करीत असतात (तथापि, तूं प्रिय भार्येलाही पणाला लावून मोकळा झालास) १. काशिराजानें आणिलेली संपत्ति, दुसरें उत्कृष्ट द्रव्य, इतर भूपालांनीं आणिलेलीं रत्नें२, वाहनें, धन, कवचें, आयुधें, राज्य, तूं स्वतः आणि आम्ही ह्या सर्वांचा शत्रूंनीं कपटानें अपहार केला३. तथापि, मला क्रोध आला नाहीं. कारण, आमच्या सर्वस्वाचा अधिपति तूं आहेस. परंतु, तूं द्रौपदी पणाला लाविलीस हें मात्र आपल्या अधिकाराचें अतिक्रमण केलेंस असें मला वाटतें ४. पांडवांना प्राप्त झालेली ही बाला क्लेश भोगण्यास पात्र नसतांनाही तुझ्यामुळें हे क्षुद्र, दुष्ट व मूर्ख कौरव तिला क्लेश देत आहेत ५. तस्मात्, हे राजा, हिच्याकरितां मी हा क्रोध तुझे ठिकाणीं अदळून तुझे हातच जाळून टाकितों. जा सहदेवा, अग्नि घेऊन ये ६. अर्जुन ह्मणतोः—हे भीमसेना, अशाप्रकारचे शब्द पूर्वी तुझ्या तोंडांतून कधींही आलेले नाहींत. तेव्हां खरोखर शत्रूंनीं तुझे ठिकाणीं असलेलें धर्मौदार्य अगदीं नष्ट करून टाकिलें आहे (असें मला वाटतें) ७. अरे (शत्रु एवढ्याचीच वाट पहात बसले आहेत. करितां), शत्रूंचा मनोरथ सिद्धीस जाऊं देतां उपयोगीं नाहीं. ह्यास्तव, तूं उत्कृष्ट अशा धर्माचेंच अवलंबन कर. अरे, ज्येष्ठ आणि त्यांतूनही धर्मनिष्ठ अशा भ्रात्याचें अतिक्रमण करण्यास कोण समर्थ होणार आहे ? ८. अरे, दुसऱ्यांनीं आव्हान केलें ह्मणून क्षात्रधर्माचें ब्रीद राखून परकीयांच्या इच्छेनें धर्मराजा द्यूत करीत आहे ही गोष्ट तर आपणांला मोठी कीर्तिकारक आहे ९. भीमसेन ह्मणतोः—हे धनंजया, तुझ्या ह्मणण्याप्रमाणें ह्या धर्मराजानें क्षात्र धर्म स्मरूनच ही गोष्ट केली आहें असें जर मी जाणिलें नसतें तर बलात्कारानें

दीप्तेऽग्नौ सहितौ बाहू निर्दहेयं बलादिव १० वैशम्पायन उवाच॥ तथा तान्दुःखितान्दृष्ट्वा पाण्डवान्धृतराष्ट्रजः । क्लिश्यमानां च पाञ्चालीं विकर्ण इदमब्रवीत् ११ याज्ञसेन्या यदुक्तं तद्वाक्यं विब्रूत पार्थिवाः । अविवेकेन वाक्यस्य नरकः सद्य एव नः १२ भीष्मश्च धृतराष्ट्रश्च कुरुवृद्धतमावुभौ । समेत्य नाहतुः किंचिद्विदुरश्च महामतिः १३ भारद्वाजश्च सर्वेषामाचार्यः कृप एव च । कुत एतावपि प्रश्नं नाहतुर्द्विजसत्तमौ १४ ये त्वन्ये पृथिवीपालाः समेताः सर्वतो दिशम् । कामक्रोधौ समुत्सृज्य ते ब्रुवन्तु यथामति १५ यदिदं द्रौपदी वाक्यमुक्तवत्यसकृच्छुभा । विमृश्य कस्य कः पक्षः पार्थिवा वदतोत्तरम् १६ एवं स बहुशः सर्वानुक्तवांस्तान्सभासदः । न च ते पृथिवीपालास्तमूचुः साध्वसाधु वा १७ उक्त्वामकृत्तथा सर्वान्विकर्णः पृथिवीपतीन् । पाणौ पाणिं विनिष्पिष्य निःश्वसन्निदमब्रवीत् १८ विब्रूत पृथिवीपाला वाक्यं मा वा कथंचन । मन्ये न्याय्यं यदत्राहं तद्धि वक्ष्यामि

प्रज्वलित अग्नीमध्यें ह्याचे दोन्ही हात एकदम जाळून टाकिलेच असते (परंतु, हें समजत आहें ह्मणून नुस्ता बोलूनच स्वस्थ बसलों आहें) १०. वैशंपायन सांगतातः— त्याप्रमाणें दुःखित झालेल्या त्या पांडवांना अवलोकन करून आणि दुःशासन पांचालीला केंस धरून ओढीत असल्याचें पाहून धृतराष्ट्रपुत्र विकर्ण ह्मणाला ११ " हे भूपालहो, द्रुपदकन्येनें जो प्रश्न केला आहे त्या प्रश्नाचें तुह्मी उत्तर द्या. कारण, तुह्मीं जर त्या प्रश्नाचा विचार केला नाहीं तर आपणांला निःसंशय नरकप्राप्ति होईल १२. भीष्म व धृतराष्ट्र हे उभयतां सर्व कुरुवंशजांमध्यें अत्यंत वृद्ध आहेत. परंतु, ह्या उभयतांनीं मिळून कांहींच भाषण केलें नाहीं आणि महाविचारी विदुरानेंही कांहीं उत्तर केलें नाहीं १३. भरद्वाजपुत्र द्रोणाचार्य व कृपाचार्य हे उभयतां सर्वांचें आचार्य आहेत. परंतु, ह्याही द्विजश्रेष्ठांनीं प्रश्नाचें उत्तर कां दिलें नाहीं (हें समजत नाहीं) १४. तस्मात्, सर्व प्रदेशांतून जे इतर भूपाल ह्या ठिकाणीं जुळले आहेत त्यांनीं तरी लोभ व क्रोध बाजूस ठेवून यथामति द्रौपदीच्या प्रश्नाचें उत्तर द्यावें १५. हे भूपालहो, ह्या पवित्र द्रौपदीनें जो अनेक वेळां प्रश्न केला त्याचा विचार करून कोणाचें काय मत आहे तें तुह्मी उत्तर देऊन कळवा " १६. ह्याप्रमाणें अनेक प्रकारांनीं त्या सर्व सभासदांना उद्देशून त्या विकर्णानें भाषण केलें. परंतु, त्या भूपालांनीं बरें अथवा वाईट असें कांहींच उत्तर त्या विकर्णाला दिलें नाहीं १७. तेव्हां पुनरपि अनेक वेळां सर्व भूपतींना उद्देशून त्या विकर्णानें तसेंच भाषण केलें आणि हातावर हात चोळून दुःखाचे सुस्कारे टाकीत टाकीत तो ह्मणाला १८ " हे भूपालहो,

कौरवाः १९ चत्वार्याहुर्नरश्रेष्ठा व्यसनानि महीक्षिताम् । मृगया पानमक्षाश्च ग्राम्ये चैवातिरक्तता २० एतेषु हि नरः सक्तो धर्ममुत्सृज्य वर्तते । तथायुक्तेन च कृतां क्रियां लोको न मन्यते २१ तदयं पाण्डुपुत्रेण व्यसने वर्तता भृशम् । समाहूतेन कितवैरास्थितो द्रौपदीपणः २२ साधारणी च सर्वेषां पाण्डवानामनिन्दिता । जितेन पूर्वं चानेन पाण्डवेन कृतः पणः२३ इयं च कीर्तिता कृष्णा सौबलेन पणार्थिना । एतत्सर्वं विचार्याहं मन्ये न विजितामिमाम् २४ एतच्छ्रुत्वा महानादः सभ्यानामुदतिष्ठत । विकर्णं शंसमानानां सौबलं चापि निन्दताम् २५ तस्मिन्नुपरते शब्दे राधेयः क्रोधमूर्च्छितः । प्रगृह्य रुचिरं बाहुमिदं वचनमब्रवीत् २६ कर्ण उवाच॥

तुह्मीं द्रौपदीच्या प्रश्नाचें उत्तर द्या किंवा कांहींच उत्तर न देतां स्वस्थ रहा ! ह्या प्रसंगीं मला जें न्याय्य वाटत आहे तें, हे कौरवहो, मी सांगतों १९. मृगया, मद्यपान, द्यूत आणि अति स्त्रीसंग हीं चार राजव्यसनें ह्मणून श्रेष्ठ पुरुषांनीं सांगितलीं आहेत २०. ह्या चार व्यसनांमध्यें पुरुष आसक्त झाला असतां तो धर्माला सोडून वागत असतो आणि ह्मणूनच अशा व्यसनाधीन अयोग्य पुरुषानें केलेलें कृत्य लोक खरें समजत नाहींत २१. तेव्हां, द्यूतकारांनीं आव्हान केल्यामुळें अत्यंत द्यूतव्यसनासक्त होऊन पांडुपुत्र युधिष्ठिरानें हा द्रौपदीचा पण लाविलेला आहे २२. जिला कोणत्याही प्रकारें नांव ठेवण्यास जागा नाहीं अशी ही द्रौपदी सर्व पांडवांना साधारण आहे आणि प्रथम स्वतःला हरवून घेतल्यानंतर ह्या पांडुपुत्र युधिष्ठिरानें हिला उद्देशून पण लाविलेला आहे २३. शिवाय, (युधिष्ठिराच्या इच्छेनें ही पणाला लाविलेली नसून) पणेच्छु सुबलपुत्र शकुनीच्या सांगण्यावरून ह्या कृष्णेला पणाला लाविलेली आहे (सारांश,१ पणाला लावणारा युधिष्ठिर राजा व्यसनाधीन होऊन बेफाम झाला असल्यामुळें तशा स्थितींत त्यानें केलेलें कृत्य योग्य ह्मणतां येणार नाहीं; २ द्रौपदी सर्व पांडवांची भार्या असल्यामुळें एकट्या युधिष्ठिराला तिला पणाला लावण्याचा अधिकार नाहीं; ३ युधिष्ठिर पूर्वी स्वतःच जिंकिला गेला असल्यामुळें तो आपल्या स्वतःचा सुद्धां जर मुकत्यार नाहीं तर द्रौपदीचा नाहींच नाहीं ४ आणि शिवाय द्रौपदी युधिष्ठिराच्या इच्छेनें पणाला लाविली नसून शकुनीच्याच इच्छेनें लाविली असल्यामुळें हा पण न्याय्य आहे असें ह्मणतां येत नाहीं. तेव्हां) ह्या सर्वांचा विचार करून ही द्रौपदी जिंकिली नाहीं असें मी समजतों "२४. हें भाषण श्रवण केल्याबरोबर (शाबास ! शाबास ! फार उत्तम ! फार उत्तम ह्मणून) त्या सभेंतील सभासद लोक मोठ्या मोठ्यानें ओरडून विकर्णाची प्रशंसा आणि सुबलपुत्र जो शकुनि त्याची निंदा करूं लागले २५.

दृश्यन्ते वै विकर्णेह वैकृतानि बहून्यपि । तज्जातस्तद्विनाशाय यथाग्निर-
रणीप्रजः २७ एते न किंचिदप्याहुश्चोदिता ह्यपि कृष्णया । धर्मेण विजि-
तामेतां मन्यन्ते द्रुपदात्मजाम् २८ त्वं तु केवलबाल्येन धार्तराष्ट्र विदीर्यसे ।
यद्ब्रवीषि सभामध्ये बालः स्थविरभाषितम् २९ न च धर्मं यथावत्त्वं वेत्सि
दुर्योधनावर । यद्ब्रवीषि जितां कृष्णां न जितेति सुमन्दधीः ३० कथं ह्यवि-
जितां कृष्णां मन्यसे धृतराष्ट्रज । यदा सभायां सर्वस्वं न्यस्तवान्पाण्डवा-
ग्रजः ३१ अभ्यन्तरा च सर्वस्वे द्रौपदी भरतर्षभ । एवं धर्मजितां कृष्णां
मन्यसे न जितां कथम् ३२ कीर्तिता द्रौपदी वाचा अनुज्ञाता च पाण्डवैः ।
भवत्यविजिता केन हेतुनैषा मता तव ३३ मन्यसे वा सभामेतामानीता-

नंतर (कांहीं वेळानें) ती गडबड शांत झाली असतां क्रोधानें व्याप्त झालेला राधा-
पुत्र कर्ण आपला भव्य हात पुढें करून ह्मणाला २६ " हे विकर्णा, ह्या जगता-
मध्यें विपरीत प्रकार पुष्कळच दृष्टोत्पत्तीस येत असतात. अरे, अग्नि ज्याप्रमाणें अर-
णीपासून उत्पन्न होऊन तिच्याच नाशाला प्रवृत्त होत असतो त्याप्रमाणें तूं हीं त्या
धृतराष्ट्र राजापासून उत्पन्न होऊन त्याच्या नाशाला प्रवृत्त झाला आहेस (तेव्हां
ह्यांत कांहीं विशेष नाहीं. जगतांतील अनेक विपरीत प्रकारांपैकींच हा एक प्रकार
आहे) २७. अरे, द्रुपदकन्या कृष्णेनें स्वतः ह्यांना सांगितलें असतांही हे (भीष्म-
प्रभृति) तिला कांहींएक उत्तर करीत नाहींत. कारण, ही द्रुपदकन्या धर्मानें
जिंकिली गेली असें ते समजत आहेत २८. हे धृतराष्ट्रपुत्रा, दुःखानें अगदी विदीर्ण
होऊन सभेमध्यें जें तूं (मोठ्या दिमाखानें) वृद्धांचें बोलणें बोलत आहेस तें केवळ
मूर्खपणामुळें बोलत आहेस २९. हे दुर्योधनाहून कनिष्ठ असलेल्या विकर्णा, (दुर्योध-
नाला कांहीं तरी चातुर्मास्यें तुझ्यापेक्षां जास्त आहेत ह्याचा तूं थोडासातरी आपल्या मनाशीं
विचार करून पहा. अरे) अत्यंत मूढ असा तूं ज्याअर्थीं जित असलेली द्रौपदी जित
नाहीं असें ह्मणत आहेस त्याअर्थीं तुला धर्माचें ज्ञान जसें असावें तसें नाहीं (हें
उघड आहे) ३०. हे धृतराष्ट्रपुत्रा, पांडवांतील ज्येष्ठ असलेल्या युधिष्ठिरानें सभे-
मध्यें जर सर्वस्व पणाला लाविलें आहे तर द्रुपदकन्या कृष्णा जिंकिली नाहीं ह्मणून
तूं कसें मानीत आहेस ? ३१. हे भरतवंशजश्रेष्ठा (!) द्रौपदीचाही युधिष्ठिराच्या
सर्वस्वापध्यें अंतर्भाव होतो. तेव्हां (सर्व भ्रात्यांमध्यें श्रेष्ठ आणि ह्मणूनच सर्वांचा
अधिपति जो युधिष्ठिर त्यानें आपल्या सर्वस्वाबरोबरच पणाला लाविलेली) द्रौपदी
न्यायानें जिंकिली असतां तूं जिंकिलेली नाहीं असें कशावरून मानितोस ? ३२.
द्रौपदी जिंकिली ह्मणून सभेमध्यें धडधडीत सांगण्यांत आलें व त्याला पांडवांनीं

मेकवाससम् । अधर्मेणेति तत्रापि शृणु मे वाक्यमुत्तमम् ३४ एको भर्ता स्त्रिया दैवैर्विहितः कुरुनन्दन । इयं त्वनेकवशगा बन्धकीति विनिश्चिता ३५ अम्याः सभामानयनं न चित्रमिति मे मतिः । एकाम्बरधरत्वं वाप्यथवापि विवस्त्रता ३६ यच्चैषां द्रविणं किंचिद्या चैषा ये च पाण्डवाः । सौबलेनेह तत्सर्वं धर्मेण विजितं वसु ३७ दुःशासन सुबालोयं विकर्णः प्राज्ञवादिकः । पाण्डवानां च वासांसि द्रौपद्याश्चाप्युपाहर ३८ तच्छ्रुत्वा पाण्डवाः सर्वे स्वानि वासांसि भारत । अवकीर्योत्तरीयाणि सभायां समुपाविशन् ३९ ततो दुःशासनो राजन्द्रौपद्या वसनं बलात् । सभामध्ये समाक्षिप्य व्यपाकर्षुं प्रचक्रमे ४० वैशम्पायन उवाच ॥ आक्रुश्यमाणे वसने द्रौपद्या चिन्तितो हरिः । गोविन्द द्वारकावासिन्कृष्ण गोपीजन-

---

अनुमोदनही दिलें. तेव्हां तुला ही जिंकिली नाहीं असें वाटतें ह्याचें कारण काय? ३३ आतां हिला एका वस्त्रानिशी सभेमध्यें आणिली हा अन्याय आहे ह्मणून ह्मणत असशील तर त्याला हें माझें खरमरीत उत्तर ऐकून घे ३४. हे कुरुनंदना, स्त्रीला एकच भर्ता देवांनीं नेमिलेला आहे आणि ही तर अनेकांना वश होऊन राहिलेली आहे. तस्मात्, ही वेश्या असल्याचें निश्चित आहे ३५. तेव्हां, ही एकवस्त्रा असली काय ! अथवा नग्न असली काय ! हिला सभेमध्यें आणणें मुळींच विचित्र प्रकार नव्हें असें मला वाटतें ३६. ह्या पांडवांचें द्रव्य, ही द्रौपदी आणि हे स्वतः पांडव हें सर्व सुबलपुत्र शकुनीनें ह्या द्यूतामध्यें धर्मानें जिंकिलेलें धन आहे ३७. हे दुःशासना, स्वतःला शहाणा ह्मणविणारा हा विकर्ण अतिशय मूर्ख आहे (ह्याच्या नादीं लागणें आपणांला योग्य नाहीं) हूं ! तूं पांडवांचीं वस्त्रें व त्याचप्रमाणें द्रौपदीचेंही वस्त्र हरण कर ३८. हे भरतकुलोत्पन्ना जनमेजया, तें कर्णाचें भाषण श्रवण केल्याबरोबर सर्व पांडव आपआपल्या अंगावरील वस्त्रें टाकून देऊन सभेमध्यें बसले ३९. तदनंतर, हे जनमेजय राजा, द्रौपदीच्या नेसलेल्या वस्त्राला हिसका देऊन दुःशासन भरसभेमध्यें तें फेडूं लागला ४०. वैशंपायन सांगतातः—दुःशासन वस्त्र फेडूं लागला असतां द्रौपदीनें श्रीहरीचा धांवा केला कीं " हे गोविंदा (तूं सर्व इंद्रियांचा चालक असल्यामुळें नित्य समीप असतांना ह्या प्रसंगीं माझी कां रे उपेक्षा करीत आहेस!), हे द्वारकावासिन् (आपल्या भक्तांना संकटांतून सोडविण्याकरितां एका रात्रींत तूं समुद्रामध्यें नगरी बांधून द्वारकेतील सर्व लोक एकदम त्या नगरींत नेऊन ठेविलेस. तेव्हां ह्या संकटांतून माझें रक्षण करणें तुला काय रे कठीण आहे!); हे कृष्णा (भक्तांना स्मरण होतांक्षणीं तूं त्यांचीं सर्व दुःखें दूर ओढून नेत असतोस. तेव्हां माझें दुःख परिहार करण्याला तूं कां रे थांबला आहेस!),

प्रिय ४१ कौरवैः परिभूतां मां किं न जानासि केशव । हे नाथ हे रमानाथ व्रजनाथार्तिनाशन ॥ कौरवार्णवमग्नां मामुद्धरस्व जनार्दन ४२ कृष्ण कृष्ण महायोगिन्विश्वात्मन्विश्वभावन । प्रपन्नां पाहि गोविन्द कुरुमध्येऽवसीदतीम् ४३ इत्यनुस्मृत्य कृष्णं सा हरिं त्रिभुवनेश्वरम् । प्रारुदद्दुःखिता राजन्मुखमाच्छाद्य भामिनी ४४ याज्ञसेन्या वचः श्रुत्वा कृष्णो गद्गदितोभवत् । त्यक्त्वा शय्यासनं पद्भ्यां कृपालुः कृपयाभ्यगात् ४५ कृष्णं च विष्णुं च हरिं नरं च त्राणाय विक्रोशति याज्ञसेनी । ततस्तु धर्मोन्तरितो

हे गोपीजनप्रिय (अरे, मनुष्यांमध्यें गुरांच्यांची जात तर हलकी मानिलेली आहे; तेव्हां त्यांच्या स्त्रिया तर त्यांच्याहीपेक्षां कमी योग्यतेच्या असणार. परंतु, त्यांच्यावरही तूं कृपा करीत असल्याचें दिसतें. तेव्हां, कायावाचामनें करून मी तुला शरण आलें असतांना व राजसूय यज्ञामध्यें अभिषेक करून तूं मला आपली ह्मणविली असतांना ह्या प्रसंगीं कां रे तुला माझी दया येत नाहीं !)४१,हे केशवा (ब्रह्मा, विष्णु, आणि महेश्वर ह्यांचाही प्रवर्तक तूं असतांना) कौरवांनीं मला ग्रासून टाकिलें आहे हें तुला कसें समजत नाहीं !) हे नाथ (अनाथाप्रमाणें तूं माझी कां रे उपेक्षा करीत आहेस !), हे रमानाथ (तूं लक्ष्मीच्या विलासामध्यें दंग होऊन भक्तजनाला कसा रे ह्या प्रसंगीं विसरत आहेस !), हे व्रजनाथ(अरे, गाईंचे समुदाय तूं रक्षण करीत असतांना(ह्या प्रसंगीं एका गाईचें रक्षण तुझ्यानें कसें रे होत नाहीं), हे आर्तिनाशना, (गोवर्धनोद्धरण, कालियमर्दन, दावाग्निपान इत्यादिकांच्या योगानें तूं भक्तांना संकटांतून सोडविलेस; परंतु, ह्या प्रसंगीं तूं माझें कां रे सत्त्व पहात आहेस !), हे जनार्दना, (तूं सर्व भक्तजनांच्या दुःखाचा परिहार करणारा आहेस. कारितां,) कौरवसागरामध्यें बुडालेल्या मला ह्या प्रसंगीं तार ४२. हे कृष्णा, हे कृष्णा, हे महायोगिन् (तूं कोठें असलास तरी ह्या प्रसंगीं येथें येऊन माझें रक्षण करणें तुला मुळींच कठीण नाहीं), हे विश्वात्म्या (तूं सर्वांचा अंतर्यामी आहेस. तेव्हां शत्रूला तरी मनामध्यें प्रेरणा करून तूं ह्या निंद्य कृत्यापासून निवृत्त कर), हे विश्वभावना गोविंदा (तूं सर्व विश्वाचें परिपालन करणारा आहेस. ह्यास्तव) कुरुवंशजांमध्यें नाश पावत असलेल्या मज शरणागतेचें तूं रक्षण कर " ४३. ह्याप्रमाणें त्रैलोक्याधिपति श्रीहरि श्रीकृष्णाचा (मनामध्यें) धांवा केल्यावर दुःखानें गांजलेली ती तेजस्वी द्रौपदी हातानें मुख आच्छादित करून रोदन करूं लागली ४४. इकडे (द्वारकेमध्यें) असलेल्या (सर्वांतर्यामी) श्रीकृष्णांना द्रौपदीचें भाषण श्रवण करून गव्हर आला आणि शय्या व आसन पायांनीं लथडून देऊन तो दयालु श्रीहरि द्रौपदीची करुणा येऊन तिच्या समीप (गुप्त रूपानें) धांवला ४५. सारांश " हे कृष्णा, हे सर्वव्यापी ईश्वरा,

महात्मा समावृणोद्वै विविधैः सुवस्त्रैः ४६ आकृष्यमाणे वसने द्रौपद्यास्तु विशांपते । तद्भूयमपरं वस्त्रं प्रादुरासीदनेकशः ४७ नानारागविरागाणि वसनान्यथ वै प्रभो । प्रादुर्भवन्ति शतशो धर्मस्य परिपालनात् ४८ ततो हलहलाशब्दस्तत्रासीद्घोरदर्शनः ४९ तदद्भुततमं लोके वीक्ष्य सर्वे महीभृतः । शशंसुर्द्रौपदीं तत्र कुत्सन्तो धृतराष्ट्रजम् ५० शशाप तत्र भीमस्तु राजमध्ये बृहत्स्वनः । क्रोधाद्विस्फुरमाणौष्ठो विनिष्पिष्य करे करम् ५१ भीमसेन उवाच ॥ इदं मे वाक्यमादध्वं क्षत्रिया लोकवासिनः । नोक्तपूर्वं नरैरन्यैर्न चान्यो यद्वदिष्यति ५२ यद्येतदेवमुक्त्वाहं न कुर्यां पृथिवीश्वराः । पितामहानां पूर्वेषां नाहं गतिमवाप्नुयाम् ५३ अस्य पापस्य दुर्बुद्धेर्भारतापसदस्य च । न पिबेयं बलाद्वक्षो भित्त्वा चेद्रुधिरं युधि ५४ वैशम्पायन उवाच ॥ तस्य ते तद्वचः श्रुत्वा रौद्रं लोमप्रहर्षणम् । प्रचक्रुर्बहुलां पूजां

हे नरहरे,माझें रक्षण कर" असा द्रौपदी आक्रोश करूं लागली असतां महात्मा धर्मच वस्त्ररूप बनला आणि त्यानें नानाप्रकारच्या उत्तम उत्तम वस्त्रांनीं त्या द्रौपदीला आच्छादून टाकिली ४६. तेव्हां, हे जनमेजयराजा, दुःशासन द्रौपदीचें वस्त्र फेडूं लागला असतां त्याच्याच सारिखें (परिधान केलेलें) दुसरें वस्त्र वारंवार त्या द्रौपदीचे ठिकाणीं उत्पन्न होऊं लागलें ४७. हे प्रभो जनमेजयराजा, धर्मपरिपालनामुळें नानाप्रकारचीं रंगीबेरंगीं व केवल साधीं वस्त्रें शेंकडों उत्पन्न होऊं लागलीं असतां ४८ त्या सभेमध्यें भयसूचक असा मोठा हाहाकार उडाला ४९. तो अत्यंत अद्भुत प्रकार अवलोकन करून त्या ठिकाणीं सर्व राजे द्रौपदीची प्रशंसा करूं लागले आणि धृतराष्ट्रपुत्र दुःशासनाची निंदा करूं लागले ५०. (दुःशासन द्रौपदीचें वस्त्र फेडूं लागला तेव्हां) क्रोधामुळें भीमसेनाचे ओष्ठ स्फुरण पावूं लागले आणि हातावर हात चोळून त्यानें राजांमध्यें उच्च स्वरानें शपथ(-पूर्वक प्रतिज्ञा) केली ५१. भीमसेन ह्मणतोः—हे भूलोकनिवासी क्षत्रिय हो, तुह्मी माझें भाषण श्रवण करा. असें भाषण आजपर्यंत दुसऱ्या पुरुषांनीं केलेलें नाहीं आणि इतउत्तरही तें करणारा मला दुसरा कोणी दिसत नाहीं ५२. हें भाषण करून मी जर त्याप्रमाणें वागलों नाहीं तर, हे भूपालहो, पूर्वी होऊन गेलेल्या पूर्वजांची गति मला प्राप्त होणार नाहीं ५३. सारांश, ह्या भरतकुलकलंक पापी दुष्ट दुःशासनाचें वक्षःस्थल युद्धामध्यें स्वसामर्थ्यानें विदीर्ण करून जर मीं त्याचें रक्तप्राशन केलें नाहीं तर पूर्वजांप्रमाणें मला उत्तमलोकप्राप्ति होणार नाहीं ५४. वैशंपायन सागतातः—अंगावर कांटा आणणारें तें ल्या भीमसेनाचें भयंकर भाषण श्रवण करून धृतराष्ट्रपुत्र दुःशासनाची निंदा करूं लागलेल्या सभासदांनीं

कुरुमन्तो धृतराष्ट्रजम् ५५ यदा तु वाससां राशिः सभामध्ये समाचितः।
ततो दुःशासनः श्रान्तो व्रीडितः समुपाविशत् ५६ धिक्शब्दस्तु ततस्तत्र
समभूल्लोमहर्षणः । सभ्यानां नरदेवानां दृष्ट्वा कुन्तीसुतांस्तथा ५७ न
विब्रुवन्ति कौरव्याः प्रश्नमेतमिति स्म ह । सुजनः क्रोशति स्मात्र धृत-
राष्ट्रं विगर्हयन् ५८ ततो बाहू समुत्क्षिप्य निवार्य च सभासदः । विदुरः
सर्वधर्मज्ञ इदं वचनमब्रवीत्५९विदुर उवाच॥ द्रौपदी प्रश्नमुक्त्वैवं रोरवीति
त्वनाथवत् । न च विब्रूत तं प्रश्नं सभ्या धर्मोत्र पीड्यते ६० सभां प्रपद्यते
ह्यार्तः प्रज्वलन्निव हव्यवाट् । तं वै सत्येन धर्मेण सभ्याः प्रशमयन्त्युत ६१
धर्मप्रश्नमतो ब्रूयादार्यः सत्येन मानवः । विब्रूयुस्तत्र तं प्रश्नं कामक्रोध-
बलातिगाः ६२ विकर्णेन यथाप्रज्ञमुक्तः प्रश्नो नराधिपाः । भवन्तोपि हि
तं प्रश्नं विब्रुवन्तु यथामति ६३ यो हि प्रश्नं न विब्रूयाद्धर्मदर्शी सभांगतः ।
अनृते या फलावाप्तिस्तस्याः सोर्धं समश्नते ६४ यः पुनर्वितथं ब्रूयाद्ध-

---

भीमसेनाची फारच प्रशंसा केली ५५. (हे जनमेजयराजा, फेडतां फेडतां) वस्त्रांची एक रास सभेमध्यें पडल्यावर दुःशासन थकून गेला आणि लज्जित होऊन खालीं बसला ५६. कुंतीपुत्र पांडवांना त्याप्रमाणें (अंगावरचीं वस्त्रें काढून टाकून बसल्याचें) अवलोकन केल्यानंतर सभेंत बसलेल्या राजांनीं अंगावर रोमांच उभे राहतील इतक्या उच्च स्वरानें " धिक्कार असो, धिक्कार असो " असे (अत्यंत हृदयद्रावक) उद्गार काढिले ५७. " अरे, ह्या द्रौपदीच्या प्रश्नाचें कुरुवंशांतील पुरुषांनीं उत्तर दिलें नाहीं काय ? " असा जो तो सज्जन धृतराष्ट्राची निंदा करून आक्रोश करूं लागला ५८. तेव्हां (" थांबा, थांबा " ह्मणून) होन्ही हात वर करून सर्व सभासदांना थांबविल्यावर सर्वधर्मज्ञ विदुर असें भाषण करूं लागला ५९. विदुर ह्मणतोः— हे सभ्यहो, द्रौपदी ह्याप्रमाणें प्रश्न करून अनाथासारखी रोदन करीत आहे आणि तुह्मी तर त्या प्रश्नाला उत्तर देत नाहीं. परंतु, (ह्या तुमच्या स्तब्ध बसण्यानें) ह्या ठिकाणीं धर्माला बाध येत आहे ६०. प्रज्वलित अग्नीप्रमाणें आर्त जन (संतप्त होऊन सभेंत जात असतो आणि सत्य धर्माच्या योगानें सभासद त्याला शांत करीत असतात ६१. ह्यास्तव, सभ्य पुरुषानें सत्याचें अवलंबन करून धर्मविषयक प्रश्नाचें उत्तर द्यावें. सारांश, जो प्रश्न आर्त जन करील त्याचें सभासदांनीं लोभ व क्रोध ह्यांच्या तावडींत न सांपडतां उत्तर द्यावें ६२. हे भूपालहो, विकर्णानें आपल्या बुद्धीप्रमाणें ह्या प्रश्नाचें उत्तर दिलें आहे. करितां, तुह्मीही त्या प्रश्नाचें यथामति उत्तर द्या ६३. कारण, सभेमध्यें गेलेला जो धर्मज्ञ पुरुष प्रश्नाचें उत्तर देत नाहीं त्याला अनृतजन्य पापफलाचा अर्धा भाग प्राप्त

र्मदर्शी सभां गतः। अनृतस्य फलं कृत्स्नं संप्राप्नोतीति निश्चयः ६५अत्राप्युदाहरन्तीमामितिहासं पुरातनम्।प्रह्लादस्य च संवादं मुनेराङ्गिरसस्य च ६६ प्रह्लादो नाम दैत्येन्द्रस्तस्य पुत्रो विरोचनः।कन्याहेतोराङ्गिरसं सुधन्वानमुपाद्रवत् ६७अहं ज्यायानहं ज्यायानिति कन्येप्सया तदा।तयोर्देवनमत्रासीत्प्राणयोरिति नः श्रुतम् ६८ तयोः प्रश्नविवादोभूत्प्रह्लादं तावपृच्छताम् । ज्यायान्क आवयोरेकः प्रश्नं प्रब्रूहि मा मृषा ६९ स वै विवदनाद्भीतः सुधन्वानं विलोकयन्। तं सुधन्वाब्रवीत्क्रुद्धो ब्रह्मदण्ड इव ज्वलन् ७० यदि वै वक्ष्यसि मृषा प्रह्लादाथ न वक्ष्यसि । शतधा ते शिरो वज्री वज्रेण प्रहरिष्यति ७१ सुधन्वना तथोक्तः सन्व्यथितोश्वत्थपर्णवत् । जगाम कश्यपं दैत्यः परिप्रष्टुं महौजसम् ७२ प्रह्लाद उवाच ॥ त्वं वै धर्मस्य विज्ञाता दैवस्येहासुरस्य च । ब्राह्मणस्य महाभाग धर्मकृच्छ्रमिदं शृणु ७३ यो वै

होतो ६४ आणि त्याचप्रमाणें जो धर्मज्ञ पुरुष सभेमध्यें प्रश्नाचें उत्तर असत्य देतो त्याला अनृताचें संपूर्ण फल प्राप्त होतें; असा धर्मशास्त्राचा निश्चय आहे ६५. प्रल्हाद व आंगिरस मुनि ह्यांचा संवाद ह्मणून एक पुरातन इतिहास ह्याविषयीं सांगत असतात६६. प्रल्हाद ह्मणून एक श्रेष्ठ दैत्य असून त्याला विरोचन नांवाचा पुत्र होता. त्याचा कन्येकरितां अंगिरा मुनींच्या एका सुधन्वानामक पुत्राशीं पण झाला ६७. (कारण,"तुह्मापैकीं जो श्रेष्ठ असेल त्याला मी वरीन"असें केशिनीनामक राजकन्येनें त्यांना सांगितलें होतें. तेव्हां " मी श्रेष्ठ मी श्रेष्ठ " ह्मणून कन्येकरितां परस्परांशीं भांडत असलेल्या उभयतांचा प्राणांविषयी पण झाला (ह्मणजे निकृष्ट ठरून जो पराजित होईल त्यानें दुसऱ्याचें आजन्म दास्य करावें असा पण ह्या उभयतांमध्यें ठरला) ६८. ह्याप्रमाणें श्रेष्ठ कोण ह्या प्रश्नाविषयीं त्या उभयतांमध्यें विवाद झाला असतां "—आह्मां दोघांमध्यें कोण एक श्रेष्ठ आहे?—ह्या प्रश्नाचें उत्तर असत्य न देतां सत्य असेल तेंच दे" ह्मणून त्यांनीं प्रल्हादाला प्रश्न केला ६९. तेव्हां सुधन्व्याला अवलोकन करून तो प्रल्हाद असत्य भाषणाला भ्यायला. कारण, प्रत्यक्ष ब्रह्मदेवानें निर्माण केलेला कालदंडच की काय अशारीतीनें क्रुद्ध होऊन संतप्त झालेला सुधन्वा त्याला ह्मणाला ७०. " हे प्रल्हादा, जर असत्य भाषण करशील किंवा स्वस्थ राहशील तर तूं जिवंत राहणार नाहींस. वज्रपाणि इंद्र वज्राच्या योगानें तुझ्या मस्तकाचे शेंकडों तुकडे उडवील" ७१. ह्याप्रमाणें सुधन्व्याला ब्राह्मणानें सांगितलें असतां पिंपळाच्या पानाप्रमाणें तो दैत्य लटलट कांपूं लागला आणि ह्या प्रश्नाचें उत्तर विचारण्याकरितां महातेजस्वी कश्यपमुनीकडे तो गेला ७२. प्रल्हाद ह्मणतोः—हे महासमर्थ कश्यपमुने, आपण देव

प्रश्नं न विब्रूयाद्वितथं चैव निर्दिशेत्। के वै तस्य परे लोकास्तन्ममाचक्ष्व पृच्छतः ७४ कश्यप उवाच॥ जानन्नविब्रुवन्प्रश्नान्कामात्क्रोधाद्भयात्तथा। महस्रं वारुणान्पाशानात्मनि प्रतिमुञ्चति ७५ साक्षी वा विब्रुवन्साक्ष्यं गोकर्णशिथिलश्चरन्। महस्रं वारुणान्पाशानात्मनि प्रतिमुञ्चति ७६ तस्य संवत्सरे पूर्णे पाश एकः प्रमुच्यते। तस्मात्सत्यं तु वक्तव्यं जानता सत्यमञ्जसा ७७ विद्धो धर्मो ह्यधर्मेण सभां यत्रोपपद्यते। न चास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः ७८ अर्धं हरति वै श्रेष्ठः पादो भवति कर्तृषु। पादश्चैव सभासत्सु ये न निन्दन्ति निन्दितम् ७९ अनेना भवति श्रेष्ठो मुच्यन्ते च सभासदः। एनो गच्छति कर्तारं निन्दार्हो यत्र निन्द्यते ८० वितथं तु वदेद्युर्ये धर्मं प्रह्लाद पृच्छते। इष्टापूर्तं च ते घ्नन्ति सप्त सप्त परावरान् ८१ हृतस्वस्य हि यद्दुःखं हतपुत्रस्य चैव यत्। ऋणिनः प्रति यच्चैव स्वार्थाद्भ्रष्टस्य चैव यत् ८२ स्त्रियाः

आणि असुर ह्या दोहोंच्या धर्माचे ज्ञाते आहां. तेव्हां ब्राह्मणाचें हें धर्मसंकट आपण श्रवण करा ७३ आणि जो मुळींच प्रश्नाचें उत्तर देत नाहीं किंवा जो असत्य उत्तर देतो त्याला इहलोकानंतर दुसरे कोणते लोक प्राप्त होतात हें मी आपणांला विचारीत आहें तें आपण कथन करा७४. कश्यप सांगतातः—जाणीत असूनही लोभामुळें, क्रोधामुळें अथवा भयामुळें जो प्रश्नाचें उत्तर स्पष्टपणें देत नाहीं तो आपल्या ठिकाणीं सहस्र वरुणपाश अडकावून घेतो७५. त्याचप्रमाणें (खरें ज्ञान असूनही) जो साक्षीदार दोन्ही डगरीवर हात देऊन साक्ष स्पष्टपणें देत नाहीं तोही सहस्र वरुणपाश आपल्या गळ्यांत अडकावून घेतो ७६ आणि (अशा करण्यानें लगटलेल्या त्या पाशांपैकी संवत्सर पूर्ण झाला ह्मणजे एकेक पाश मोकळा होतो. तस्मात्, तत्त्वतः सत्य जाणणाऱ्या पुरुषानें सत्यच भाषण करावें ७७. ज्या सभेमध्यें अधर्मानें धर्म हणून पडला असतां सभासद धर्माचें तें शल्य नाहीसें करींत नाहींत त्या सभेंतील सभासद अधर्मानें विद्ध होतात ७८. ह्मणजे सभेमध्यें जो मुख्य अध्यक्ष असेल तो अधर्मजन्य पातकाचा अर्धा भागीदार होतो, कर्त्याकडे चतुर्थांश राहतो आणि निंद्य गोष्टीची निंदा जे करीत नाहींत त्या सभासदांकडे चतुर्थांश जातो ७९. त्याचप्रमाणें निंदेला पात्र असलेल्याची ज्या सभेमध्यें निंदा होते त्या सभेंतील मुख्य सभाध्यक्ष पातकापासून अलिप्त राहून इतर सभासदही पातकापासून मुक्त होतात आणि सर्व पातक कर्त्याकडेच जातें ८०. हे प्रल्हादा, जे धर्मविषयक प्रश्नाचें पृच्छकाला असत्य उत्तर देतात ते इष्टापूर्त फलाला मुकून पुढल्यामागल्या सात पिढ्याच्या सुगतीचा नाश करितात ८१. सर्वस्वापहार झालेला, पुत्र मरण पावलेला, ऋणी, स्वार्थाला मुकलेला ८२, पतिविहीन झालेली स्त्री,

पत्या विहीनाया राज्ञा ग्रस्तस्य चैव यत् । अपुत्रायाश्च यद्दुःखं व्याघ्रा-घ्रातस्य चैव यत् ८३ अध्यूढायाश्च यद्दुःखं साक्षिभिर्विहतस्य च । एतानि वै समान्याहुर्दुःखानि त्रिदिवेश्वराः ८४ तानि सर्वाणि दुःखानि प्राप्नोति वितथं ब्रुवन् । समक्षदर्शनात्साक्षी श्रवणाच्चेति धारणात् ८५ तस्मात्सत्यं ब्रुवन्साक्षी धर्मार्थाभ्यां न हीयते । कश्यपस्य वचः श्रुत्वा प्रह्लादः पुत्रम-ब्रवीत् ८६ श्रेयान्सुधन्वा त्वत्तो वै मत्तः श्रेयांस्तथाङ्गिराः । माता सुधन्व-नश्चापि मातृतः श्रेयसी तव ॥ विरोचन सुधन्वायं प्राणानामीश्वरस्तव ८७ सुधन्वोवाच ॥ पुत्रस्नेहं परित्यज्य यत्त्वं धर्मे व्यवस्थितः । अनुजानामि ते पुत्रं जीवत्वेष शतं समाः ८८ विदुर उवाच ॥ एवं वै परमं धर्मं श्रुत्वा सर्वे सभासदः । यथाप्रश्नं तु कृष्णाया मन्यध्वं तत्र किं परम् ८९ वैश-म्पायन उवाच ॥ विदुरस्य वचः श्रुत्वा नोचुः किंचन पार्थिवाः । कर्णो दुःशासनं त्वाह कृष्णां दासीं गृहं नय ९० तां वेपमानां सव्रीडां प्रलपन्तीं स्म पाण्डवान् । दुःशासनः सभामध्ये विचकर्ष तपस्विनीम् ९१ [२२१६]

राजानें ग्रासलेला पुरुष, पुत्रहीन स्त्री, व्याघ्रमुखीं पडलेलें मनुष्य ८३, सवत केलेली स्त्री आणि असत्य भाषण करून साक्षीदारांनीं बुडविलेला पक्षकार ह्या सर्वांचीं दुःखें समान असतात ह्मणून देवांनीं ह्मटलें आहे ८४. परंतु, समक्ष अवलोकन, विश्वासु मनुष्यापासून केलेलें श्रवण अथवा मनाची खात्री ह्याच्या विरुद्ध जो साक्षीदार खोटें सांगतो त्याला हीं सर्व दुःखें प्राप्त होतात. तस्मात्, सत्य सांगणारा साक्षीदार धर्म आणि अर्थ ह्यांपासून भ्रष्ट होत नाहीं ८५. ह्याप्रमाणें कश्यप मुनींचें भाषण श्रवण केल्यावर प्रल्हाद आपल्या पुत्राला ह्मणाला " तुझ्यापेक्षां सुधन्वा श्रेष्ठ असून (ह्याचा पिता) अंगिरा मुनि माझ्यापेक्षां श्रेष्ठ आहे ८६ आणि ह्या सुधन्व्याची माताही तुझ्या माते-पेक्षां श्रेष्ठ आहे. सारांश, हे विरोचना, हा सुधन्वा तुझ्या प्राणांचा धनी आहे ८७. सुधन्वा ह्मणतोः—(हे प्रल्हादा,)पुत्रप्रेमाची परवा न करितां, ज्याअर्थीं तूं धर्माचें अवलंबन करून राहिलास त्याअर्थीं मी तुझ्या पुत्राला अनुज्ञा देतों. ह्याला शंभर वर्षें वाचूं दे. ८८. विदुर ह्मणतोः—ह्याप्रमाणें उत्कृष्ट धर्म श्रवण करून तुह्मी सर्व सभासद द्रौपदीच्या प्रश्नाप्रमाणें द्यूतामध्यें स्त्री जिंकिली किंवा नाहीं ह्याचा काय तो पक्का विचार करा ८९. वैशंपायन सांगतातः—विदुराचें भाषण श्रवण केल्यावरही भूपालांनीं कांहींच उत्तर केलें नाहीं. कर्णमात्र " ह्या दासी द्रौपदीला घरीं ने " ह्मणून दुःशासनाला ह्मणाला ९०. तेव्हां ती बिचारी लज्जित झालेली द्रौपदी कांपत कांपत पांडवांच्या नांवानें सभेमध्यें आक्रोश करूं लागली असतांना दुःशासनानें तिला ओढिली ९१. ह्याप्रमाणें०सभाप-

इति श्री०सभापर्वणि द्यूतपर्वणि द्रौपद्याकर्षणेऽष्षष्टितमोऽध्यायः ॥ ६८ ॥

द्रौपद्युवाच ॥ तावत्प्रतीक्ष दुष्प्रज्ञ दुःशासन नराधम । पुरस्तात्करणीयं मे न कृतं कार्यमुत्तरम् १ विह्वलास्मि कृतानेन कर्षता बलिना बलात् २ अभिवादं करोम्येषां कुरूणां कुरुसंसदि । न मे स्यादपराधोयं यदिदं न कृतं मया ३ वैशम्पायन उवाच ॥ सा तेन च समाधूता दुःखेन च तपस्विनी । पतिता विललापेदं सभायामतथोचिता ४ द्रौपद्युवाच ॥ स्वयंवरे यास्मि नृपैर्दृष्टा रङ्गे समागतैः । न दृष्टपूर्वा चान्यत्र साहमद्य सभां गता ५ यां न वायुर्न चादित्यो दृष्टवन्तौ पुरा गृहे । साहमद्य सभामध्ये दृश्यामि जनसंसदि ६ यां न मृष्यन्ति वातेन स्पृश्यमानां गृहे पुरा । स्पृश्यमानां सहन्तेद्य पाण्डवास्तां दुरात्मना ७ मृष्यन्ति कुरवश्चेमे मन्ये कालस्य पर्ययम् । स्नुषां दुहितरं चैव क्लिश्यमानामनर्हतीम् ८ किं न्वतः कृपणं भूयो यदहं स्त्री सती शुभा । सभामध्यं विगाहेय क्व नु धर्मो महीक्षिताम् ९

वरील द्यूतपर्वांपैकीं द्रौपदीच्या आकर्षणाविषयीं अडुसष्टावा अध्याय समाप्त झाला॥६८॥

द्रौपदी ह्मणतेः—हे नराधमा दुःशासना, जरा उभा रहा. पूर्वी जें करावयाला पाहिजे होतें तें मुख्य कर्तव्य मीं तेव्हां केलें नाहीं. कारण, त्या वेळेस बलात्कारानें ओढीत असलेल्या ह्या बलाढ्य दुःशासनानें मला अगदीं विव्हल करून टाकिली होती १,२. करितां, कुरुसभेमध्यें असलेल्या ह्या कुरुवंशजांना मी वंदन करितें. माझ्या हातून हें वंदनकर्म पूर्वी झालें नाहीं हा माझा अपराध नव्हें ३. वैशंपायन सांगतातातः—नंतर दुःशासनानें तिला हिसकली असतां ती बिचारी भूमीवर पडली आणि तसें करण्यास योग्य नसलेली ती द्रौपदी दुःखानें असा विलाप करूं लागली ४. द्रौपदी ह्मणतेः—स्वयंवरसमयीं रंगसभेमध्यें जुळलेल्या नृपांवांचून मी जी आजपर्यंत दुसऱ्या ठिकाणीं कोणाच्याही दृष्टीं पडलेली नाहीं ती आज ह्या सभेमध्यें आलें आहें ५. आजपर्यंत घरामध्यें वायु व सूर्य ह्यांना देखील जिचें दर्शन झालें नाहीं ती मी आज सभेमध्यें लोकसमाजांत (सर्वांच्या) दृष्टीं पडत आहें ६. घरीं असतांना जिला वायूनेंही स्पर्श केलेला पांडवांना कधींही खपला नाहीं त्या मज द्रौपदीला ह्या दुरात्म्या दुःशासनाचा स्पर्श होत असतांना आज पांडव सहन करीत आहेत ७ आणि अशाप्रकारें क्लेश भोगण्यास अयोग्य असलेली मी ज्यांना स्नुषेप्रमाणें आणि दुहितेप्रमाणें आहें ते हे (भीष्मप्रभृति) कुरुवंशजही मी क्लेश भोगीत असतांना सहन करीत आहेत. तस्मात्, हीं कालाची गति आहे असें मला वाटतें ८. अहो, आचरणानें शुद्ध अशी मी पतिव्रता स्त्री (पुरुषांच्या) सभेमध्यें आज आलें आहे ह्यापेक्षां आणखी दुःखास्पद तें काय असणार ?

धर्म्यां स्त्रियं सभां पूर्वे न नयन्तीति नः श्रुतम् । स नष्टः कौरवेयेषु पूर्वो धर्मः सनातनः १० कथं हि भार्या पाण्डूनां पार्षतस्य स्वसा सती । वासुदेवस्य च सखी पार्थिवानां सभामियाम् ११ तामिमां धर्मराजस्य भार्यां सदृशवर्णजाम् । ब्रूत दासीमदासीं वा तत्करिष्यामि कौरवाः १२ अयं मां सुदृढं क्षुद्रः कौरवाणां यशोहरः । क्लिश्नाति नाहं तत्सोढुं चिरं शक्ष्यामि कौरवाः १३ जितां व्याप्यजितां वापि मन्यध्वं मां यथा नृपाः । तथा प्रत्युक्तमिच्छामि तत्करिष्यामि कौरवाः १४ भीष्म उवाच ॥ उक्तवानस्मि कल्याणि धर्मस्य परमा गतिः । लोके न शक्यते ज्ञातुमपि विज्ञैर्महात्मभिः १५ बलवांश्च यथा धर्मं लोके पश्यति पूरुषः । स धर्मो धर्मवेलायां भवत्यभिहतः परः १६ न विवक्तुं च ते प्रश्नमिमं शक्नोमि निश्चयात् । सूक्ष्मत्वाद्गहनत्वाच्च कार्यस्यास्य च गौरवात् १७ नूनमन्तः कुलस्यास्य भविता न चिरादिव । तथा हि कुरवः सर्वे लोभमोहपरायणाः १८ कुलेषु

अहो, भूपालांचा धर्म तरी कोठें गेला आहे? ९. पूर्वीचेही लोक धर्माला अनुसरून वागत असलेल्या स्त्रीला सभेमध्यें नेत नसत असें आमच्या ऐकण्यांत आहे. परंतु, कुरुवंशजांमध्यें तो पूर्वीचा सनातन धर्म सांप्रत नष्ट झाला आहे १०. अहो (नाहीं तर) पांडवांची भार्या, धृष्टद्युम्नाची भगिनी व प्रत्यक्ष वासुदेवाची मैत्रीण राजसभेमध्यें येईल कशी? ११. तस्मात्, हे कौरवहो, अशा स्थितीला येऊन पोंचलेली मी धर्मराजाची समानवर्ण भार्या दासी आहे किंवा नाहीं हें काय तें सांगा; ह्मणजे मी त्याप्रमाणें करीन १२. कौरवांच्या कीर्तीला कलंक लावणारा हा नीच दुःशासन मला जे पराकाष्ठेचे क्लेश देत आहे ते, हे कौरवहो, माझ्यानें फारवेळ सहन करवणार नाहींत १३. हे नृपहो, मी जित किंवा अजित हें तुह्मी काय तें ठरवा आणि त्याचप्रमाणें, हे कौरवहो, तुह्मीही मला काय तें प्रत्युत्तर द्या; ह्मणजे मी त्याप्रमाणें वागेन १४. भीष्म ह्मणतातः— हे कल्याणि, जगतांतील महात्म्या ज्ञानवान् लोकांनाही समजण्यास अशक्य अशी धर्माची गति फारच सूक्ष्म असल्याचें मीं तुला पूर्वीच सांगितलें आहे १५. जगतामध्यें बलाढ्य पुरुषाचा ज्याप्रमाणें धर्मप्रसंगीं कल असतो तो (वस्तुतः अधर्म असूनही) धर्म ठरतो आणि दुर्बलानें सांगितलेला (जरी खरा धर्म असला तरी) हाणून पाडला जातो १६. तस्मात्, ही गोष्ट फारच गहन, महत्त्वाची व सूक्ष्म विचाराची असल्यामुळें तुझ्या ह्या प्रश्नाचा निःसंशय निर्णय करण्यास मी असमर्थ आहें १७. ज्याअर्थी सर्व कुरुवंशज

---

१ ह्यावरून पुरुषांच्या समाजामध्यें गरती स्त्रियांनीं जाणें ही गोष्ट आतांच नव्हें परंतु, अनादिकालापासून नित्य मानिली जात असल्याचें सिद्ध आहे.

जाताः कल्याणि व्यसनैराहता भृशम् । धर्म्यान्मार्गान्न च्यवन्ते येषां नस्त्वं वधूः स्थिता १९ उपपन्नं च पाञ्चालि तवेदं वृत्तमीदृशम् । यत्कृच्छ्रमपि संप्राप्ता धर्ममेवान्ववेक्षसे २० एते द्रौणादयश्चैव वृद्धा धर्मविदो जनाः । शून्यैः शरीरैस्तिष्ठन्ति गतासव इवानताः २१ युधिष्ठिरस्तु प्रश्नेस्मिन्प्रमाणमिति मे मतिः । अजितां वा जितां वेति स्वयं व्याहर्तुमर्हति २२ [२३३८] इति०सभापर्वणि द्यूतपर्वणि भीष्मवाक्य एकोनसप्ततितमोध्यायः ॥ ६९ ॥

वैशम्पायन उवाच ॥ तथा च दृष्ट्वा बहु तत्र देवीं रोरूयमाणां कुररीमिवार्ताम् । नोचुर्वचः साध्वथ वाप्यसाधु महीक्षितो धार्तराष्ट्रस्य भीताः १ दृष्ट्वा तथा पार्थिवपुत्रपौत्रांस्तूष्णींभूतान्धृतराष्ट्रस्य पुत्रः । स्मयन्निवेदं वचनं बभाषे पाञ्चालराजस्य सुतां तदानीम् २ दुर्योधन उवाच ॥ तिष्ठत्वयं प्रश्न उदारसत्त्वे भीमेर्जुने सहदेवे तथैव । पत्यौ च ते नकुले याज्ञसेनि वदन्त्वेते वचनं त्वत्प्रसूतम् ३ अनीश्वरं विब्रुवन्त्वार्यमध्ये युधिष्ठिरं तव पाञ्चालि

मुख्यतः लोभाचें व मोहाचें अवलंबन करून राहिले आहेत त्याअर्थी खरोखर ह्या कुरुकुलाचा लवकरच नाश होणार (असें दिसतें) १८. हे कल्याणि, ज्या आमच्या पांडवांची तूं पत्नी आहेस ते पांडव कुलीन आहेत आणि ह्मणूनच संकटांनीं अत्यंत ग्रस्त झाले असतांही धर्माला अनुसरून असलेल्या मार्गापासून ते ढळत नाहींत १९. हे पांचालि, तूं संकटांत सांपडलेली असतांही तुझ्या बुद्धीचा कल धर्माकडेच आहे हें वर्तन तुला अगदीं योग्य आहे २०. हे द्रोणाचार्यप्रभृति धर्मवेत्ते वृद्ध लोक खालीं माना घालून गतप्राण झाल्यासारखे निश्चेष्ट बसले आहेत २१. तेव्हां ह्या प्रश्नाविषयीं युधिष्ठिरच प्रमाणभूत आहे (ह्मणजे तो सांगेल तेंच प्रमाण) असें मला वाटतें. कारितां, द्रौपदी जिंकिली नाहीं किंवा जिंकिली हें त्यानें स्वतःच काय तें सांगावें २२. ह्याप्रमाणें०सभापर्वांतील द्यूतपर्वांपैकीं भीष्मांच्या भाषणाविषयीं एकुणसत्तरावा अध्याय समाप्त झाला ॥६९॥

वैशंपायन सांगतातः—तशास्थितीमध्यें असलेली राजपत्नी द्रौपदी कुररीपक्षिणीप्रमाणें दुःखित होऊन त्या सभेमध्यें एकसारखी रोदन करीत असल्याचें अवलोकन करूनही धृतराष्ट्रपुत्रदुर्योधनाच्या भीतीमुळें तेथें असलेले भूपाल बरें अथवा वाईट कांहींच उत्तर देईनात १. तेव्हां राजे व त्यांचे पुत्रपौत्र तशाप्रकारें स्वस्थ बसल्याचें अवलोकन करून धृतराष्ट्रपुत्र दुर्योधन उपहासपूर्वक पांचालराजाची कन्या जी द्रौपदी तिला त्या प्रसंगीं असें ह्मणाला २. दुर्योधन ह्मणतोः— हे उदार द्रौपदी (अर्थात् उदार मनामुळें अनेक पुरुषांचा पति ह्मणून निःशंकपणें स्वीकार करणारे द्रौपदि) भीम, अर्जुन, सहदेव आणि त्याचप्रमाणें तुझा (चवथा) पति नकुल ह्यांच्यावर हा प्रश्न (अवलंबून)

हेतोः । कुर्वन्तु सर्वे चानृतं धर्मराजं पाञ्चालि त्वं मोक्ष्यसे दासभावात् ४ धर्मे स्थितो धर्मसुतो महात्मा स्वयं चेदं कथयत्विन्द्रकल्पः । ईशो वा ते यद्यनीशोथवैष वाक्यादस्य क्षिप्रमेकं भजस्व ५ सर्वे हीमे कौरवेयाः सभायां दुःखान्तरे वर्तमानास्तवैव । न विब्रुवन्त्यार्यसत्त्वा यथावत्पर्तीश्च ते समवेक्ष्याल्पभाग्यान् ६ वैशम्पायन उवाच ॥ ततः सभ्याः कुरुराजस्य तस्य वाक्यं सर्वे प्रशशंसुस्तथोच्चैः । चेलावधांश्चापि चक्रुर्नदन्तो हाहेत्यासीदपि चैवार्तनादः ७ श्रुत्वा तु तद्वाक्यमनोहरं तद्धर्षश्चासीत्कौरवाणां सभायाम् । सर्वे चासन्पार्थिवाः प्रीतिमन्तः कुरुश्रेष्ठं धार्मिकं पूजयन्तः ८ युधिष्ठिरं च ते सर्वे समुदैक्षन्त पार्थिवाः । किं नु वक्ष्यति धर्मज्ञ इति साचीकृताननाः ९ किं नु वक्ष्यति बीभत्सुरजितो युधि पाण्डवः । भीमसेनो यमौ चोभौ भृशं कौतूहलान्विताः १० तस्मिन्नुपरते शब्दे भीमसेनो-

---

राहूं दे आणि हे, द्रौपदि, तुझ्या मुखांतून निघालेल्या प्रश्नाचें उत्तर काय तें ह्यांनाच देऊं दे ३. हे पांचालि, पराधीन असलेल्या युधिष्ठिराला ह्या आर्यसमुदायामध्यें तुझ्या करितां तुझे हे चौघे पति मोडून काढूं देत. सारांश, हे पांचालि, ह्या सर्वांनीं धर्मराजाला असत्य ठरवूं दे; ह्मणजे तूं (आमच्या) दास्यापासून मुक्त होशील ४. त्याचप्रमाणें " मी तुझा स्वामी आहें किंवा नाहीं " हें ह्या महात्म्या इंद्रसमान असलेल्या धर्मनिष्ठ व धर्मपुत्र युधिष्ठिराला च सांगूं दे; ह्मणजे ह्याच्या ह्मणण्याप्रमाणें तूं कोणत्या त्या एका निश्चयाचें सत्वर अवलंबन कर ५. हे सर्व कुरुवंशज सभेमध्यें तुझ्याच दुःखाचा विचार करीत आहेत. परंतु, तुझ्या मंदभाग्य पतीकडे पाहून ह्या सत्त्वशील कुरुवंशजांना (तूं जिंकिली गेलीस असें) खरेंखरें सांगवत नाहीं ६. वैशंपायन सांगतातः—तदनंतर त्या कुरुराज दुर्योधनाच्या भाषणाची सर्व सभासदांनीं उच्च स्वरानें प्रशंसा केली आणि गर्जना करीत करीत त्यांनीं आपआपलीं वस्त्रेंही फिरविली. परंतु, (यथान्याय असेल तेंच भाषण करणाऱ्या पांडवांनीं न्यायाला अनुसरून द्रौपदी जिंकिली नाहीं असें सांगितलें असतां ती दास्यांतून मुक्त होईल व त्याच्या योगानें आह्मांला दुःख होईल अशी कल्पना मनांत आल्यामुळें) कांहीं लोक हाय हाय ह्मणून आर्तस्वरही करूं लागले ७. सारांश, दुर्योधनाचें तें मनोहर भाषण श्रवण करून सभेंतील (भीष्मप्रभृति) कौरवांना आनंद झाला आणि कुरुश्रेष्ठ व धर्मनिष्ठ अशा युधिष्ठिराची सर्व भूपाल आनंदपूर्वक प्रशंसा करूं लागले ८. ते सर्व भूपाल " आतां हा धर्मवेत्ता काय उत्तर देतो " ह्मणून तोंडें फिरवून युधिष्ठिराच्या मुखाकडे पाहूं लागले ९ आणि त्याचप्रमाणें समरांगणामध्यें अजिंक्य असलेला पांडुपुत्र अर्जुन, भीमसेन आणि उभयतां नकुल सहदेव हेही आतां

ब्रवीदिदम् । प्रगृह्य रुचिरं दिव्यं भुजं चन्दनचर्चितम् ११ भीमसेन उवाच॥ यद्येष गुरुरस्माकं धर्मराजो महामनाः । न प्रभुः स्यात्कुलस्यास्य न वयं मर्षयेमहि १२ ईशो नः पुण्यतपसां प्राणानामपि चेश्वरः । मन्यते जितमात्मानं यद्येष विजिता वयम् १३ न हि मुच्येत मे जीवन्पदा भूमिमुपस्पृशन् । मर्त्यधर्मा परामृश्य पाञ्चाल्या मूर्धजानिमान् १४ पश्यध्वं ह्यायतौ वृत्तौ भुजौ मे परिघाविव । नैतयोरन्तरं प्राप्य मुच्येतापि शतक्रतुः १५ धर्मपाशसितस्त्वेवं नाधिगच्छामि सङ्कटम् । गौरवेण निरुद्धश्च नियहादर्जुनस्य च १६ धर्मराजनिसृष्टस्तु सिंहः क्षुद्रमृगानिव । धार्तराष्ट्रानिमान्पापान्निष्पिषेयं तलासिभिः १७ वैशम्पायन उवाच॥ तमुवाच तदा भीष्मो द्रोणो विदुर एव च । क्षम्यतामिदमित्येवं सर्वं संभाव्यते त्वयि १८[२३५६] इति०

काय ह्मणतील ह्मणूनही त्या भूपालांना अत्यंत उत्कंठा उत्पन्न झाली १०. तदनंतर तो गडबड थांबल्यावर चंदनाची उटी लाविलेला आपला मनोहर हात पुढें करून भीमसेन ह्मणला ११ " आह्मांला गुरुस्थानीं असलेला हा धर्मराज जर ह्या कुलाचा अधिपति नसता तर आह्मीं हें सहन केलें नसतें (परंतु, हा ह्या कुलाचा स्वामी असल्यामुळें आह्मांला सहन करणें भाग आहे) १२. हा धर्मराज आमचें उत्कृष्ट तप व प्राण ह्यांचाही अधिपति आहे. तेव्हां हा जर (द्रौपदीला पणाला लावण्यापूर्वी) स्वतः जिंकिला गेला होता असें समजत असेल तर (द्रौपदीला पणाला लावितेवेळीं तो तिचा स्वामी नसल्यामुळें ती जिंकिली गेली नाहीं हें उघड होणार असून ह्या द्रौपदीसंबंधाच्या वादामध्यें) आमचाही जय झाल्याचें सिद्ध होणार आहे १३. अरे, (द्रौपदीजर जिंकिली नसेल तर) पायानें भूमीवर संचार करणारा कोणीही (भूचर) मर्त्य प्राणी पांचालीच्या ह्या केसांना स्पर्श केल्यावर माझ्या हातून जिवंत सुटणार नाहीं १४. अहो परिघसंज्ञक आयुधाप्रमाणें (बळकट) असलेले माझे हे लांब व गरगरीत बाहु तुह्मीं पाहून तर ठेवा. इंद्रही ह्यांच्या मिठींत सांपडला असतां सुटणार नाहीं १५. (परंतु, करूं काय ?) धर्मपाशानें बद्ध झाल्यामुळें, (धर्म न सोडण्याविषयीं) अर्जुनाचा आग्रह असल्यामुळें आणि धर्माविषयीं श्रेष्ठ बुद्धि स्वतःच्याही मनामध्यें वास करीत असल्यामुळें मला ह्या संकटांतून पार पडतां येत नाहीं १६. धर्मराजा जर अनुज्ञा देईल तर क्षुद्र मृगांचा वध करणाऱ्या सिंहाप्रमाणें ह्या पापी धृतराष्ट्रपुत्रांचा तलहस्तरूप खड्गांनींच चुराडा करून टाकीन १७ वैशंपायन सांगतातः—(ह्याप्रमाणें भीमसेन बोलूं लागला असतां) भीष्म, द्रोण व विदुर हें त्याला ह्मणालें ? " तूं ह्याची क्षमा कर. हें सर्व कांहीं तुझ्या हातून होणारें आहे " १८. ह्याप्रमाणें० सभापर्वांतील

श्रीमहाभारते सभापर्वणि द्यूतपर्वणि भीमवाक्ये सप्ततितमोऽध्यायः ॥ ७० ॥

कर्ण उवाच ॥ त्रयः किलेमे सधनाः सभायां भीष्मः क्षत्ता कौरवाणां गुरुश्च । ये स्वामिनं दुष्टतमं वदन्ति वाञ्छन्ति वृद्धिं न च विक्षिपन्ति १ त्रयः किलेमे ह्यधना भवन्ति दासः पुत्रश्चास्वतन्त्रा च नारी । दासस्य पत्नी त्वधनस्य भद्रे हीनेश्वरे दासधनं च सर्वम् २ प्रविश्य राज्ञः परिवारं भजस्व तत्ते कार्यं शिष्टमादिश्यतेत्र । ईशास्तु सर्वे तव राजपुत्रि भवन्ति वै धार्तराष्ट्रा न पार्थाः ३ अन्यं वृणीष्व पतिमाशु भाविनि यस्माद्दास्यं न लभसि देवनेन । अवाच्या वै पतिषु कामवृत्तिर्नित्यं दास्ये विदितं तत्त्वास्तु ४ पराजितो नकुलो भीमसेनो युधिष्ठिरः सहदेवार्जुनौ च । दासीभूता त्वं हि वै याज्ञसेनि पराजितास्ते पतयो नैव

द्यूतपर्वापैकीं भीमसेनाच्या वाक्याविषयीं सत्तरावा अध्याय समाप्त झाला ॥ ७० ॥

कर्ण ह्मणतोः—ह्या सभेमध्यें भीष्म, दासीपुत्र विदुर आणि कौरवगुरु द्रोणाचार्य हे धर्माचें उल्लंघन करण्यास समर्थ आहेत. हे त्रिवर्ग आपल्या स्वामीलाच अत्यंत दुष्ट ह्मणून ह्मणत असतात; इतकेच नव्हे परंतु त्याचा समूल उच्छेद होण्याची इच्छा धरीत असून स्वामिद्रोहासारिखें महापातक करण्यास त्यांच्या मनांत शंकाही येत नाहीं १. (हे द्रौपदि) दास, स्त्री आणि पुत्र हे तीन (अनुक्रमें धनी पति व पिता असतांना) निर्धन व अस्वतंत्र होत. तेव्हां, दास झाल्यामुळें जो निर्धन बनला ह्मणजे ज्याचें स्वामित्व कशावरच राहिलें नाहीं त्याची (दासभाव प्राप्त होण्यापूर्वी स्वातंत्र्यावस्थेतील) पत्नी व इतरही सर्वप्रकारचें धन हीं उभयतां स्वामिरहित होऊन दासाच्या पालकाकडे जावयाचीं असतात २. करितां, तूं आतां राजवाड्यांत जाऊन धृतराष्ट्रराजाच्या परिवाराला धरून रहा. हें आतां तुझें कर्तव्य उरलें आहे. कारण, हे राजकन्ये, आतां कुंतीपुत्र तुझे स्वामी नसून सर्व धृतराष्ट्रपुत्र तुझे प्रभु आहेत ३. हे स्वेच्छाचारिणि द्रौपदि, ज्याच्यापासून तुला द्यूताच्या योगानें पुनरपि दास्य प्राप्त होणार नाहीं असा दुसरा एकादा पति (रतिक्रीडेचा उपभोग घेण्याकरितां) तूं सत्वर वर. कारण, पति असल्यास स्त्रियांना स्वैर वर्तन अयोग्य असून दासत्व असल्यास त्यांना नित्य यथेष्ट वर्तन करण्यास प्रतिबंध नसतो हें तुला विदित असूं दे (सारांश, पत्नीत्व स्वीकारिल्यामुळें तुला परिमित पुरुषांचाच समागम होत होता. परंतु, आतां पूर्वीचे पति जिंकिले गेल्याकारणानें तुझ्या वरील त्यांचें स्वाम्य नष्ट झाल्यामुळें सुदैवानें तुला दासीपणा अर्थात् वेश्यात्व प्राप्त झालें आहे. करितां, अपरिमित पतींचा उपभोग प्राप्त करून देणारें दास्यच तुला बरें आहे असें तूं समज) ४. हे द्रौपदि, नकुल, भीमसेन, युधिष्ठिर, सहदेव आणि अर्जुन

सन्ति ५ प्रयोजनं जन्मनि किं न मन्यते पराक्रमं पौरुषं चैव पार्थः। पाञ्चालस्य द्रुपदस्यात्मजामिमां सभामध्ये यो व्यदेवीद्बलेषु ६ वैशम्पायन उवाच ॥ तद्वै श्रुत्वा भीमसेनोत्यमर्षी भृशं निश्श्वास तदार्तरूपः। राजानुगो धर्मपाशानुबद्धो दहन्निवैनं क्रोधसंरक्तदृष्टिः ७ भीमसेन उवाच॥ नाहं कुप्ये सूतपुत्रस्य राजन्नेष सत्यं दासधर्मः प्रदिष्टः। किं विद्विषो वै मामेवं व्याहरेयुर्नादेवीस्त्वं यद्यनया नरेन्द्र ८ वैशम्पायन उवाच ॥ भीमसेनवचः श्रुत्वा राजा दुर्योधनस्तदा। युधिष्ठिरमुवाचेदं तूष्णींभूतमचेतनम् ९ भीमार्जुनौ यमौ चैव स्थितौ ते नृप शासने। प्रश्नं ब्रूहि च कृष्णां त्वमजितां यदि मन्यसे १० एवमुक्त्वा तु कौन्तेयमपोह्य वसनं स्वकम्। स्मयन्निवैक्ष्य पाञ्चालीमैश्वर्यमदमोहितः ११ कदलीदण्डसदृशं

आणि त्याचप्रमाणें बोलण्यामध्येंच शूर असलेल्या ह्या कठोरभाषणी दुरात्म्या दुःशासनाचें रक्त मृगराज सिंहाप्रमाणें मी प्राशन करीन " २९. अर्जुन ह्मणतोः—हे भीमसेना, सज्जनांचा मनोरथ ह्याप्रमाणें शब्दांनीं (पूर्वी कधीं) समजण्यांत येत नसतो. (करितां, आज बोलण्यांत कांहीं अर्थ नाहीं) आजपासून चवदाव्या वर्षीं काय काय होईल तें पाहूं ३०. भीमसेन ह्मणतोः—दुर्योधन, कर्ण, दुरात्मा शकुनि व चवथा दुःशासन ह्या चौघांचें रक्त भूमि प्राशन करील (आणखी तें काय होणार आहे?)३१. अर्जुन ह्मणतोः—हे भीमसेना, मत्सरानें भरलेला, (आमचें वाईट करण्याविषयीं) दुसऱ्यांना उत्तेजन देणारा आणि बढाया मारणारा जो कर्ण त्याचा वध तुझ्या आज्ञेवरून मी युद्धामध्यें करीन ३२. (हे सभासदहो) भीमसेनाचा मनोरथ सिद्धीस नेण्याकरितां (हा) अर्जुन प्रतिज्ञा करीत आहे (इकडे लक्ष्य द्या). कर्ण व कर्णाचे अनुयायी ह्यांचा मी बाणांच्या योगानें संग्रामामध्यें वध करीन ३३ व त्याचप्रमाणें बुद्धीला मोह पडून जे कोणी इतर भूपति माझ्याशीं युद्ध करितील त्याही सर्वांना मी बाणांच्या योगानें यमसदनीं पोंचवीन ३४. (अहो, खरोखर) जर हिमालय स्थानापासून चळेल, सूर्य निस्तेज होईल आणि चंद्रापासून शैत्यही नाहींसें होईल तर माझ्या सत्य प्रतिज्ञेचा भंग होईल ३५. (तस्मात् ,) आजपासून चवदाव्या वर्षीं सत्कारपूर्वक जर दुर्योधनानें आमचें राज्य परत दिलें नाहीं तर ह्या गोष्टी निःसंशय घडून येणार ३६. वैशंपायन सांगतातः—ह्याप्रमाणें कुंतीपुत्र अर्जुनानें प्रतिज्ञा केली असतां सुबलपुत्र

निःश्वसन्निव पन्नगः ३८ सहदेव उवाच ॥ अक्षान्यान्मन्यसे मूढ गान्धाराणां यशोहर । नैतेक्षा निशिता बाणास्त्वयैते समरे वृताः ३९ यथा चैवोक्तवान्भीमस्त्वामुद्दिश्य सबान्धवम् । कर्ताहं कर्मणस्तस्य कुरु कार्याणि सर्वशः ४० हन्तास्मि तरसा युद्धे त्वामेवह सबान्धवम् । यदि स्थास्यसि सङ्ग्रामे क्षत्रधर्मेण सौबल ४१ सहदेववचः श्रुत्वा नकुलोपि विशांपते । दर्शनीयतमो नृणामिदं वचनमब्रवीत् ४२ नकुल उवाच ॥ सुतेयं यज्ञसेनस्य द्यूतेस्मिन्धृतराष्ट्रजैः । यैर्वाचः श्राविता रूक्षाः स्थितैर्दुर्योधनप्रिये ४३ तान्धार्तराष्ट्रान्दुर्वृत्तान्मुमूर्षून्कालचोदितान् । गमयिष्यामि भूयिष्ठानहं वैवस्वतक्षयम् ४४ निदेशाद्धर्मराजस्य द्रौपद्याः पदवीं चरन् । निर्धार्तराष्ट्रां पृथिवीं कर्तास्मि न चिरादिव ४५ वैशम्पायन उवाच ॥ एवं ते पुरुषव्याघ्राः सर्वे व्यायतबाहवः । प्रतिज्ञा बहुलाः कृत्वा धृतराष्ट्रमुपागमन् ४६ [२५३९] इति० सभापर्वण्यनुद्यूतपर्वणि पाण्डवप्रतिज्ञाकरणे सप्तसप्ततितमोध्यायः ॥ ७७ ॥

शकुनीचा वध करण्याची इच्छा करणारा प्रतापी व वैभवशाली माद्रीपुत्र सहदेव क्रोधामुळें आरक्तवर्ण नेत्रांनीं युक्त होऊन सर्पाप्रमाणें सुस्कारे टाकीत ह्मणाला ३७,३८ " हे मूढा, जे तूं फांसे समजत आहेस ते हे फांसे नव्हेत. परंतु, हे गांधारकुलकलंका, समरांगणामध्यें (स्वतःच्या प्राणांची वाट लागण्याकरितां) तूं हे तीक्ष्ण बाण वर ह्मणून मागून घेतले आहेस (असें पक्कें समज) ३९. अरे, भीमसेनानें बांधवांसहवर्तमान तुला उद्देशून ज्याप्रमाणें सांगून ठेविलें आहे त्याप्रमाणें मी तें कर्म करणारा आहें. करितां, तुझी जीं जीं ह्मणून कांहीं इहलोकसंबंधीं कृत्यें करावयाचीं शिलक असतील तीं तीं सर्व तूं आपलीं उरकून घे ४०. कारण, हे सुबलपुत्रा, तं जर क्षत्रधर्म स्मरून संग्रामामध्यें उभा राहशील तर स्वसामर्थ्यानें मी तुझा बांधवांसहवर्तमान वध करीन" ४१. हे प्रजाधिपते जनमेजया, सहदेवाचें भाषण श्रवण करून मनुष्यांमध्यें अतिशयच सुंदर असलेल्या नकुलानेंही असें भाषण केलें ४२. नकुल ह्मणतोः—दुर्योधनाचें प्रिय करण्याकरितां उद्युक्त झालेल्या ज्या धृतराष्ट्रपुत्रांनीं ह्या द्यूतामध्यें ह्या द्रुपदकन्येला उद्देशून मर्मभेदक भाषणें केलीं आहेत ४३ त्या कालप्रेरित आणि ह्मणूनच आसन्नमरण झालेल्या बहुतेक सर्व धृतराष्ट्रपुत्रांना मी यमसदनीं पोंचवीन ४४. सारांश, धर्मराज जर अनुज्ञा देईल तर द्रौपदीप्रमाणेंच तो सांगेल तसें वागणारा मी थोडक्याच काळांत ह्या पृथ्वीवर धृतराष्ट्रपुत्र शिलक ठेवणार नाहीं ४५. वैशंपायन सांगतातः— ह्याप्रमाणें मोठमोठ्या प्रतिज्ञा केल्यानंतर ते सर्व महापराक्रमी पुरुषश्रेष्ठ पांडव धृतराष्ट्रासमीप गेले ४६. ह्याप्रमाणें महामुनिकृष्णद्वैपायनप्रणीतलक्षग्रंथात्मक श्रीमहाभारतांतर्गत सभापर्वांतील

युधिष्ठिर उवाच॥ आमन्त्रयामि भरतांस्तथा वृद्धं पितामहम्। राजानं सोमदत्तं च महाराजं च बाह्लिकम् १ द्रोणं कृपं नृपांश्चान्यानश्वत्थामानमेव च। विदुरं धृतराष्ट्रं च धार्तराष्ट्रांश्च सर्वशः २ युयुत्सुं संजयं चैव तथैवान्यान्सभासदः। सर्वानामन्त्र्य गच्छामि द्रष्टास्मि पुनरेत्य वः ३ वैशम्पायन उवाच॥ न ते किंचिदथोचुस्ते ह्रिया सन्ना युधिष्ठिरम्। मनोभिरेव कल्याणं दध्युस्ते तस्य धीमतः ४ विदुर उवाच॥ आर्या पृथा राजपुत्री नारण्यं गन्तुमर्हति। सुकुमारी च वृद्धा च नित्यं चैव सुखोचिता ५ इह वत्स्यति कल्याणी सत्कृता मम वेश्मनि। इति पार्था विजानीध्वमगदं वोस्तु सर्वशः ६ पाण्डवा ऊचुः॥ तथेत्युक्त्वाब्रुवन्सर्वे यथा नो वदसेनघ। त्वं पितृव्यः पितृसमो वयं च त्वत्परायणाः ७ यथाज्ञापयसे विद्वंस्त्वं हि नः परमो गुरुः। यच्चान्यदपि कर्तव्यं तद्विधत्स्व महामते ८ विदुर उवाच॥ युधिष्ठिर विजानीहि ममेदं भरतर्षभ। नाधर्मेण जितः कश्चिद्व्यथते वै पराजये ९ त्वं वै धर्मं विजानीषे युद्धे जेता धनं-

---

अनुद्यूतपर्वांपैकीं पांडवांच्या प्रतिज्ञेविषयीं सत्तेहत्तरावा अध्याय समाप्त झाला॥ ७७॥

युधिष्ठिर भाषण करितोः—सर्व भरत, वृद्ध पितामह भीष्म, राजा सोमदत्त, महाराज बाल्हीक १, द्रोणाचार्य, कृपाचार्य, इतर भूपति, अश्वत्थामा, विदुर, धृतराष्ट्र, सर्व धृतराष्ट्रपुत्र २, विशेषतः युयुत्सु, संजय व त्याचप्रमाणें इतरही सभासद ह्या सर्वांचा निरोप घेऊन मी वनामध्यें जातों. परत आल्यावर पुनरपि तुमची सर्वांची भेट होईलच ३. वैशंपायन सांगतातः—ह्याप्रमाणें युधिष्ठिरानें निरोप घेतला असतां लज्जेनें खालीं मान घातलेल्या भीष्मप्रभृतींनीं कांहीं एक उत्तर न देतां त्या विचारी धर्मराजाचें मनामध्येंच कल्याण चिंतिलें ४. विदुर ह्मणतोः—सुकुमार व सर्वदां सुखांत दिवस काढिलेली अशी ही साध्वी राजकन्या कुंती अरण्यांत जाणें नीट नाहीं ५. हे कुंतीपुत्रहो, ही विचारी मानमान्यतापूर्वक येथेंच माझ्या घरीं पडून राहील असें तुह्मी समजा. तुमचें सर्व प्रकारें आरोग्य असो ६. ह्यानंतर "ठीक आहे" असें ह्मणून ते सर्वही पांडव त्याला ह्मणाले "हे निष्पाप, आपल्या सांगण्याप्रमाणें कुंतीला खुशाल येथें राहूं द्या. आपण आमचे पितृव्य असून आह्मांला पित्याप्रमाणें आहांत व आह्मांला मुख्यतः आपलाच आधार आहे ७. ह्यास्तव, हे विवेकसंपन्न, आपल्या आज्ञेप्रमाणें आह्मी वागण्यास सिद्ध आहोंत. मुख्यत्वेंकरून आपणच आह्मांला वडील आहांत. तस्मात्, हे महामते, आणखीही जें कांहीं कर्तव्य असेल त्याची आज्ञा करा ८. विदुर ह्मणतोः—हे भरतवंशजश्रेष्ठा युधिष्ठिरा, माझें हें ह्मणणें तूं लक्ष्यांत ठेव. अरे, अधर्मानें जिंकिला गेलेला पुरुष पराजयाविषयीं दुःख मानीत

जयः । हन्तारीणां भीमसेनो नकुलस्त्वर्थसंग्रही १० संयन्ता सहदेवस्तु धौम्यो ब्रह्मविदुत्तमः । धर्मार्थकुशला चैव द्रौपदी धर्मचारिणी ११ अन्योन्यस्य प्रियाः सर्वे तथैव प्रियदर्शनाः । परैरभेद्याः संतुष्टाः को वो न स्पृहयेदिह १२ एष वै सर्वकल्याणः समाधिस्तव भारत । नैनं शत्रुर्विषहते शक्रेणापि समोप्युत १३ हिमवत्यनुशिष्टोसि मेरुसावर्णिना पुरा । द्वैपायनेन कृष्णेन नगरे वारणावते १४ भृगुतुङ्गे च रामेण दृषद्वत्यां च शंभुना । अश्रौषीरसितस्यापि महर्षेरञ्जनं प्रति १५ कल्माषीतीरसंस्थस्य गतस्त्वं शिष्यतां भृगोः । द्रष्टा सदा नारदस्ते धौम्यस्तेयं पुरोहितः १६ मा हासीः साम्पराये त्वं बुद्धिं तामृषिपूजिताम् । पुरूरवसमैलं त्वं बुद्ध्या जयसि पाण्डव १७ शक्त्या जयसि राज्ञोन्यानृषीन्धर्मोपसेवया । ऐन्द्रे जये धृतमना याम्ये कोपविधारणे १८ तथा विसर्गे कौबेरे वारुणे चैव संयमे ।

नाहींए.तूं धर्मवेत्ता असून अर्जुन युद्धामध्यें विजयी होणारा आहे व भीमसेन शत्रूंचा वध करणारा असून नकुल अर्थसंग्रह करणारा आहे १०. त्याचप्रमाणें सहदेव (उन्मार्गानें वागणाऱ्याला) अवरून धरणारा असून धौम्य ब्रह्मवेत्यांमध्यें श्रेष्ठ आहे आणि धर्मानें वागणारी द्रौपदी तर धर्म व अर्थ ह्या दोहोंमध्यें कुशल आहे ११. शिवाय तुह्मी सर्व परस्परांना प्रिय असल्यामुळें परस्परांच्या दर्शनानें आनंदित होणारे आहां आणि एकमेकांमध्यें शत्रूंना भेदभाव उत्पन्न करितां येणार नाहीं असे तुह्मी असून संतोषानें राहणारे आहां. तेव्हां, ह्या भूलोकामध्यें कोणाचें बरें मन तुमच्याकडे ओढणार नाहीं ?१२. हे भरतकुलोत्पन्ना युधिष्ठिरा, (मनाची शांति ढळूं न देणें) हा तुझा नियम सर्व प्रकारच्या कल्याणाला कारणीभूत होणारा आहे व ह्यामुळें इंद्रासारखा जरी शत्रु असला तरी त्याचें कांहीं चालणार नाहीं १३. पूर्वी हिमालय पर्वतावर मेरुसावर्णीनें तुला उपदेश केला असून कृष्णद्वैपायनांनीं वारणावत नगरामध्यें तुला कांहीं सांगून ठेविलें आहे १४. त्याचप्रमाणें भृगुतुंग पर्वतावर परशुरामांचा तुला उपदेश झाला असून दृषद्वती नदीचे तिरीं शंकरानीं तुला कांहीं कथन केलेलें आहे आणि अंजनपर्वतावर असित महर्षीपासूनही तूं कांहीं श्रवण केलें आहेस १५. त्याचप्रमाणें कल्माषी नदीचे तीरीं असलेल्या भृगु महर्षीचें तूं शिष्यत्व स्वीकारिलेलें असून नारदमुनि सर्वदां तुला भेट देत असतात आणि हे धौम्यमुनि तर प्रत्यक्ष तुझे पुरोहितच आहेत १६. तस्मात्, ऋषींना मान्य असलेल्या पारलौकिक बुद्धीचा तूं त्याग करूं नकोस. हे पांडुपुत्रा, पारलौकिक बुद्धीमध्यें इलापुत्र पुरूरव्याला तूं मागें सारणारा आहेस १७; सामर्थ्यानें इतर राजांना तूं जिंकणारा आहेस; धर्माचरणामध्यें तर ऋषींनाही तुझी बरोबरी होणें दुर्घट आहे.

आत्मप्रदानं सौम्यत्वमद्भ्यश्चैवोपजीवनम् १९ भूमेः क्षमां च तेजश्च समग्रं सूर्यमण्डलात् । वायोर्बलं प्रामुहि त्वं भूतेभ्यश्चात्मसंपदम् २० अगदं वोस्तु भद्रं वो द्रष्टास्मि पुनरागतान् । आपद्धर्मार्थकृच्छ्रेषु सर्वकार्येषु वा पुनः २१ यथावत्प्रतिपद्येथाः काले काले युधिष्ठिर । आपृष्टोसीह कौन्तेय स्वस्ति प्रामुहि भारत २२ कृतार्थं स्वस्तिमन्तं त्वां द्रक्ष्यामः पुनरागतम् । न हि वो वृजिनं किंचिद्वेद कश्चित्पुरा कृतम् २३ वैशम्पायन उवाच ॥ एवमुक्तस्तथेत्युक्त्वा पाण्डवः सत्यविक्रमः । भीष्मद्रोणौ नमस्कृत्य प्रातिष्ठत युधिष्ठिरः २४ [२५६३] इति श्रीमहाभारते शतसाहस्र्यां संहितायां० सभापर्वण्यनुद्यूतपर्वणि युधिष्ठिरवनप्रस्थानेष्टसप्ततितमोध्यायः ॥ ७८ ॥

वैशम्पायन उवाच ॥ तस्मिन्संप्रस्थिते कृष्णा पृथां प्राप्य यशस्विनीम् । आपृच्छद्भृशदुःखार्ता याश्चान्यास्तत्र योषितः १ यथार्हं वन्दना-

---

इंद्रापासून जय, यमापासून क्रोधसंयमन १८, कुबेरापासून दातृत्व व वरुणापासून वशीकरण हे गुण प्राप्त करून घेण्याकडे तुझ्या मनाचा कल असूं दे; सर्वांच्या हिताकरितां शरीराची हालचाल, सौम्यपणा व जीवनसाधनत्व हे गुण तूं जलापासून प्राप्त करून घे १९ आणि त्याचप्रमाणें भूमीपासून सहिष्णुता, सूर्यमंडलापासून सर्वप्रकारचें तेज, वायूपासून बल आणि आकाशापासून मनाची उदारता तूं प्राप्त करून घे २०. असो. आतां तुह्मांला सर्वदा आरोग्य प्राप्त होवो व तुमचें कल्याण असो. पुनरपि तुह्मी परत आला ह्मणजे मी तुह्मांला भेटेन. हे युधिष्ठिरा, विपत्तीमुळें प्राप्त होणारीं जीं धर्म व अर्थ एतद्विषयक संकटें तीं प्राप्त झालीं असतां अथवा कोणतेंही कार्य कर्तव्य असतां त्या त्या कालाला अनुसरून तूं वागत जा. हे कुंतीपुत्रा, आतां जा. हे भरतकुलोत्पन्ना, तुझें कल्याण असो २१,२२. आतां आह्मी तुला कृतार्थ व कुशल असा पुनरपि आलेला अवलोकन करूं. अरे, पूर्वी तुह्मीं कोणाचें वाईट केल्याविषयीं कोणालाही स्मरत नाहीं (तस्मात् , परत आल्यावर प्रजाजनांचें अंतःकरण तुमच्याकडेच ओढणार ह्याबद्दल मला मुळींच शंका नाहीं)२३. वैशंपायन सांगतातः—ह्याप्रमाणें विदुरानें सांगितलें असतां पांडुपुत्र युधिष्ठिरानें त्याला " ठीक आहे " ह्मणून सांगितलें आणि नंतर तो अमोघपराक्रमी युधिष्ठिर भीष्म व द्रोणाचार्य ह्यांना नमस्कार करून अरण्यांत जाण्याकरितां निघाला २४. ह्याप्रमाणें महामुनिव्यासप्रणीत० श्रीमहाभारतांतर्गत सभापर्वांतील अनुद्यूतपर्वांपैकीं युधिष्ठिर वनांत निघाल्याविषयीं अठ्ठ्याहत्तरावा अध्याय समाप्त झाला॥७८॥

वैशंपायन सांगतातः— तो युधिष्ठिर वनांत निघाला असतां यशस्विनी कुंतीकडे द्रौपदी गेली आणि (अत्यंत दुःखाकुल होऊन तिचा व इतरही तेथें असलेल्या

श्लेषान्कृत्वा गन्तुमियेष सा । ततो निनादः सुमहान्पाण्डवान्तःपुरेभवत् २ कुन्ती च भृशसंतप्ता द्रौपदीं प्रेक्ष्य गच्छतीम् । शोकविह्वलया वाचा कृच्छ्राद्वचनमब्रवीत् ३ वत्से शोको न ते कार्यः प्राप्येदं व्यसनं महत् । स्त्रीधर्माणामभिज्ञासि शीलाचारवती तथा ४ न त्वां संदेष्टुमर्हामि भर्तृन्प्रति शुचिस्मिते । साध्वी गुणसमापन्ना भूषितं ते कुलद्वयम् ५ सभाग्याः कुरवश्चेमे ये न दग्धास्त्वयानघे । अरिष्टं व्रज पन्थानं मदनुध्यानबृंहिता ६ भाविन्यर्थे हि सत्स्त्रीणां वैकृतं नोपजायते । गुरुधर्माभिगुप्ता च श्रेयः क्षिप्रमवाप्स्यसि ७ सहदेवश्च मे पुत्रः सदावेक्ष्यो वने वसन् । यथेदं व्यसनं प्राप्य नायं सीदेन्महामतिः ८ तथेत्युक्त्वा तु सा देवी स्रवन्नेत्रजलाविला । शोणिताक्तैकवसना मुक्तकेशी विनिर्ययौ ९ तां क्रोशन्तीं पृथां दुःखादनुव्रज गच्छतीम् । अथापश्यत्सुतान्सर्वान्हृताभरणवाससः १० रुरुचर्मावृ-

---

स्त्रियांचा निरोप घेऊं लागली १. नंतर योग्यतेप्रमाणें कोणाला वदन करून व कांहींना कवटाळून ती जाऊं लागलीं असतां पांडवांच्या अंतःपुरामध्यें फारच मोठी रडारड सुरूं झाली २. द्रौपदी निघालेली अवलोकन करून कुंतीलातर पराकाष्ठेचें दुःख झालें व शोकामुळें बोबडी वळून गेली असतां मोठ्या कष्टानें (तोंडांतून शब्द काढून) ती द्रौपदीला ह्मणाली ३ " मुलि, हें महासंकट प्राप्त झालें आहे ह्मणून तूं उगींच शोक करूं नको. तूं स्त्रीधर्म जाणणारी असून सुशीलपणा व सदाचरण ह्यांनीं संपन्न असल्यामुळें ४, हे सुहास्यवदने, भर्त्यां(शीं स्वतःची वागणूक ठेवण्या) संबंधानें तुला उपदेश करण्याचें मला कारण उरलें नाहीं. तूं साध्वी व गुणसंपन्न असल्यामुळें आपलीं दोन्हीं कुलें भूषित केलीं आहेस ५. हे निष्कलंक द्रौपदि, तुझ्या (कोपा) मुळें हे कौरव दग्ध झाले नाहींत हें त्यांचें भाग्यच समजलें पाहिजे. आतां माझ्या अभीष्टचिंतनाचें तुला पाठबळ असल्यामुळें मार्गांतून तूं निर्विघ्नपणें जा ६. अवश्य होणाऱ्या गोष्टीबद्दल साध्वी स्त्रिया दुःख करीत बसत नाहींत आणि त्यांतूनही महान् धर्मानें तुझें संरक्षण केलेलें आहे. कारितां, लवकरच तूं ह्या संकटांतून मुक्त होशील ७. वनामध्यें वास्तव्य करीत असतांना माझ्या सहदेव पुत्राकडे तूं सर्वदां लक्ष्य ठेवीत जा. ह्मणजे ह्या महाबुद्धिमान् पुत्राचा, हें संकट प्राप्त झाल्यामुळें, धीर खचणार नाहीं " ८. ह्याप्रमाणें कुंतीनें सांगितलें असतां " होय " ह्मणून ती राजपत्नी द्रौपदी चालती झाली. त्यावेळीं नेत्रांतून एकसारख्या अश्रुधारा चालूं असल्यामुळें तिचे सर्वांग भिजून गेलेलें होतें; रजस्वला असल्यामुळें केंस मोकळे होते व वस्त्रही एकच असून तेंही रक्ताचे डागपडलेलें असें होतें ९. असो. ह्याप्रमाणें द्रौपदी रडत रडत जाऊं लागली असतां कुंतीही जों

ततनून्हिया किंचिदवाङ्मुखान् । परैः परीतान्संहृष्टैः सुहृद्भिश्चानुशोचितान् ११ तदवस्थान्सुतान्सर्वानुपसृत्यातिवत्सला । स्वजमानावदच्छोकात्तद्विलपती बहु १२ कुन्त्युवाच ॥ कथं सद्धर्मचारित्रान्वृत्तस्थितिविभूषितान् । अक्षुद्रान्दृढभक्तांश्च दैवतेज्यापरान्सदा १३ व्यसनं वः समभ्यागात्कोयं विधिविपर्ययः । कस्यापध्यानजं चेदमागः पश्यामि वो धिया १४ स्यात्तु मद्भाग्यदोषोयं याहं युष्मानजीजनम् । दुःखायासभुजोत्यर्थं युक्तानप्युत्तमैर्गुणैः १५ कथं वत्स्यथ दुर्गेषु वने ऋद्धिविनाकृताः । वीर्यसत्त्वबलोत्साहतेजोभिरकृशाः कृशाः १६ यद्येतदेवमज्ञास्यं वने वासो हि वो ध्रुवम् । शतशृङ्गान्मृते पाण्डौ नागमिष्यं गजाह्वयम् १७ धन्यं वः पितरं मन्ये तपोमेधान्वितं तथा । यः पुत्राधिमसंप्राप्य स्वर्गेच्छामकरोत्प्रियाम् १८ धन्यां चातीन्द्रियज्ञानामिमां प्राप्तां

दुःखानें तिच्या मागोमाग गेली तों—ज्यांचीं वस्त्रें व भूषणें हिरावून घेतलेलीं आहेत, ज्यांचीं शरीरें मृगाजिनांनीं आच्छादिलेलीं आहेत, लाजेमुळें ज्यांचीं तोंडें किंचित् खालीं झालेलीं आहेत, ज्यांच्या सभोंवतीं आनंदित झालेल्या शत्रूंनीं गराडा घातलेला आहे आणि ज्यांच्याकरितां सुहृद शोक करीत आहेत असे—सर्व पुत्र तिच्या दृष्टीं पडले १०,११. तेव्हां त्या अवस्थेमध्यें असलेल्या सर्व पुत्रांच्या समीप जाऊन ती अतिदयालु कुंती त्यांना कवटाळूं लागली आणि नानाप्रकारचे विलाप करीत करीत त्यांना ह्मणाली १२. कुंती विलाप करितेः—उदार, दृढ भक्त, देवपूजनाविषयीं सर्वदां तत्पर, निश्चल, सद्वर्तनानें विभूषित आणि सद्धर्म व उत्कृष्ट चालरीत ह्यांनीं संपन्न असलेल्या तुह्मांवर हे संकट कसें रें ओढवलें! अरे! कोणरे हा दैवाचा फेरा तरी! कोणीरे वाईट चिंतिल्यामुळें तुमचें हें पातक उभें राहिलें ह्मणून मी आतां आपल्या मनाची समजूत करूं! १३,१४. तुह्मांला जन्म देणाऱ्या माझ्याच नशिबाचा तर हा दोष नसेल नां रे! ह्मणूनच उत्कृष्ट गुणांनीं संपन्न असलेल्या तुह्मांला अतिशय दुःख व क्लेश भोगावे लागत आहेत! १५. वैभवहीन करून टाकिलेले तुह्मी वीर्य, धैर्य, बल, उत्साह व तेज ह्यांनीं जरी कृश नसला तरी शरीरानें कृश असतांना वनामध्यें बिकट प्रदेशांत कसेरे रहाल! १६. तुमचें वास्तव्य वनामध्येंच निःसंशय होणार हें जर मला पूर्वी समजलें असतें तर पांडु मरण पावल्यानंतर शतशृंगपर्वतापासून मी हास्तिनपुरांत आलेंच नसतें रे! १७. पुत्रविषयक दुःख प्राप्त झाल्यावांचून ज्याला स्वर्गास जाण्याची उत्कृष्ट इच्छा झाली तो तपस्वी व बुद्धिमान् पिता धन्य आहे असें मला वाटतें १८. त्याचप्रमाणें जिनें रति, मति व गति ह्यांसंबंधानें मला (फसवून पुत्रांना पुढें अशाप्रकारची विपत्ति भोगावी लागणार

परां गतिम् । मन्ये तु माद्रीं धर्मज्ञां कल्याणीं सर्वथैव तु १९ रत्या मत्या च गत्या च ययाहमभिसन्धिता । जीवितप्रियतां मह्यं धिङ्मां संक्लेशभागिनीम् २० पुत्रका न विहास्ये वः कृच्छ्रलब्धान्प्रियान्सतः । साहं यास्यामि हि वनं हा कृष्णे किं जहासि माम् २१ अन्तवत्यसुधर्मेस्मिन्धात्रा किं नु प्रमादतः । ममान्तो नैव विहितस्तेनायुर्न जहाति माम् २२ हा कृष्ण द्वारकावासिन्क्वासि संकर्षणानुज । कस्मान्न त्रायसे दुःखान्मां चेमांश्च नरोत्तमान् २३ अनादिनिधनं ये त्वामनुध्यायन्ति वै नराः । तांस्त्वं पासीत्ययं वादः स गतो व्यर्थतां कथम् २४ इमे सद्धर्ममाहात्म्ययशोवीर्यानुवर्तिनः । नार्हन्ति व्यसनं भोक्तुं नन्वेषां क्रियतां दया २५ सेयं नीत्यर्थविज्ञेषु भीष्मद्रोणकृपादिषु । स्थितेषु कुलनाथेषु कथमापदुपागता २६ हा पाण्डो हा महाराज क्वासि किं समुपेक्षसे । पुत्रान्विवास्यतः साधूनरिभिर्द्यूतनिर्जितान् २७ सहदेव निवर्तस्व ननु त्वमसि मे प्रियः । शरी-

---

असें समजून) सर्वोत्कृष्ट सतीच्या मार्गाचें अवलंबन केलें त्या भाग्यवती व अतींद्रयज्ञानी धर्मवेत्त्या माद्रीची तर सर्वस्वींच धन्य आहे असें मला वाटतें. धिक्कार असो ह्या क्लेश भोगीत असलेल्या मला आणि ह्या माझ्या जीवितेच्छेला ! १९, २०. मुलांनों, मोठ्या सायासानें तुम्ही मला प्राप्त झाला असून सज्जन असल्यामुळें मला प्रिय आहांतरे ! करितां, मी नाहींरे तुम्हांला सोडून राहणार. ही मी (तुमच्याच बरोबर) वनांत येतें! हे कृष्णे द्रौपदि, तूं तरी कां गे मला सोडून जात आहेस ! २१. हें प्राणधारण नश्वर असतांनाही विधात्याच्या नजरचुकीनें माझा अंतकाल ठरविण्याचा राहून गेला ह्मणूनच रे माझें आयुष्य संपत नाहीं ! २२. हे कृष्णा ! हे द्वारकावासिन् कृष्णा ! कोठें आहेस रे ! हे बलरामाच्या कनिष्ठ भ्रात्या ! अरे ! मला व ह्या पुरुषश्रेष्ठांना कां रे तूं दुःखांतून तारीत नाहींस ! २३. अनादि आणि अनंत असलेल्या तुझें जें सर्वदां स्मरण करीत असतात त्यांचें तूं परिपालन करितोस हें साधु जनांचें ह्मणणें (ह्या प्रसंगीं) कसेंरे व्यर्थ झालें ! २४. अरे ! सद्धर्म, मोठेपणा, कीर्ति व वीर्य ह्यांनीं संपन्न असलेले हे माझे बालक संकट भोगण्यास योग्य नाहींत. तेव्हां खरोखर ह्यांची तुला दया येऊं दे रे ! २५. नीति व अर्थशास्त्र ह्या दोहोंमध्यें प्रवीण असलेले हे भीष्म, द्रोणाचार्य, कृपाचार्य वगैरे कुरुकुलनायक विद्यमान असतांनाच माझ्या बालकांवर हें संकट कोठून रे ओढवलें! २६. हे पांडो ! हे महाराजा ! कोठें रे आहेस ! अरे ! शत्रूंनीं द्यूतामध्यें जिंकून तुझ्या गरीब पुत्रांना वनांत घालवून दिलें असतांना अजून रे कां तूं त्यांच्याविषयीं डोळे झांक करीत आहेस ! २७. हे सहदेवा ! बाळा तूं तरी परत फीर रे !

रादपि माद्रेय मां मा त्याक्षीः कुपुत्रवत् २८ व्रजन्तु भ्रातरस्तेमी यदि सत्याभिसन्धिनः । मत्परित्राणजं धर्ममिहैव त्वमवाप्नुहि २९ वैशम्पायन उवाच ॥ एवं विलपतीं कुन्तीमभिवाद्य प्रणम्य च । पाण्डवा विगतानन्दा वनायैव प्रवव्रजुः ३० विदुरश्चापि तामार्तां कुन्तीमाश्वास्य हेतुभिः । प्रावेशयद्गृहं क्षत्ता स्वयमार्ततरः शनैः ३१ धार्तराष्ट्रस्त्रियस्ताश्च निखिलेनोपलभ्य ततू । गमनं परिकर्षं च कृष्णाया द्यूतमण्डले ३२ रुरुदुः सुस्वनं सर्वा विनिदन्त्यः कुरून्भृशम् । दध्युश्च सुचिरं कालं करासक्तमुखाम्बुजाः ३३ राजा च धृतराष्ट्रस्तु पुत्राणामनयं तदा । ध्यायन्नुद्विग्नहृदयो न शान्तिमधिजग्मिवान् ३४ स चिन्तयन्ननेकाग्रः शोकव्याकुलचेतनः । क्षत्तुः संप्रेषयामास शीघ्रमागम्यतामिति ३५ ततो जगाम विदुरो धृतराष्ट्रनिवेशनम् । तं पर्यपृच्छत्संविग्नो धृतराष्ट्रो जनाधिपः ३६[२५९९]इति श्रीमहाभारते० सभापर्वण्यनुद्यूतपर्वणि द्रौपदीकुंतीसंवाद एकोनाशीतितमोध्यायः ॥७९॥

अरे ! तूं मला देहापेक्षां देखील रे प्रिय आहेस ! हे माद्रीपुत्रा, (अरे सापत्नमाता ह्मणून) नको रें मला एकाद्या कुपुत्राप्रमाणें टाकून जाऊस ! २८. अरे ! हे तुझे बंधु मोठे सत्यवचनी असले तर त्यांनाच जाऊं दे रे ! तूं येथेंच राहून खरोखर माझ्या रक्षणाचें पुण्य जोडशील ! २९. वैशंपायन सांगतातः—ह्याप्रमाणें कुंती विलाप करीत असतांना आनंदशून्य झालेले पांडव सांत्वनपूर्वक तिला प्रणाम करून वनाकडेच चालते झाले ३०. तेव्हां स्वतःअतिशयच दुःखित झालेल्या क्षत्त्या विदुरानें दैवाचें वगैरे प्राबल्य प्रतिपादन करणाऱ्या चार गोष्टी सांगून कुंतीचें सांत्वन केलें आणि हळूं हळूं तो तिला आपल्या घरीं घेऊन गेला ३१. द्यूतमंडलामध्यें द्रौपदीचें आकर्षण व तिचें गमन वगैरे तो घडलेला सर्व प्रकार संपूर्णपणें अवलोकन करून धृतराष्ट्रपुत्र दुर्योधनप्रभृतींच्या सर्वही स्त्रिया कौरवांना पराकाष्ठेचे दोष देत देत मोठमोठ्यानें रडूं लागल्या आणि तोंडांवर हात देऊन पुष्कळ वेळ पर्यंत चिंताक्रांत झाल्या ३२,३३. पुत्रांच्या दुर्वर्तनाचा धृतराष्ट्र विचार करूं लागला असतां " पुढें ह्याचा परिणाम आपल्याला वाईट होणार " ह्मणून त्याचें अंतःकरण उद्विग्न होऊन त्याला एकसारखी तळमळ लागली ३४ आणि (भावी दुःखाच्या) शोकानें अंतःकरण व्याकुल होऊन तळमळ लागलेल्या त्या धृतराष्ट्र राजानें चिंताक्रांत असतांना " सत्वर ये " ह्मणून विदुराला निरोप पाठविला ३५. तेव्हां विदुर धृतराष्ट्राच्या घरीं गेला असतां उद्विग्न झालेल्या धृतराष्ट्र राजानें त्याला प्रश्न केला ३६. ह्याप्रमाणें० श्रीमहाभारतांतर्गत सभापर्वांतील अनुद्यूतपर्वांपैकीं द्रौपदी व कुंती ह्यांच्या संवादाविषयीं एकुणऐंशीवा अध्याय समाप्त झाला ॥ ७९ ॥

वैशम्पायन उवाच ॥ तमागतमथो राजा विदुरं दीर्घदर्शिनम् । साशङ्क इव पप्रच्छ धृतराष्ट्रोम्बिकासुतः १ धृतराष्ट्र उवाच ॥ कथं गच्छति कौन्तेयो धर्मपुत्रो युधिष्ठिरः। भीमसेनः सव्यसाची माद्रीपुत्रौ च पाण्डवौ २ धौम्यश्चैव कथं क्षत्तर्द्रौपदी च यशस्विनी । श्रोतुमिच्छाम्यहं सर्वं तेषां शंस विचेष्टितम् ३ विदुर उवाच ॥ वस्त्रेण संवृत्य मुखं कुन्तीपुत्रो युधिष्ठिरः। बाहू विशालौ संपश्यन्भीमो गच्छति पाण्डवः ४ सिकता वपन्सव्यसाची राजानमनुगच्छति । माद्रीपुत्रः सहदेवो मुखमालिप्य गच्छति ५ पांसूपलिप्तसर्वाङ्गो नकुलश्चित्तविह्वलः । दर्शनीयतमो लोके राजानमनुगच्छति ६ कृष्णा तु केशैः प्रच्छाद्य मुखमायतलोचना । दर्शनीया प्ररुदती राजानमनुगच्छति ७ धौम्यो रौद्राणि सामानि याम्यानि च विशांपते । गायन्गच्छति मार्गेषु कुशानादाय पाणिना ८ धृतराष्ट्र उवाच ॥ विविधानीह रूपाणि कृत्वा गच्छन्ति पाण्डवाः। तन्ममाचक्ष्व विदुर कस्मादेवं व्रजन्ति ते ९ विदुर उवाच ॥ निकृतस्यापि ते पुत्रैर्हृते राज्ये धनेषु च । न धर्माच्चलते

वैशंपायन सांगतातः—(निरोपाप्रमाणें) आलेल्या दूरदृष्टि विदुराला अंबिकापुत्र धृतराष्ट्रानें (मन खाऊं लागल्यामुळें) जरा भीतभीतच प्रश्न केला १. धृतराष्ट्र प्रश्न करितोः—हे विदुरा, कुंतीनंदन धर्मपुत्र युधिष्ठिर, भीमसेन, सव्यसाची अर्जुन, माद्रीपुत्र पांडुनंदन नकुलसहदेव, धौम्य आणि यशस्विनी द्रौपदी हीं कशीं कशीं वनांत गेलीं तें सर्व श्रवण करण्याची माझी इच्छा आहे. करितां, मनोरथसूचक असा त्यांचा जाण्याचा प्रकार कैसा काय होता तो तूं मला सांग २,३. विदुर ह्मणतोः—कुंतीपुत्र युधिष्ठिर तोंडावर बुरखा घेऊन जात आहे; आपले विशाल बाहु अवलोकन करीत करीत पांडुपुत्र भीमसेन चालला आहे ४; सव्यसाची अर्जुन वाळू टाकीत टाकीत धर्मराजाच्या मागून गमन करीत आहे; माद्रीपुत्र सहदेव तोंडाला कांहीं फासून मार्गाचें आक्रमण करीत आहे ५; जगतामध्यें अत्यंत सुंदर असलेला आणि मनामध्यें विव्हल झालेला नकुल धुळीनें सर्वांग भरवून धर्मराजाच्या मागोमाग मार्गाचें अवलंबन करीत आहे ६; विशाल नयनांनीं युक्त असलेली सौंदर्यसंपन्न द्रौपदी केंसांनीं मुख झांकून घेऊन धर्मराजाच्या मागोमाग रोदन करीत करीत मार्ग आक्रमीत आहे ७ आणि, हे प्रजाधिपते धृतराष्ट्र, हातामध्यें कुश घेऊन धौम्य मुनि यमदेवतेला उद्देशून असलेलीं व इतरही घोर सामें ह्मणत ह्मणत प्रयाण करीत आहेत८ धृतराष्ट्र प्रश्न करितोः—हे विदुरा, नानाप्रकारचीं चिन्हें करून पांडव जात आहेत. तस्मात्, ह्याप्रमाणें ते कां जात आहेत हें तूं मला कथन कर९. विदुर ह्मणतोः—तुझ्या पुत्रांनीं धर्मराजाला कपटानें जिंकून जरी राज्याचा व

बुद्धिर्धर्मराजस्य धीमतः १० योसौ राजा घृणी नित्यं धार्तराष्ट्रेषु भारत । निकृत्या भ्रंशितः क्रोधान्नोन्मीलयति लोचने ११ नाहं जनं निर्दहेयं दृष्ट्वा घोरेण चक्षुषा । स पिधाय मुखं राजा तस्माद्गच्छति पाण्डवः ॥ यथा च भीमो व्रजति तन्मे निगदतः शृणु १२ बाह्वोर्बले नास्ति समो ममेति भरतर्षभ । बाहू विशालौ कृत्वासौ तेन भीमोपि गच्छति १३ बाहू विदर्शयन्राजन्बाहुद्रविणदर्पितः । चिकीर्षन्कर्म शत्रुभ्यो बाहुद्रव्यानुरूपतः १४ प्रदिशञ्छरसंपातान्कुन्तीपुत्रोर्जुनस्तदा । सिकता वपन्सव्यसाची राजानमनुगच्छति १५ असक्ताः सिकतास्तस्य यथा संप्रति भारत । असक्तं शरवर्षाणि तथा मोक्ष्यति शत्रुषु १६ न मे कश्चिद्विजानीयान्मुखमद्येति भारत । मुखमालिप्य तेनासौ सहदेवोपि गच्छति १७ नाहं मनांस्यादेयं मार्गे स्त्रीणामिति प्रभो । पांसूपलिप्तसर्वाङ्गो नकुलस्तेन गच्छति १८ एकवस्त्रा प्ररुदती मुक्तकेशी रजस्वला । शोणितेनाक्तवसना द्रौपदी वाक्य-

---

सर्वप्रकारच्या संपत्तींचा अपहार केला तरी त्या विचारी धर्मराजाची बुद्धि धर्मापासून चळली नाहीं १०. हे भरतकुलोत्पन्ना धृतराष्ट्रा, तुझ्या पुत्रांचे ठिकाणीं सर्वदां दया करणारा जो धर्मराज त्याला कपटाचें अवलंबन करून तुझ्याच पुत्रांनीं सर्वस्वीं नागविलें ह्मणून क्रोधामुळें तो डोळे उघडीत नाहीं ११. सारांश. क्रोधयुक्त दृष्टीनें लोक दग्ध होण्यास आपण कारण न व्हावें एतदर्थ मुख आच्छादित करून पांडुपुत्र धर्मराजा जात आहे १२. आतां, भीम वर सांगितल्याप्रमाणें कां चालला आहे ह्याचें कारण मी सांगतों तें श्रवण कर. हे भरतवंशजश्रेष्ठा धृतराष्ट्रराजा, " बाहुबलामध्यें माझी बरोबरी करणारा कोणी नाहीं" असें समजून बाहुबलरूपसंपत्तीचा अभिमान बाळगणारा भीमसेन आपल्या बाहुबलरूप संपत्तीला योग्य असें कांहीं शौर्यकर्म शत्रूंशीं करण्याच्या इच्छेनें आपले विशाल दंड बाहेर काढून त्यांच्याकडे पहात पहात चालला आहे १३,१४. सव्यसाची कुंतीपुत्र अर्जुन, बाणवृष्टि दर्शविण्याकरितां वाळूं टाकीत धर्मराजाच्या मागे माग गमन करीत आहे १५. सारांश, हे भरतकुलोत्पन्ना धृतराष्ट्रा, त्याचे वाळूने खडे ज्याप्रमाणें सांप्रत अप्रतिहत पडत आहेत त्याचप्रमाणें शत्रूंवर तो अप्रतिहत बाणाचा वर्षाव करणार आहे १६. हे भरतकुलोत्पन्ना धृतराष्ट्रा, माझें मुख (अशा निकृष्ट अवस्थेंत) आज कोणाच्या दृष्टीं पडूंनये अशा हेतूनें सहदेवही तोंडाला कांहीं फासून जात आहे १७. हे प्रभो धृतराष्ट्रा, मार्गामध्यें स्त्रियांचें मन आपल्यावर जाऊं नयें एतदर्थ नकुल आपल्या सर्वांगाला धूळ लावून मार्गाचें आक्रमण करीत आहे १८. रजस्वला असल्यामुळें जिच्या शरीरावर एकच वस्त्र असून तेंही रक्तानें भरलेलें असें आहे अशी केंस मोकळे सोडून रडत रडत

मब्रवीत् १९ यत्कृतेहमिदं प्राप्ता तेषां वर्षे चतुर्दशे। हतपत्यो हतसुता हतबन्धुजनप्रियाः २० बहुशोणितदिग्धाङ्ग्यो मुक्तकेश्यो रजस्वलाः। एवं कृतोदका भार्याः प्रवेक्ष्यन्ति गजाह्वयम् २१ कृत्वा तु नैर्ऋतान्दर्भान्धीरो धौम्यः पुरोहितः। सामानि गायन्याम्यानि पुरतो याति भारत २२ हतेषु भरतेष्वाजौ कुरूणां गुरवस्तदा। एवं सामानि गास्यन्तीत्युक्त्वा धौम्योपि गच्छति २३हा हा गच्छति नो नाथाः समवेक्षध्वमीदृशम्। अहो धिक्कुरुवृद्धानां बालानामिव चेष्टितम् २४ राष्ट्रेभ्यः पाण्डुदायादाल्लोभान्निर्वासयन्ति ये। अनाथाः स्म वयं सर्वे वियुक्ताः पाण्डुनन्दनैः २५ दुर्विनीतेषु लुब्धेषु का प्रीतिः कौरवेषु नः। इति पौराः सुदुःखार्ताः क्रोशन्ति स्म पुनः पुनः २६ एवमाकारलिङ्गैस्ते व्यवसायं मनोगतम्। कथयन्तश्च कौन्तेया वनं जग्मुर्मनस्विनः २७ एवं तेषु नराग्र्येषु निर्यत्सु गजसाह्वयात्। अनभ्रे विद्युतश्चासन्भूमिश्च समकम्पत २८ राहुरग्रसदादित्यमपर्वाणि विशांपते। उल्का

जाणारी जी द्रौपदी तिनें तर असें बोलूनच दाखवि(ल्यासारिखें के)लें १९ कीं " ज्यांच्यामुळें मला हें दुःख प्राप्त झालें आहे त्यांच्या भार्या आजपासून चवदाव्या वर्षीं रजस्वला असतानांच त्यांचे पति, पुत्र, बंधु व सुहृद ह्या सर्वांचा वध होईल व अंगाला पुष्कळच रक्त लागलेलें आहे अशा त्या स्त्रिया आपआपल्या नवऱ्याच्या वगैरे नांवानें आंगें धुऊन असेच केंस मोकळे असतांना हास्तिनपुरामध्यें प्रवेश करितील " २०,२१. हे भरतकुलोत्पन्ना धृतराष्ट्रा, धर्मराजाचें पुरोहित विद्वान् धौम्य मुनि निर्ऋति दिशेस दर्भ टाकून यमदेवतोद्देशक सामें ह्मणत ह्मणत पुढें चालले आहेत २२. सारांश, भरतकुलोत्पन्न कौरवांचा संग्रामामध्यें वध झाल्यावर कौरवांचे गुरु ह्याचप्रमाणें सामें ह्मणतील असें दर्शवून धौम्य मुनिही प्रयाण करीत आहेत २३. " अरेरे ! आमचे हे नाथ पांडव अशाप्रकारचें संकट प्राप्त होऊन अरण्यांत चालले आहेत ते पहा. अहो, राज्याच्या लोभानें जे पांडुपुत्रांना हाकून देत आहेत त्या ह्या बालांप्रमाणें असलेल्या कुरुवृद्धांच्या करण्याला धिक्कार असो. पांडुपुत्रांचा वियोग झाल्यामुळें आह्मी सर्व अनाथ झालों आहोंत २४,२५. अहो, दुर्वर्तनी आणि लुब्ध अशा ह्या कौरवांमध्यें राहण्याम आमचें मन कोठून प्रशस्त असणार ? " ह्याप्रमाणें नगरवासी लोक अत्यंत दुःखाकुल होऊन वारंवार आक्रोश करूं लागले २६. असो. ह्याप्रकारच्या चिन्हांच्या योगानें आपल्या मनांतील निश्चय दर्शवीत ते विचारी कुंतीपुत्र पांडव वनांत चालले २७. ह्याप्रमाणें ते पुरुषश्रेष्ठ हास्तिनपुरांतून निघून जाऊं लागले असतां मेघ नसतांनाच विजा चमकूं लागून धरणीकंप होऊं लागला २८. त्याचप्रमाणें, हे प्रजाधिपते धृतराष्ट्रराजा, पर्व

चाप्यपसव्येन पुरं कृत्वा व्यशीर्यत २९ प्रत्याहरन्ति क्रव्यादा गृध्रगोमायुवायसाः । देवायतनचैत्येषु प्राकाराट्टालकेषु च ३० एवमेते महोत्पाताः प्रादुरासन्दुरासदाः । भरतानामभावाय राजन्दुर्मन्त्रिते तव ३१ वैशम्पायन उवाच ॥ एवं प्रवदतोरेव तयोस्तत्र विशांपते । धृतराष्ट्रस्य राज्ञश्च विदुरस्य च धीमतः ३२ नारदश्च सभामध्ये कुरूणामग्रतः स्थितः । महर्षिभिः परिवृतो रौद्रं वाक्यमुवाच ह ३३ इतश्चतुर्दशे वर्षे विनङ्क्ष्यन्तीह कौरवाः । दुर्योधनापराधेन भीमार्जुनबलेन च ३४ इत्युक्त्वा दिवमाक्रम्य क्षिप्रमन्तरधीयत । ब्राह्मीं श्रियं सुविपुलां बिभ्रद्देवर्षिसत्तमः ३५ ततो दुर्योधनः कर्णः शकुनिश्चापि सौबलः । द्रोणं द्वीपममन्यन्त राज्यं चास्मै न्यवेदयन् ३६ अथाब्रवीत्ततो द्रोणो दुर्योधनममर्षणम् । दुःशासनं च कर्णं च सर्वानेव च भारतान् ३७ अवध्यान्पाण्डवान्प्राहुर्देवपुत्रान्द्विजातयः । अहं वै शरणं प्राप्तान्वर्तमानो यथाबलम् ३८ गन्ता सर्वात्मना भक्त्या धार्तराष्ट्रान्सराजकान् । नोत्सहेयं परित्यक्तुं दैवं हि बल-

---

नसतांनाच सूर्याला ग्रहण लागलें आणि (अरिष्टसूचक अशी एक) ज्वाला नगराभोंवती उलटी फिरून नाहींशी झाली २९. गृध्र, जंबूक, काक वगैरे मांसभक्षक पक्षी देवालयें, मार्गासमीप असलेले वृक्ष, प्राकार आणि गच्चा ह्यांवर बसून भयसूचक ध्वनि करीत आहेत ३०. असो. हे राजा, तूं वाईट सल्ला दिल्यामुळें भरतवंशजांचा क्षय सुचविणारे आणि टळण्यास दुर्घट असलेले असे हे मोठमोठे उत्पात पांडव वनांत जाऊं लागले असतां झाले ३१. वैशंपायन सांगतातः—हे प्रजाधिपते जनमेजया, ह्याप्रमाणें धृतराष्ट्राच्या घरीं राजा धृतराष्ट्र आणि विवेकी विदुर ह्या उभयतांचा संवाद चालला असतां ३२ कौरवांच्या सभेमध्यें महर्षींनीं परिवेष्टित आणि अत्यंत विपुल ब्रह्मतेज धारण करीत असून अग्रस्थानीं विराजमान असलेल्या देवर्षिश्रेष्ठ नारदमुनींनीं " दुर्योधनाच्या अपराधामुळें भीमार्जुनांच्या बलानें आजपासून चवदाव्या वर्षीं ह्या भूतलावर कौरवांचा क्षय होईल " असें भयंकर भाषण केलें व स्वर्गमार्गाचें अवलंबन करून ते सत्वर अंतर्धान पावले ३३,३४,३५. तदनंतर दुर्योधन, कर्ण व सुबलपुत्र शकुनि ह्यांनीं द्रोणाचार्य आपल्याला आश्रयभूत आहेत असें समजून त्यांना राज्य अर्पण केलें ३६. तेव्हां, परोत्कर्षासहिष्णु दुर्योधन, दुःशासन, कर्ण व इतरही सर्व भरतवंशीय कौरव ह्यांना द्रोणाचार्य ह्मणाले ३७ " अहो, देवपुत्र पांडव अवध्य ह्मणून द्विजांनीं सांगून ठेविलें आहे आणि मी तर शरण आलेल्यांना यथाशक्ति साहाय्य करणारा आहें ३८. तस्मात्, राजांसहवर्तमान भक्तीनें मला शरण आलेल्या धृतराष्ट्रपुत्रांच्या मनाप्रमाणें मी

वत्तरम् ३९ धर्मतः पाण्डुपुत्रा वै वनं गच्छन्ति निर्जिताः । ते च द्वादश वर्षाणि वने वत्स्यन्ति पाण्डवाः ४० चरितब्रह्मचर्याश्च क्रोधामर्षवशानुगाः। वैरं निर्यातयिष्यन्ति महद्दुःखाय पाण्डवाः ४१ मया च भ्रंशितो राजन्द्रुपदः सखिविग्रहे । पुत्रार्थमयजद्राजा वधाय मम भारत ४२ याजोपयाजतपसा पुत्रं लेभे स पावकात् । धृष्टद्युम्नं द्रौपदीं च वेदीमध्यात्सुमध्यमा ४३ धृष्टद्युम्नस्तु पार्थानां श्यालः संबन्धतो मतः । पाण्डवानां प्रियरतस्तस्मान्मां भयमाविशत् ४४ ज्वालावर्णो देवदत्तो धनुष्मान्कवची शरी । मर्त्यधर्मतया तस्मादद्य मे साध्वसो महान् ४५ गतो हि पक्षतां तेषां पार्षतः परवीरहा । रथातिरथसङ्ख्यायां योग्रणीरर्जुनो युवा ४६ सृष्टप्राणो भृशतरं तेन चेत्संगमो मम । किमन्यद्दुःखमधिकं परमं भुवि कारवाः ४७ धृष्टद्युम्नो द्रोणमृत्युरिति विप्रथितं वचः । मद्वधाय श्रुतोप्येष लोके चाप्यतिविश्रुतः ४८

पूर्णपणें वागेन. ह्यांचा त्याग करण्याची माझी इच्छा नाहीं. कारण, दैव बलवत्तर आहे ३९. द्यूतामध्यें पराजित झालेले पांडुपुत्र धर्माकडे लक्ष्य देऊन वनामध्यें जात आहेत आणि ते पांडव (वचनाप्रमाणें)बारा वर्षें वनांत वास्तव्यही करणार आहेत ४०. परंतु, क्रोध व असह्यता ह्यांनीं व्याप्त झालेले ते पांडव ब्रह्मचर्यानें वनामध्यें राहून ह्या महावैराचा सूड उगवितील आणि त्यांपासून तुह्मांला दुःख होईल ४१. हे भरतकुलोत्पन्ना दुर्योधनराजा, मित्राशीं युद्ध करून त्या युद्धामध्यें द्रुपदराजाला मीं राज्यापासून पदच्युत केला असल्यामुळें त्यानें माझ्यावधार्थ पुत्र उत्पन्न होण्याकरितां याग केला ४२ आणि याज व उपयाज ह्या मुनींच्या तपानें अग्नीपासून त्याला धृष्टद्युम्न नांवाचा पुत्र व वेदीमधून सौंदर्यसपन्न द्रौपदी अशीं दोन अपत्यें प्राप्त झालीं ४३. असो. धृष्टद्युम्न हा पांडवांचा श्याल असून संबंधी असल्यामुळें त्यांना अभिमतही आहे आणि शिवाय पांडवांचें प्रिय करण्याविषयीं तो तत्परही आहे. ह्यास्तव, त्याची मला भीति वाटत आहे ४४. सारांश, धनुर्बाण व कवच ह्यांसहवर्तमान देवांनीं दिलेला व अग्निज्वालेप्रमाणें तेजस्वी असलेला हा धृष्टद्युम्न मनुष्यरूपानें आज मला मोठें मूर्तिमंत भयच होऊन राहिला आहे ४५ व शत्रूकडील वीरांचा निष्पात करणारा तो धृष्टद्युम्न त्यांच्या पक्षालाही जाऊन मिळालेला आहे. रथी व अतिरथी ह्यांच्या समुदायामध्यें अग्रगण्य असलेला जो तरुण अर्जुन ४६ त्याच्याशीं जर माझा अत्यंत प्राणनिरपेक्ष असा संग्राम होणें असेल तर, हे कौरवहो, ह्यापेक्षां अधिक पराकाष्ठेचें तें काय दुःख ह्या जगतामध्यें आहे ? ४७. धृष्टद्युम्न द्रोणाचा मृत्यु ही ऋण प्रसिद्ध आहे; माझ्या वधाकरितां उत्पन्न झाल्याचें त्याला स्वतःलाही श्रुत आहे आणि

सोयं नूनमनुप्राप्तस्त्वत्कृते काल उत्तमः। त्वरितं कुरुत श्रेयो नैतदेतावता कृतम् ४९ मुहूर्तं सुखमेवैतत्तालच्छायेव हैमनी। यजध्वं च महायज्ञैर्भोगानश्नीत दत्त च ५० इतश्चतुर्दशे वर्षे महत्प्राप्स्यथ वैशसम्। द्रोणस्य वचनं श्रुत्वा धृतराष्ट्रोब्रवीदिदम् ५१ सम्यगाह गुरुः क्षत्तरुपावर्तय पाण्डवान् ५२ यदि ते न निवर्तन्ते सत्कृता यान्तु पाण्डवाः। सशस्त्ररथपादाता भोगवन्तश्च पुत्रकाः ५३ [२६४४] इति श्रीमहाभारते शतसाहस्र्यां० सभापर्वण्यनुद्यूतपर्वणि विदुरधृतराष्ट्रद्रोणवाक्य अशीतितमोध्यायः॥८०॥

वैशम्पायन उवाच॥ वनं गतेषु पार्थेषु निर्जितेषु दुरोदरे। धृतराष्ट्रं महाराज तदा चिन्ता समाविशत् १ तं चिन्तयानमासीनं धृतराष्ट्रं जनेश्वरम्। निःश्वसन्तमनेकाग्रमिति होवाच संजयः २ संजय उवाच॥ अवाप्य वसुसंपूर्णां वसुधां वसुधाधिप। प्रव्राज्य पाण्डवान्राज्याद्राजन्किमनुशोचसि ३ धृतराष्ट्र उवाच॥ अशोच्यत्वं कुतस्तेषां येषां वैरं भविष्यति। पाण्डवै-

---

जगतामध्येंही तो अतिशय विख्यात आहे ४८. तात्पर्य, तुझ्यामुळें हा मला परिणामकालच प्राप्त झालेला आहे. असो. तुह्मी आतां ज्याच्या योगानें कल्याण होईल असें काय तें सत्वर करा. पांडवांना वनांत पाठविण्यानें हें कल्याण झालें असें तुह्मी समजूं नका ४९. अरे, हेमंतऋतूंतील तालवृक्षाच्या छायेप्रमाणें हें करणें तुह्मांला क्षणमात्रच सुखकारक होणार आहे. ह्यास्तव, तुह्मांला जो कांहीं उपभोग घेणें असेल, जे कांहीं यज्ञ कर्तव्य असतील आणि जीं कांहीं दानें द्यावयाचीं असतील तें सर्व तुह्मीं सत्वर उरकून घ्या५०. कारण, आजपासून चवदाव्या वर्षी तुह्मांला मोठें भय प्राप्त होईल " ५१. ह्याप्रमाणें द्रोणाचार्यांचें भाषण श्रवण केल्यावर (पुनरपि पुत्रांच्या कल्याणाकरितां तळमळत असलेला) धृतराष्ट्र ह्मणाला " हे विदुरा, द्रोणाचार्यांनीं यथार्थ भाषण केलें आहे. तस्मात्, तूं आतां पांडवांना परत आण ५२. जर ते परत येत नसले तर त्या पुत्रासमान असलेल्या पांडवांना शस्त्रें, रथ, पायदळ व नानाप्रकारच्या भोग्य वस्तु बरोबर घेऊन सत्कारपूर्वक तरी अरण्यांत जाऊं द्या ५३. ह्याप्रमाणें०सभापर्वांतील अनुद्यूतपर्वांपैकीं विदुर, धृतराष्ट्र व द्रोणाचार्य ह्यांच्या संवादाविषयीं ऐंशीवा अध्याय समाप्त झाला॥८०॥

वैशंपायन सांगतातः— हे महाराज जनमेजया, द्यूतामध्यें पांडव पराजित होऊन वनांत गेले असतां धृतराष्ट्र चिंताक्रांत झाला१.तेव्हां मन अस्वस्थ होऊन दीर्घ सुस्कारे टाकीत टाकीत चिंताग्रस्त होऊन बसलेल्या त्या धृतराष्ट्र राजाला संजय ह्मणाला २ " हे पृथ्वीपते धृतराष्ट्रराजा, पांडवांना राज्यापासून भ्रष्ट करून वनांत घालविले असतां आणि ह्या रीतीनें द्रव्यानें भरलेली पृथ्वी संपूर्ण तुला प्राप्त झाली असतां तूं आतां खेद

र्युद्धशौण्डैर्हि बलवद्भिर्महारथैः ४ संजय उवाच ॥ तवेदं सुकृतं राजन्महद्वैरमुपस्थितम्। विनाशो येन लोकस्य सानुबन्धो भविष्यति ५ वार्यमाणो हि भीष्मेण द्रोणेन विदुरेण च। पाण्डवानां प्रियां भार्यां द्रौपदीं धर्मचारिणीम् ६ प्राहिणोदानयेहेति पुत्रो दुर्योधनस्तव। सूतपुत्रं सुमन्दात्मा निर्लज्जः प्रातिकामिनम् ७ यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम्। बुद्धिं तस्यापकर्षन्ति सोवाचीनानि पश्यन्ति ८ बुद्धौ कलुषभूतायां विनाशे समुपस्थिते। अनयो नयसङ्काशो हृदयान्नापसर्पति ९ अनर्थाश्चार्थरूपेण अर्थाश्चानर्थरूपिणः। उतिष्ठन्ति विनाशाय नूनं तच्चास्य रोचते १० न कालो दण्डमुद्यम्य शिरः कृन्तति कस्यचित्। कालस्य बलमेतावद्विपरीतार्थदर्शनम् ११ आसादितमिदं घोरं तुमुलं लोमहर्षणम्। पाञ्चालीमपकर्षद्भिः सभामध्ये तपस्विनीम् १२ अयोनिजां रूपवतीं कुले जातां विभावसोः। को नु तां सर्वधर्मज्ञां परिभूय यशस्विनीम् १३ पर्यानयेत्सभामध्ये विना दुर्यूतदेविनम्। स्त्रीध-

---

कां करीत आहेस ? ३. धृतराष्ट्र ह्मणतोः— युद्धामध्यें निपुण, बलाढ्य व महारथी अशा पांडवांशीं ज्यांचें वैर असेल त्यांना दुःखरहित अवस्था कोठून असणार ? ४. संजय ह्मणतोः— हे राजा, पांडवांशीं प्रचंड वैर उपस्थित झालें हा तुझ्या पुण्याचा प्रताप बरें ! आतां ह्याच्या योगानें परिवारासहवर्तमान पृथ्वीतील सर्व राजांचा क्षय होईल ५. अरे, भीष्म, द्रोणाचार्य व विदुर " नको नको " ह्मणत असतांना तुझ्या निर्लज्ज दुर्योधन पुत्रानें " सभेमध्यें आण " ह्मणून सूतपुत्र प्रातिकामीला पांडवांची प्रिय भार्या जी धर्मचारिणी द्रौपदी तिच्याकडे पाठविला ६,७. ज्याचा नाश करण्याचें देवांच्या मनांत आलें असेल त्याच्या बुद्धीला ते भ्रंश पाडितात, देवांनीं बुद्धीला भ्रंश पाडिला असतां विपरीत प्रकार त्याच्या मनामध्यें येऊं लागतात ८ आणि विनाशकाल समीप आल्यामुळें बुद्धीला एकदां भ्रंश पडला ह्मणजे न्याय्य प्रकाराप्रमाणें भासमान होणारी अन्यायाची गोष्ट मनांतून जात नाहीं ९. सारांश, अनर्थ अर्थरूपानें भासूं लागून अर्थ अनर्थ वाटूं लागतात व हाच प्रकार पुरुषाला रुचूं लागून परिणामीं त्याच्या नाशाला कारणीभूत होतो १०. (अरे) काल कांहीं प्रत्यक्ष शस्त्र उगारून कोणाचा शिरश्छेद करीत नाहीं. विपरीत प्रकार खरा भासविणें हेंच कालाचें बल होय ११. तपोनिष्ठ पांचालीला सभेमध्यें ओढून आणणाऱ्यांनीं अंगावर कांटा आणणारें असें हें घन घोर संकट आपल्यावर ओढून आणिलें आहे १२. अरे मर्यादेचें अतिक्रमण करून जो द्यूत खेळणारा असेल त्यावांचून अयोनिसंभव, अग्निस्थानापासून उत्पन्न झालेली, सर्वधर्म जाणणारी आणि यशस्विनी अशी जी सौंदर्यसंपन्न द्रौपदी तिला सभेमध्यें कोण बरें आणणार आहे ? रजस्वला असल्यामुळें

र्मिणी वरारोहा शोणितेन परिप्लुता १४ एकवस्त्राथ पाञ्चाली पाण्डवानभ्यवैक्षत। हृतस्वान्हृतराज्यांश्च हृतवस्त्रान्हतश्रियः १५ विहीनान्सर्वकामेभ्यो दासभावमुपागतान् । धर्मपाशपरिक्षिप्तानशक्तानिव विक्रमे १६ क्रुद्धां चानर्हतीं कृष्णां दुःखितां कुरुसंसदि। दुर्योधनश्च कर्णश्च कटुकान्यभ्यभाषताम् १७ इति सर्वमिदं राजन्नाकुलं प्रतिभाति मे । धृतराष्ट्र उवाच ॥ तस्याः कृपणचक्षुर्भ्यां प्रदह्येतापि मेदिनी १८ अपि शेषं भवेदद्य पुत्राणां मम संजय। भरतानां स्त्रियः सर्वा गान्धार्या सह सङ्गताः १९ प्राक्रोशन्भैरवं तत्र दृष्ट्वा कृष्णां सभागताम्। धर्मिष्ठां धर्मपत्नीं च रूपयौवनशालिनीम् २० प्रजाभिः सह संगम्य ह्यनुशोचन्ति नित्यशः । अग्निहोत्राणि सायाह्ने न चाहूयन्त सर्वशः २१ ब्राह्मणाः कुपिताश्चासन्द्रौपद्याः परिकर्षणे । आसीन्निष्ठानको घोरो निर्घातश्च महानभूत् २२ दिव उल्काश्चापतन्त राहुश्चार्कमुपाग्रसत् । अपर्वणि महाघोरं प्रजानां जनयन्भयम् २३ तथैव रथशालासु प्रादुरासीद्धुताशनः । ध्वजाश्चापि व्यशीर्यन्त भरतानामभूतये २४ दुर्योधनस्या-

---

शोणितानें परिप्लुत असून एकवस्त्रा असलेली ती सुंदरी पांचाली (सभेमध्यें ओढून आणिल्यावर) पांडवांकडे पाहूं लागली असतां द्रव्य, राज्य, वैभव, वस्त्रें व सर्वप्रकारच्या भोग्य वस्तु ह्यांचा अपहार होऊन दासत्व प्राप्त झालेले आणि धर्मपाशानें बद्ध असल्यामुळें पराक्रम करण्यास (समर्थ असूनही) असमर्थांसारखे झालेले पांडव तिच्या दृष्टीं पडले १३, १४,१५,१६. तेव्हां क्रुद्ध व दुःखाकुल झालेल्या द्रौपदीला कटुभाषणें करणें योग्य नसतांनाही कौरवांच्या भरसभेमध्यें दुर्योधन व कर्ण ह्या उभयतांनीं तिला उद्देशून कर्णकटु भाषणें केलीं १७. तात्पर्य, हे राजा, मला हा सर्व प्रकार कांहीं विपरीत दिसत आहे. धृतराष्ट्र ह्मणतोः—त्या द्रौपदीच्या सक्रोध दृष्टीनें पृथ्वी सुद्धां दग्ध होऊन जाईल !१८. हे संजया, आतां माझ्या पुत्रांपैकीं कोणी अवशिष्ट राहील कां रे ? कारण, द्रुपदकन्या कृष्णा सभेंत गेलेली अवलोकन केल्याबरोबर भरतवंशज कौरवांच्या सर्व स्त्रिया गांधारीसहवर्तमान एकत्र जुळून त्या ठिकाणीं भयंकरच आक्रोश करूं लागल्या आणि प्रजाजनांची गांठ पडली असतां रूप व यौवन ह्यांनीं संपन्न असलेली जी धर्मनिष्ठ धर्मपत्नी द्रौपदी तिला उद्देशून त्या अद्यापिही नित्य शोक करीत असतात. सायंकालीं अग्नीमध्यें हवन केलें असतां त्याचें सर्वस्वीं हुत होत नाहीं १९,२०,२१. द्रौपदीला जेव्हां सभेमध्यें ओढून नेली तेव्हां ब्राह्मण क्रुद्ध झाले; प्रचंड वायु वाहूं लागला, एकाएकीं विद्युल्लतेचा मोठा शब्द झाला २२; आकाशापासून उल्कापात झाला; पर्व नसूनही सूर्याला ग्रहण लागलें व प्रजेला अति घोर भय उत्पन्न होणार असल्याचें त्यानें सुचविलें २३; त्याचप्रमाणें

ग्निहोत्रे प्राक्रोशन्भैरवं शिवाः। तास्तदा प्रत्यभाषन्त रासभाः सर्वतो दिशः २५ प्रातिष्ठत ततो भीष्मो द्रोणेन सह संजय। कृपश्च सोमदत्तश्च बाह्लीकश्च महामनाः २६ ततोहमब्रुवं तत्र विदुरेण प्रचोदितः। वरं ददानि कृष्णायै काङ्क्षितं यद्यदिच्छति २७ अवृणोत्तत्र पाञ्चाली पाण्डवानामदासताम्। सरथान्सधनुष्कांश्चाप्यनुज्ञासिषमप्यहम् २८ अथाब्रवीन्महाप्राज्ञो विदुरः सर्वधर्मवित्। एतदन्तास्तु भरता यद्वः कृष्णा सभां गता २९ यैषा पाञ्चालराजस्य सुता सा श्रीरनुत्तमा। पाञ्चाली पाण्डवानेतान्दैवसृष्टोपसर्पति ३० तस्याः पार्थाः परिक्लेशं न क्षंस्यन्ते ह्यमर्षणाः। वृष्णयो वा महेष्वासाः पञ्चाला वा महारथाः ३१ तेन सत्याभिसन्धेन वासुदेवेन रक्षिताः। आगमिष्यति बीभत्सुः पञ्चालैः परिवारितः ३२ तेषां मध्ये महेष्वासो भीमसेनो महाबलः। आगमिष्यति धुन्वानो गदां दण्डमिवान्तकः ३३ ततो गाण्डीवनिर्घोषं श्रुत्वा पार्थस्य धीमतः। गदावेगं च भीमस्य नालं सोढुं नराधिपाः ३४ तत्र मे रोचते

रथशालांमध्यें एकाएकीं अग्नि उत्पन्न झाला(आणि त्या रथशाला दग्ध होऊं लागल्या); भरतवंशजांचा पराभव सुचविण्याकरितां ध्वज एकाएकीं मोडून पडले २४; दुर्योधनाच्या गृह्याग्निसमीप भालूंनीं भयंकर शब्द केला व त्याचवेळीं गर्दभांनीं सर्व दिशेस प्रतिध्वनि करून त्यांना उत्तर दिलें २५ आणि असे उत्पात अवलोकन करून, हे संजया, द्रोणाचार्यांसहवर्तमान भीष्म, कृपाचार्य, सोमदत्त व उदारबुद्धि बाल्हीक हे सभेंतून उठून गेले २६. तेव्हां " द्रौपदीच्या इच्छेस येईल तो वर मी पांचालीला देतों " असें विदुराच्या सांगण्यावरून मी त्या ठिकाणीं बोललों असतां २७ " पांडव दास्यांतून मुक्त होऊन रथ व धनुष्य ह्यांसहवर्तमान असावेत " ह्मणून तिनें वर मागितला आणि मींही त्याला अनुमोदन दिलें २८. नंतर सर्वधर्मवेत्ता महाज्ञानी विदुर ह्मणाला " तुमच्या सभेमध्यें द्रुपदकन्या कृष्णा आली हाच भरतवंशजांच्या विनाशकालाचा आरंभ (असें तुह्मी समजा) २९. अरे जी ही पांचालदेशाधिपति द्रुपदराजाची कन्या ती प्रत्यक्ष अनुपम लक्ष्मीच आहे आणि ती देवानें उत्पन्न केलेली पांचाली आज ह्या पांडवांबरोबर वनांत जात आहे ३०. अपमान सहन न करणारे पांडवच नव्हे परंतु, महाधनुर्धारी वृष्णि अथवा महारथी पांचाल ह्यांनाही तिचे क्लेश सहन होणार नाहींत ३१. शिवाय त्या सर्वांचे सत्यप्रतिज्ञ श्रीकृष्ण रक्षण करीत आहेत. अर्जुन पंचालांनीं परिवेष्टित होऊन येईल ३२. त्याच्याच बरोबर दंड घेऊन येणारा साक्षात् मृत्युच कीं काय असा त्या पांचालांमध्यें तो महाधनुर्धारी व महाबलाढ्य भीमसेन गदा फिरवीत फिरवीत येईल ३३. तेव्हां बुद्धिमान् अर्जुनाच्या गांडीवाचा टणत्कार व भीमसेनाच्या गदेचे वेगा-

नित्यं पार्थैः साम न विग्रहः । कुरुभ्यो हि सदा मन्ये पाण्डवान्बलवत्तरान् ३५ तथा हि बलवान्राजा जरासंधो महाद्युतिः । बाहुप्रहरणेनैव भीमेन निहतो युधि ३६ तस्य ते शम एवास्तु पाण्डवैर्भरतर्षभ । उभयोः पक्षयोर्युक्तं क्रियतामविशङ्कया ३७ एवं कृते महाराज परं श्रेयस्त्वमाप्स्यसि ३८ एवं गावल्गणे क्षत्ता धर्मार्थसहितं वचः । उक्तवान्न गृहीतं वै मया पुत्रहितैषिणा ३९ [*२७६३] [*११४७२] इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासिक्यां सभापर्वण्यनुद्यूतपर्वणि धृतराष्ट्रसंजयसंवाद एकाशीतितमोध्यायः ॥८१॥ समाप्तं चानुद्यूतपर्व ॥ इति सभापर्व समाप्तम् ॥ अस्यानन्तरमारण्यकं पर्व भविष्यति ॥ तस्यायमाद्यः श्लोकः ॥ जनमेजयउवाच॥एवं द्यूतजिताः पार्थाः कोपिताश्च दुरात्मभिः । धार्तराष्ट्रैः सहामात्यैर्निकृत्या द्विजसत्तम ॥

मध्यें गुंगणें कानावर पडलें असतां कौरवपक्षीय भूपाल तो नाद श्रवण करण्यासही समर्थ होणार नाहींत ३४. ह्मणून, पांडवांशीं कलह न करितां सामोपचारानेंच वागावें असें मला नित्य वाटत असतें. कारण, कौरवांपेक्षां पांडवांना मी सर्वदां अधिक बलाढ्य समजत आहें ३५. अरे, ज्याचा दरारा फारच मोठा होता अशा महाबलाढ्य जरासंध राजाला मल्लयुद्धामध्यें बाहूच्या तडाख्यासरसाच भीमसेनानें ठार केला ३६. तस्मात्, हे भरतवंशजश्रेष्ठा धृतराष्ट्रा, (सर्वप्रकारें दुर्बल असलेल्या) त्या तुला पांडवांशीं सामोपचारानेंच वागणें योग्य आहे. अरे, असें करणें उभयपक्षांनाही हितावह होणारें आहे. करितां, मनामध्यें कांहीं एक शंका न धरितां तुह्मी पांडवांशीं शम करा ३७. हे महाराजा धृतराष्ट्रा, असें केल्यानें तुझें पराकाष्ठेचें कल्याण होणारें आहे " ३८. ह्याप्रमाणें, हे गवल्गणपुत्रा संजया, धर्म व अर्थ ह्यांना अनुसरून असलेला उपदेश मला विदुरानें केला. परंतु, पुत्रांच्या (मर्जीप्रमाणें त्यांच्या) हिताची इच्छा धरणाऱ्या माझ्याहातून त्याचा स्वीकार झाला नाहीं ३९. ह्याप्रमाणें महामुनिव्यासप्रणीत लक्षग्रंथात्मक श्रीमहाभारतांतर्गत सभापर्वांतील अनुद्यूतपर्वांपैकीं धृतराष्ट्र व संजय ह्यांच्या संवादाविषयीं एक्यांयशीवा अध्याय संपूर्ण झाला ॥८१॥ ह्या ठिकाणीं अनुद्यूतपर्व संपूर्ण होऊन मुख्य सभापर्वही समाप्त झालें ॥ ह्यानंतर वनपर्व असून त्याचा प्रथम श्लोक "जनमेजय उवाच एवं द्यूत० सत्तम" असा आहे.

---

* सभापर्वांतील २०,२४,४१ व ६८ ह्या अध्यायांचे शेवटीं आणि आदिपर्वांतील ४८,७८, १३७,१३८ व १४७ ह्या अध्यायांचे शेवटीं दिलेल्या बेरजेंत चूक आहे ती दुरुस्त केली असतां सभापर्वांतील श्लोकसंख्या २७६३ आणि आदिपर्वांतील श्लोकसंख्या ८७०९ होत असल्यामुळें दोन्ही पर्वांतील मिळून श्लोकसंख्या ११४७२ होते. प्रत्येक पृष्ठांत ९श्लोक सरासरीनें भाषांतरासह बसतात.